दितानिजगंति चतुर्दशभुवनानियेनसः तस्य खंडपरशोः खंडयतिरिपून्हिनस्तीतिखंडः तादृशः परशुः शस्त्रविशेषोयस्यभूतेशस्य भूतेशः खंडपरशुरित्यमरः महैश्वर्यंमहच्चतदैश्वर्यंचमहाविभूतिभूतम् विभूतिर्भूतिरैश्वर्यमित्यमरः सन्महदितिसमासेआङ् महादित्यात्वेवृद्धिः गंगासलिलमात्रसहायेनेश्वरेणविलासादेवचतुर्दशभुवनानिकृतानीतिभावः लोकेपिकश्चनधनेसहायेसति डीडयाब्रह्मपुर्यादिकंनिर्मातीतिप्रसिद्धम् पुनस्तत्किम् यत्श्रुतीनां श्रूयतेधर्मोयाभिस्ताः श्रुतयः चत्वारोवेदाः श्रुञजीत्यादिनाक्तिन्

श्रुतीनांसर्वस्वंसुकृतमथमूर्तंसुमनसांसुधासौंदर्यंतेसलिलमशिवंनःशमयतु १

श्रुतिःस्त्रीवेदआम्नायइत्यमरः तेषांसर्वस्वं सर्वंचतत्स्वंचसर्वस्वं इदमेववेदानांधनमितिभावः यद्वा सर्वंचतत्स्वंच आत्मा इदंसलिलमेववेदानामात्मेतिभावः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियां धनइत्यमरः पुनस्तत्किम् अथयत्सुमनसांसुपर्वणाम् सुपर्वाणः सुमनसइत्यमरः मूर्तंसशरीरम् सुकृतंपुण्यम् स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषइत्यमरः पुनस्तत्किम् यत्सुधासौंदर्यंम सु

गंगाल०
२

धेवामृतमिवसौंदर्यंयस्यतत् अतिशस्वमित्यर्थः मधुरास्वाद चिरजीवित्वादितत्कार्यकारीतिवा यद्वा सुधा
सौंदर्यमितिवापाठः सुधेतिपृथक्पदम् चंद्रोसुखमितिवत्सलिलविशेषणम् पुनः० सौंदर्यम् सम्यक्कंद
रीहिमाचलकंदरंतत्रभवंसोदरम् भवार्थेऽण् सोदरमेवसौंदर्यमितिचातुर्वर्ण्यादित्वात् ष्यञ् आदौ
हिमाचलेप्रकाशितमितिभावः अथवासुधायाः सौंदर्यंष्यात्स्वरूपम् सोदराद्यदितियः अन्नदरस्मितमि
तिश्लोकपर्यंतंशिखरिणीछंदः तल्लक्षणंतु रसैरुद्रैश्छिन्नायमनसभलागः शिखरिणीवृत्तरत्नाकरोक्तं
शिखरिणीय्मौन्स्नौभ्लौगुरुतुरुद्राइतिपिंगलंचबोद्धव्यम् ननुछंदोत्तरंत्यक्त्वानेनैवछंदसाकिमितिव
र्णनमितिचेत् अत्रोच्यते शिखरिणीछंदसिजलदेवताकयगणस्यादौसत्वेन जलस्पर्शे रूपाभिमतफ
लसिद्धिर्भविष्यतीत्याशयेन अशोकवनितान्यायेनवेतिकृतधियोविदांकुर्वंतु तदुक्तम् मोभूमिः
श्रियमातनोतियजलंवृद्धीरवन्हिर्मृतिंसोवायुःपरदेशदूरगमनंतव्योमशून्यंफलम् जःसूर्योरुजम
दधातिविपुलांभेंदुर्यशोनिर्मलंनोनाकःसुखसौख्यमिश्रितंफलमिदंप्राहुर्गणानांबुधाइति किमपितनू इत्ये
कंपदंवा किमपि अनिर्वचनीयंमोक्षप्राप्तिरूपंफलंतनोति विस्तारयतीति किमपितनू ननुविस्तारेक्षि

२

धाटुवङ् घोत्तुंगाः उन्नताः एताहृशास्तरंगाः ऊर्मयः भंगस्तरंगऊर्मिर्वेत्यमरः भवतां भक्तजनानां दुरितभय

भंगाय दुरितंचभयंचतयोर्भंगायनाशायक्रियार्थोपपदेतिचतुर्थी भवंतु आशिषिलोट् कथंभूतास्तरंगाः

उदंचन्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः हेशिवे रंबतेशब्दकरोति

इतिसप्तम्या अलुक् हः शंकरेहरौहं सेरणरोमांचवाजिषु इतिनानार्थमंजरी अबिरबिशब्दे पचाद्यच् त

त्पुरुषे कृतीतिसप्तम्या अलुक् अप्येकदंतहेरंबलंबोदरगजाननाइत्यमरः हेरंबस्यजननी माता पार्वती

(अपि द्राग्गाविद्याद्रुमदलनदीक्षागुरुरिह प्रवाहस्तेवारांश्रियमयमपारांदिशतुनः २) उदंच

न्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः तस्याः कटाक्षाः अपां

गदर्शनानि कटाक्षोपांगदर्शनमित्यमरः स्फुटंचतत्कपटंचव्याजंच कपटोस्त्रीव्याजेत्यमरः स्फुटकपटेनहेरंब

जननीकटाक्षाःउदंचन्उदयंप्राप्नुवन्योमार्तंडः अर्कः विकर्तनार्कमार्तंडइत्यमरः उदंचन्मार्तंडवत् स्फुटक

पटहेरंबजननीकटाक्षाः अतिरक्ताइत्यर्थः तेषांव्याक्षेपः विलंबः चिरकालपर्यंतंकटाक्षस्थितिरित्यर्थः यद्वा

व्याक्षेपः संबंधः तेन क्षणंक्षणपर्यंतंजनितः उत्पादितः तादृशः संक्षोभनिवहो भयसमूहो येषांते पुनः कथं
भूताः अतएवहरशिरसिस्थाधारभूतेमहादेवमस्तके त्वंगतः कंपंतः इतस्ततोगच्छंतोवा त्वागिकंपनेइत्य
स्मात् उरवउरवीतिदंडके पठितगमनार्थकत्वात् उभयार्थकत्वं क्वचित्तु उदंचन्मात्सर्येतिपाठः तत्रसापत्न्य
भावादुदंचन्मात्सर्येणेतिव्याख्येयम् ३ इदानींत्वदाश्रयान्मयासर्वेस्फुरास्तृणप्रायीकृताः अधुनायदि

भवंतु त्वं गंतो हरशिरसि गंगातनुषु वस्तु रंगाः धोतुं गादुरितभयभंगायभवतात् ३ तवा
लंबादंबस्फुरदलघुगर्वेणसहसामयासर्वेवज्ञासरणिमथनीताः सुरगणाः त्वंमेकार्यकरणेउदा

सीनातर्हि अहं केषामग्रेरोदनंकरोमीत्याह नवेति भो अंबजननि अंबार्थनद्योरिति ह्रस्वः तवालंबादाश्र
यात् स्फुरदलघुगर्वेण स्फुरन् देदीप्यमानः अलघुर्महान्गर्वोहंकारोयस्यतेन मयासर्वेसुरगणाः अवज्ञा
सरणिं अवज्ञायाःअवहेलनस्यसरणिस्तां सहसाअविचारेणनीताः प्रापिताः अत्रप्रधानकर्मण्याख्येयेला
दीनाद्विर्कर्मणामितिभाष्योक्तेः सुरगणरूपेप्रधानकर्मणिक्तः अतएवाभिहितत्वात्तत्रप्रथमेतिदिक् भो

भागीरथि भगीरथस्येयं भागीरथी तत्संबोधनम् तस्येदमित्यणि टिड्ढाणेति ङीप् इदानीमुद्धारसमये यदि औ
दास्यं उदासीनत्वं उद्धारानुकूलव्यापारशून्यत्वमित्यर्थः भजसि अंगीकरोषि तदा तर्हि निराधारः निर्गतः आ
धारो यस्य सः एतादृशो हमिह लोके केषां पुरः अग्रे रोदिमि रोदनं करोमि हा इति कष्टे खेदे वा इति त्वं कथय वद
रुदिर् अश्रुविमोचने रुदादिभ्यः सार्वधातुके इतीट् देवानामवहेलनात्तैः त्यक्तः त्वमपि अस्मिन्समये यदि
त्यजसि तर्हि मे का गतिरिति त्वमेव कथयेति भावः ४ पुनरपि भवाहरूपं स्मरन् पापहरणं प्रार्थयते स्मृतिमि

इदानीमौदास्यं भजसि यदि भागीरथि तदा निराधारो हा रोदिमि कथय केषामिह पुरः ४ स्मृतिं या
ता पुंसामकृतसुकृतानामपि च या हरत्यंतस्तंद्रां तिमिरमिव चंद्रांशुसरणिः

ति हे गंगे तव भवाहरूपाम्
र्तिः अकृतसुकृतानां अतीताद्यतनजन्मसुकृतपातकानां पुरुषाणामपि स्मृतिं स्मरणं यालाभमासती चंद्रां
शुसरणिः चंद्रं स्यांशवः किरणाः तेषां सरणिः पंक्तिः सरणिः पद्धतिरित्यमरः तिमिरं अंधकारं यथा तथांतस्तं
द्रां अंतःकरणाज्ञानालस्यं नाशयति यथा चंद्रोदयेन तमो नश्यति तथा तव स्मरणेन महापातकिनां तत्सदृशा

389

नांपातकं नश्यति पुनः मूर्तिः सकलाः सुराः देवाः तैः संसेव्यसलिला सेवनीयजला एतादृशी तेमूर्तिः म
मांतः संतापं अंतःकरणस्थं त्रिविधं कायिकवाचिकमानसिकरूपं पापं चनरकृतं संतापमाधिभूता ध्यात्मा
धिदैवं वाहरताम् तथाजातेजन्ममरणकष्टान्मुक्तः स्यामितिभावः ५ इदानींराज्यत्यागपूर्वकं त्वत्तीरवा
सिनां त्वंभः पानेनजायमानआनंदः ततोन्यूनसुखंमोक्षमुपहसतीत्याह अपीतिभोजननिश्राज्यगपिप्रभूतमपि
प्रभूतंप्रचुरंश्राज्यमित्यमरः समुद्रांतमपीत्यर्थः एतादृशंराज्यंराज्ञः कर्मपुरोहितादित्वाद्यक् प्रजापालना

इयंसातेमूर्तिःसकलसुरसंसेव्यसलिलाममांतःसंतापंत्रिविधमपिपापंचहरतां ५अपिप्राज्यं
राज्यंतृणमिवपरित्यज्यसहसाविलोलद्वानीरंतवजननितीरश्रितवताम्

त्यक्तंसहसातृणमिवपरि
त्यज्य अनेन लोभाभावः सूचितः विलोलद्वानीरं विलोलंतः वायुनाचंचलाः वानीराः वेतसवृक्षाः यस्मिन् त
त् वेतसपर्याये रथाभ्रपुष्पविदुलशीतवानीरवंजुलाइत्यमरः अनेनछायानिबिडत्वंसूचितम् एतादृश
तवतीरं कूलंरोधश्चतीरंचेत्यमरः श्रितवतांसेवतांसुधातः अमृतात् पंचम्यांतात्तसिल्स्वादीयः सलिलभ

390

त् षष्ठी तथाचकोशः पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति ददानादात्रीनलोपेतिषष्ठीनिषेधात् पद॰
द्वितीया एतादृशीत्वंइहलोके केनतुलनीयाउपमेयासीतिनः अस्मान् कथय वद तादृशस्य कस्याप्यभावान्
नाप्युपमेयासीतिभावः यद्वा केनब्रह्मणातुलनीयासि अपितु नेत्यर्थः ब्रह्मणोपि तादृशसामर्थ्याभावादि
भावः तुलनिष्कर्षइतिधातोरनीयर् विष्णुरूपंवस्त्विति पक्षेसारूप्यमुक्तिः प्रतीयते तदुक्तंश्रीमच्छंकराचार्यैः
न्मध्याङ्गुलांछनोगरुडगः पीतांबरोनिर्गतः नारायणंवाशिवंवाइतिवेतितत्किं यद्विष्णुपदंमहादानैः गजाश्व

अचिंत्यंतद्विष्णोःपदमखिलसाधारणतयाददानाकेनासित्वमिहतुलनीयाकथयनः ११ शिबिकालु

लादिरूपैः ध्यानैः चित्तैकाग्रतयाचिंतनैः अपिनबहुविधवितानैरपिन बहुविधाः अनेकप्रकाराः येवितानाः क्रतवः क्रतु
विस्तारयोरस्त्रीवितानंत्रिषुतुच्छकइत्यमरः बहुविधाः येवितानाउल्लोचास्तैः अस्त्रीवितानउल्लोचेत्यमरः घोराभि
भयंकराभिः परमकष्टसाध्याभिर्वा स्फविमलतपोराशिभिरपि स्फविमलानिनिर्मलानि नतुमारणोच्चाटनवशीकरण
जनकानितादृशानियानितपांसि तेषांराशयः समूहाः तैरपिनलभ्यंनप्राप्यम् अर्हार्थलभधातोः पोरदुपधादि

यत् पुनस्तत्किम् अचिंत्यं चिंतालहरीवागगोचरमितिभावः ॥ ११ इदानीं दर्शन मात्रेण नृणां संसारभयहर्त्री
त्वां शिवः पार्वत्यनुरोधत्यागपूर्वकं निरंतरं शिरसि बिभर्तीत्याह नृणामिति भो भागीरथि ते तव मूर्तेः तनोः
महिमानं परमदुर्घटकार्यकर्तृत्वरूपं माहात्म्यं इह लोके कः निगदतु वदतु अपितु न कोपीत्यर्थः माहात्म्यबाहुल्ये
न कस्यापि वाणीप्रसराभावादिति भावः कथं भूतायाः मूर्तेः ईक्षामात्रादपि ईक्षैव ईक्षामात्रं मितिमयू

नृणामीक्षामात्रा दपिपरिहरंत्याभवभयं
शिवायास्ते मूर्तेः क इह महिमानं निगदतु ॥

रव्यंसकात्समासः मात्रं कार्त्स्न्येऽवधारणे इति कोशादवधारणं मात्रशब्दार्थः तस्मादपि नृणां नृ चेत्यर
वैकल्पिकत्वाद्दीर्घाभावः भवभयं भवात्संसाराद्भयम् हरंत्याः तदुक्तं गंगे त्वद्दर्शनान्मुक्तिर्न जाने स्ना
नजं फलमिति पुनः कथंभूतायाः शिवायाः शिवयतीति शिवा तत्करोतीति ण्यंतात्पचाद्यचि टाप् त

यद्वा शिवंकल्याणं अस्तीत्यस्याः सातस्याः यद्वा शिवो महादेवो भर्तृत्वेन अस्त्यस्याइति शिवोमोक्ष

स्याइति पक्षचतुष्टयेपि अर्शआद्यच् शिवोमोक्षे महादेवेस्त्रस्वेक्षेमे जले शिवमितिशाश्वतः श्रीकंठः कपर्दी

य्रः कपर्दी श्रीकंठः शितिकंठः कपालभृदित्यमरः अमर्षम्लानायाः अमर्षेण कोपेन कोपक्रोधामर्षरोषइत्य

रः म्लानाग्लानातस्याः एतादृशाः गिरिभुवः गिरेर्हिमाचलात् भवतीतिगिरिभूः पार्वती क्विप् तस्याःप

अमर्षम्लानायाः परमननुरोधागिरिभुवो
विहायश्रीकंठःशिरसिनियतंधारयतियां १२

रूपं अनुरोधं अनुसरणं विहायत्यक्त्वायांगंगांशिरसिनियतं निरंतरं यथास्यात्तथा धारयति बिभर्ति स

र्थेणिच् सपत्नीभूतगंगायाः मस्तकधारणेनजातकोपायाः अपिपार्वत्याः सांत्वनादिकंविहायअधिकगुणव

त्तामेवशिरसिबिभर्तीतिभावः लोके अपि अतिगुणवतोहीरकस्यमस्तकधारणंप्रसिद्धमेव १२ ७

इदानींउन्मत्तादिभिरपिविनिंद्यानिपरिहार्याणि अवाच्यानियानिपापानितन्नाशिनीत्वमेवेत्याह विनिंद्या
नीति भोगंगेउन्मत्तैरविचारकारिभिः विशेषेणनिंद्यानिनिंदितुंयोग्यानि अपिच पतितैरपिप्रायश्चित्तादि
भिः परिहार्याणित्याज्यानि व्रात्यैः गर्भाधानादिसंस्कारहीनैः व्रात्यः संस्कारहीनः स्यादित्यमरः अव
च्यानिवक्तुमयोग्यानि पिशुनैः कर्णेजपैः कर्णेजपः सूचकः स्यात्पिशुनोदुर्जनः खलइत्यमरः सपुलकं र

विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिव्रात्यैः सपुलकमपास्यानिपिशुनैः हरंती
लोकानामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविजयसे १३ रोमांचंयथास्या

थाअपास्यानित्याज्यानि एतादृशानि कियतां किंपरिमाणमेषांतेकियंतः तेषां किमः संख्यापरिमाणेडति
निवतुप् किमिदंभ्यांवोघः बहूनामित्यर्थः लोकानामेनांसियंत्यधोएभिस्तानि यंति गच्छंतिप्रायश्चित्ता
नायातानि एनांसि कलुषाणि इण् आगसीत्यसुण् कलुषंवृजिनैनोघमित्यमरः हरंतीनाशयंती एका
कदापिकस्मिन्नपिकालेश्रांता अखिन्ना एतादृशीत्वंजगति विश्वस्मिन् विजयसे सर्वोत्कर्षेणव

लोकेकश्चन कदाचित् एवंकार्यं यदिकरोतितदाश्रांतोभवति बहुभिर्वा एकं महत्कार्यंकृतंचेत् सर्वेश्रांताः भवंति त्वंतु अस हायाद्वितीयासर्वेषां पापानिनिरंतरंहरंत्यपिनश्रांतेतिममापिपापंदूरीकरिष्यस्येवेतिभावः १३
इदानींतवगुणानामेवायंदोषः यत्पृथ्वीतले शोकनाशायस्वर्लोकात्पतंत्यास्तवनिर्लोभोपिशिवः कपर्दस्यापि नमिषेणप्रतिग्रहंचकारेत्याह स्खलंतीति भोभागीरथि अवनितलशोकापहृतये अवन्याः पृथिव्याः तलं

स्खलंतीस्वर्लोकादवनितलशोकापहृतये जटाजूटग्रंथौयदसिविनिबद्धापुरभिदा अयेनि
र्लोभानामपिमनसिलोभंजनयतांगुणानामेवायंतवजननिदोषः परिणतः१४

स्वरूपंअधःस्वरूपयो रस्त्रीतलमित्यमरः तत्रयःशोकः तत्रापहृतिर्नाशः तस्यैवअपहृतिंकर्तुमित्यर्थः स्वर्लोकात् स्खलंतीपतंतीत्वं पु रभिदाशिवेनजटाजूटग्रंथौ जटाजूटस्यकपर्दस्यग्रंथिः तत्रयत्त्वंविनिबद्धाविशेषेणनिरंतरंबद्धासि उपसर्गद्वयंक दापि अन्यत्रगमनाभावंबोधयति अयेजननि निर्लोभानामपि निर्गतः लोभोयेषांतेषामपिमनसिचित्ते लोभं इच्छांजनयतांकुर्वतां तवगुणानामेवदयादाक्षिण्यादीनामेवायंदोषः परिणतः प्रसृतः निर्लोभितयाकदाप्यप्र

निग्रहकर्ताशिवः तवगुणलोभवशेनैवअपूर्वंप्रतिग्रहं चकारेतिभावः १४ इदानींसर्वेषांरक्षणक्षमंपरमौ षधंत्वमसीत्याह जडानिति भो अंब इह कलौ जडान् अज्ञान् क्रियासुमंदानित्यर्थः जडोऽज्ञ इत्यमरः अंधान् चक्षुरिंद्रियहीनान् पंगून् पादगतिहीनान् प्रकृतिबधिरान् प्रकृत्यास्वभावेनबधिरान् श्रोत्रेंद्रियहीनान् शब्दश्रवणासमर्थानित्यर्थः उक्तिविकलान् उक्तिभिर्वचनैर्विकलाः हीनाः तान् पूर्वसदृशेतिसमासः व्याहारउक्तिर्लपितंभाषितंवचनंवचइत्यमरः वचधातोः क्तिनिवचिस्वपीतिसंप्रसारणं ग्रहग्रस्तान् ग्रहैः

जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान्ग्रहग्रस्तानस्ताखिलदुरितनिस्तार सरणीन्

रादित्यादिनवग्रहैर्ग्रस्ताः कवलिताः कृतपीडाइतियावत् तदुक्तं ज्योतिःशास्त्रे स्वर्क्षीच्चेंद्रखलास्त्रिखारिपुशुभाः सप्तारागोऽब्जःपुनश्चाद्युनाह्यायधर्मसूत्सुशुकविःस्वास्तत्रिकोणेगुरुः सौम्योव्यंत्यसमेः रविलाभवगलाः शुक्रोनवेषुद्विगश्चेंद्राथौनिजभाद्वश्रमनवत्वतंत्यद्वीशुशेषंनसदिति अस्ताखिल दुरितनिस्तारसरणीन् अखिलानिचतानिदुरितानिचपापानितेषांनिस्तारणंनाशनम् तस्यसरणिःमार्ग

396

श्चित्ताद्याचरणमार्गाः अस्ताः विद्यमाना अखिलदुरितनिस्तारसरणिर्येषांते तान् पापबाहुल्येन अविद्यमानप्रायश्चि
त्तादीनित्यर्थः निलिंपैर्देवैः अनुपसर्गाल्लिंपेति सूत्रस्थेन नोलिंपेः संज्ञायामिति वार्तिकेनशः मुक्तान् स्वहस्तेनपरि
त्राणाभावात् अपिचनिरयांतर्निरयस्य नरकस्य अंतेमध्ये स्यान्नारकस्तु नरकोनिरयोदुर्गतिः स्त्रियामित्यमरः
निपततः नितरांपतंतिते निपतंतः तान् एतादृशान् नरान् मनुष्यान् त्रातुं त्वं परमं उत्कृष्टं भेषजं औषधमसि भेष
जौषधभैषज्यानीत्यमरः एवंच सर्वभेषजं त्वं सर्वांतर्गतस्यममापि भेषजं भविष्यस्येवेति भावः १५ इदानींक

निलिंपैर्निर्मुक्तानपिचनिरयांतर्निपततोनरानंबत्रातुंत्वमिह परमंभेषजमसि १५ स्वभावस्वच्छा
नांसहजशिशिरायामयसपामपारस्तेमातर्जयतिमहिमाकोपिजगति॥ पिलसुनिनिर्दग्धाः त्वत्संबं

धवशात् स्वर्गेदिव्यदेहधारिणः सगरजाः सगरपुत्राः अद्यापितवमहिमानं अहोधन्याजान्हवीनिधनंगता अ
विसयंयत्संगवशादीदृशाजाताइत्याकारकंगायंतीत्याह स्वभावेति भोमातः स्वभावस्वच्छानांस्वभावेननिस
र्गेण नतुकृत्रिमेण स्वरूपंचस्वभावश्चनिसर्गश्चाथवेपथुरित्यमरः स्वच्छानां निर्मलानां सहजमनायासेनमणि

397

कायसंक्षेपेण शिशिराणां शीतलानां उक्तंच कालिदासेन शैत्यंहि यत्सामकृतिर्जलस्येति एतादृशीनांते अपांवा
राम् आपः स्त्रीभूम्निवार्वारिइत्यमरः अपारः अमर्यादः अयंकोपिविलक्षणोमहिमामाहात्म्यं जगतिजयतिस
र्वोत्कर्षेणवर्तते सगरजाः सगरराजपुत्राः अनवद्याकृतिभृतः संतः न अवद्यागर्ह्या अनवद्यास्तत्या अवद्यपण्ये
तिसूत्रेण गर्हायां अवद्येतिनिपातितम् तादृशीचासौकृतिश्चतांबिभ्रतितेते एतादृशाःसंतः अतएवस्फुटपुलक
सांद्राःसंतः स्फुटाः प्रकटाः येपुलकाः रोमांचाः तैः सांद्राः निबिडाःसंतः महिमानं अद्यापिमुदागायंतिव

मुदायंगायंतिद्युतलमनवद्याकृतिभृतः समासाद्याद्यापिस्फुटपुलकसांद्राःसगरजाः१६

दंतीत्यर्थः किंकृत्वा द्युतलंदिवस्तलम् दिवउदित्युत् द्योदिवौद्वेस्त्रियामित्यमरः समासाद्य अधिष्ठित्यसगरेण
हि अश्वमेधकरणायअश्वोविनिर्मुक्तः तत्संरक्षणायस्वपुत्राः नियुक्ताः स अश्वः इंद्रेणचौर्येणपातालेनी
तः सगरपुत्राः अपितदानयनायतत्रगताः तेसर्वेकपिलेननिर्दग्धाः पश्चात् भगीरथेनस्वर्गात् गंगामानीय
जीविताइति स्पष्टंरामायणादौ १६ इदानींस्वल्पपापिनांदोषापनुत्तयेभिजगतिगोदावर्यादीनिबहूनिती

र्थानिसंति अतीतप्रायश्चित्तानांतुदोषहरणेत्वसदृशीत्वमेवसमर्थेत्याह कृतेति भोजननिकृतकृच्छ्रैर्द्रैनस्कान्
कृतानिक्षुद्राणिअल्पानिपलांडुभक्षणादीनिएनांसिपापानियैस्तेतान् शेषाद्विभाषेतिकप् अथपापाचरणानंत
रंझटितिशीघ्रंसंततसमनसः संततसंपश्चात्तापयुक्तंमनोयेषांते तान् एतादृशान् नरान् समुद्धर्तुं आचरितपापात् दूरी
कर्तुं त्रिभुवनतले त्रयाणांभुवनानांसमाहारस्त्रिभुवनं तद्धितार्थेतिसमाहारेद्विगुः पात्रादित्वात्स्त्रीत्वाभावः
तस्यतलं तत्रतीर्थनिवहाः तीर्थानांगोदावर्यादितीर्थानांनिवहाःसमूहाः संतिवर्तंते भोजननिप्रायश्चित्तप्रसर

कृतकृच्छ्रैर्द्रैनस्कानथझटितिसंततसमनसःसमुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः णपथातीतचरितान्

प्रायश्चित्तस्यपापनाशनसमर्थधर्मविशेषस्यप्रसरणमाचरणंतस्यपंथामार्गः वादः पंथाश्चमार्गश्चेतित्रिकांडमंड
नः ऋक्पूरब्धेतिसमासांतोअप्रत्ययः प्रायश्चित्तप्रसरणपथान् अतीतं अत्यंतंगतंचरितंयेषांते तानपि बहुका
लं बुद्धिपूर्वकंमहत्पापाचरणेन अविद्यमानप्रायश्चित्तानपीत्यर्थः उक्तंचमुद्गलाचार्यैः स्कृतिनिर्देषत्वापे प्रायश्चि
त्तंरघूत्तमप्रोक्तम् अपयातिमामुदीक्ष्यप्रायस्तदपीहगौरिवव्याघ्रमिति एतादृशानपिनरान्दूरीकर्तुंआचरितपा

299

पादुद्दर्त्तुं त्वमिवत्वत्सदृशीत्वमेवविजयसे अत्रोपमानोपमेयत्वंगंगायाएव तत्फलंतु अन्यात्वत्सदृशीनास्ती
ति अतएवात्रानन्वयालंकारः तदुक्तम् उपमानोपमेयत्वंयदेकस्यैववस्तुनः इंदुरिंदुरिवश्रीमानित्यादौतदन
न्वयइति प्रायश्चित्तशब्दे प्रायस्यचित्तिचित्तयोरितिपारस्करगणपठितसूत्रेणसुटिनिष्पन्नः सचरूढ्यायोगेन
चपापनाशनसमर्थेविशेषधर्ममाचष्टे प्रायश्चित्तशब्दश्चायंपापक्षयार्थेनैमित्तिके कर्मविशेषेरूढइत्याहुःसंप्र
दायविदोनिबंधकारादयः योगस्त्वांगिरसादर्शितः प्रायोनामतपः प्रोक्तंचित्तंनिश्चयउच्यते तपोनिश्चयसंयुक्तं

अपिप्रायश्चित्तप्रसरणपथातीतचरितान्नरान्दूरीकर्त्तुं त्वमिवजननित्वंविजयसे १७
निधानंधर्माणांकिमपिचविधानंनवमुदांप्रधानंतीर्थानाममलपरिधानंत्रिजगतः ॥

प्रायश्चित्तंतदुच्यते अस्यार्थः अनुष्ठितेनद्वादशवार्षिकादिना अवश्यंपापंनिव र्ततइतिविश्वासोनिश्चयः तेनसं
युक्तंव्रतानुष्ठानलक्षणं तपः प्रायश्चित्तमित्यलंविस्तरेण १७ इदानीमनेकगुणविशिष्टत्वेन पापहरणक्षमंनवव
पुर्ममपापंनाशयतुइतिप्रार्थयते निधानमिति श्रोजननि धर्माणांवेदेनप्रयोजनमुद्दिश्यविधीयमानार्थानां तदुक्तं
जैमिनिना चोदनालक्षणोर्थोधर्मस्तेषांनिधानंस्थानंनिधीयतेस्थाप्यतेयस्मिन्नितिधाधातोः करणाधिकरणयोश्चे

तिल्युट् चपुनः नवसुदांनवाश्चताः सुदश्चतासांनूतनहर्षाणांकिमपिविधानंजनकं गंगादर्शनेनविलक्षणाहर्षाजा
यंतेइत्यनुभवसिद्धं कर्तृकर्मणोरिति कर्मणिषष्ठीउभयत्रचपुनः तीर्थानांप्रधानं चपुनः त्रिजगतः त्रयाणांजगतां
समाहारः त्रिजगत् तस्यतद्धितार्थेतिसमाहारेद्विगुः अमलपरिधानं अमलंनिर्मलंचतत्परिधानंचामलपरिधा
नं अधोंशुकं अंतरीयोपसव्यानपरिधानान्यधोंशुकइत्यमरः यथालोकेकस्यचिद्वसनहीनस्यनशोभात
थाएतद्विनात्रिजगतीत्याकूतं चपुनःबुद्धेर्मनीषायाः बुद्धिर्मनीषाधिषणाधीःप्रज्ञाशेमुषीमतिरित्यमरःसमा

समाधानंबुद्धेरथरवस्तुतिरोधानमधियांश्रियामाधानंनःपरिहरतुतापंतववपुः १८

धानंनानादुष्टकल्पनानाशकमित्यर्थः अथानंतरम् अधियांनिर्बुद्धीनांतिरोधानं अपिधानं तेषामदृश्यमिति
भावः अपिधानतिरोधानपिधानाच्छादनानिचेत्यमरः अथश्रियांलक्ष्म्यामाधानंस्थापकम् मोक्षादिलक्ष्मीसंपा
दकमित्यर्थःएतादृशगुणविशिष्टंतववपुःशरीरंगात्रंवपुःसंहननंशरीरमित्यमरःनःअस्माकंतापंपरिहरतु १८

इदानीं कार्यासक्तत्वाय: तववियोगेजातः अयंममैवापराधइत्याह पुरइति भोमातः मातृत्वेनापराधः सोढ
व्यइत्याकूतं एवंममैवएषनिश्चयार्थः मंतुः अपराधः अस्तीतिशेषः कोसावित्याकांक्षायामाह इहलोके तववियो
गः स्नानाद्यसंबंधः यत् अभूत् अतः कारणात् क्षणमपिक्षणमात्रमपिकरुणादयालयामयि कर्तव्येतिशेषः का
रुण्यं करुणाघृणेत्यमरः अपराधभवनेमूलमाह कथंभूतस्यममद्रविणमदिराघूर्णितदृशांद्रविणमेवमदिरा

पुरोधावंधावंद्रविणमदिराघूर्णितदृशांमहीपानांनानातरुणतरखेदस्यनियतम्

उन्मादकारित्वात् यद्वा द्रविणंचमदिराचताभ्यांघूर्णिते घूर्णनयुक्तेभ्रमितइत्यर्थः तादृश्योदृशोयेषांते दृक्दृ
ष्टीचेत्यमरः नानाअनेकेषांअव्ययत्वात् षष्ठ्यालुक् एतादृशानांमहीपानांमहीं पांतितेमहीपाः राजानःते
षां अग्रेनियतमेव धावंधावंधावित्वाधावित्वा धावुगतिशुद्ध्योरितिधातोराभीक्ष्ण्येणमुलं चेति णमुलिद्वि
त्वं तरुणतरखेदस्य अतिशयेनतरुणःतरुणतरः तादृशः खेदः श्रमोयस्यतस्य यद्वानानातरुणतरखेदस्ये

त्येकं पदम् नाना अनेकविषयः तरुणतरः खेदोयस्य पुनः कथंभूतस्य स्वहितशनहंतुः स्वस्यैवहितानिपथ्या
नितेषांशतं तस्यहंतानाशकः तस्य अतएवपुनः कथंभूतस्यजडधियः जडाधीर्यस्यतस्य १९ पूर्वेदयाविधेयस्यु
क्तं इदानींकिंविषयिणीदयेत्याकांक्षायांतवजलंममपुनः भवनमेवदूरीकरोतुइतिप्रार्थयते मरुदिति भोमा
तः तेतवजलंममजगन्नाथस्यजननजालंजननस्यजन्मनः जनुर्जननजन्मानीत्यमरः तस्यजालंसमूहः तत्र जालं
समूह अनायइत्यमरः जरयतुनाशयतु जृवयोहानोस्वार्थेणिजंतः जनीजृष्वईतामित्वेमितांन्हस्वइत्युपधा-ह्रस्वः क

ममैवायंमंतुःस्वहितशतहंतुर्जडधियोवियोगस्तेमातर्यदिह करुणालःक्षणमपि १९ मरुल्लीला
लोलल्लहरिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौंकमरुचि

थंभूतंजलं मरुल्लीलालोललहरिलुलितांभोजपटली स्खलत्पांसुव्रातच्छुरणविसरत्कौंकुमरुचि
मरुतः वायोः लीलाविलासः तेनलोलंत्यश्चंचला यालहर्यः वीचयः ताभिः लुलितानिलोलानियानि अंभोजानि
कमलानितेषांपटलीसमूहः तस्याः स्खलंतः पततोयेपांसवः रजांसितेषांव्रातःसमूहः तस्यछुरणंअंगलेपः तेन
विसरंतीप्रसरणशीलाताहृशीकौंकुमरुचिर्दीप्तिर्यस्यतत् कमलरजः पतनेनात्यंतसारक्तमितिभावः पु० सुरस्त्री

वक्षोजक्षरदगरुजंबालजटिलंस्फुराणामिंद्रादिदेवानांस्त्रियः इंद्राण्यादयः तासांवक्षोजाः स्तनाः तेभ्यः क्षरन्
पतन्नयः अगरुजंबालः कृष्णचंदनपंकः वंशकागरुराजार्हेत्यमरः निषद्वरस्तुजंबालः पंकास्त्रीत्यमरः तेनजटि
लंसजटंजटाशब्दात्तुदादित्वादिलच् पुं० जंबालंजंबालः पंकः अस्तियस्मिन्तत् यद्वाजंबालः शैवालं अस्तिय
स्मिन् यद्वा जंबालाः सदन्द्रुमाः धत्तूरवृक्षाइत्यर्थः तेसंत्यस्मिन्ननत् तथाचकोशः जंबालः शैवलेपंकेजगलेमदन

सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलंजलंतेजंबालंममजननजालंजरयतु २० समुत्पत्तिःप
द्मारमणपदपद्मामलनखान्निवासः कंदर्पप्रतिभटजटाजूटभवने

द्रुमइतिपक्षचयेपिजंबालशब्दान्म
त्वर्थीयो अर्शआद्यच् मरुच्छीलालोलल्लुहरीत्यन्नसंहितायांतोर्लीतिलः कौंकुमरुच्योः समासंकृत्वा पश्चाद्विसरं
तीशब्देनसमासेपुंवद्भावः तालव्याअपिदंत्याश्चशंबुसूकरपांसवः इतिद्विरूपकोशात्तालव्यापिपांशुशब्दः २० इदानींसमुत्पत्तिस्था
ननिवासस्थानव्यापारसौष्ठवेनजगदपेक्षयातवउत्कर्षोवर्ततइति आह समुत्पत्तिरिति भोजननि जगतः विश्वस्मा
त्तवोत्कर्षः आधिक्यं कस्माद्धेतो र्नजागर्तुनास्ताम् अपितु सर्वस्माद्धेतोरुत्कर्षोवर्ततइत्यर्थः उत्कर्षप्रतिपादक

हेतूनाह समुत्पत्तिरिति तवसमुत्पत्तिः सम्यगुत्पत्तिः उद्भवः पद्मारमणपदपद्मामलनखात् पद्मायाः लक्ष्म्याः लक्ष्मीः पद्मालयापद्मेत्यमरः रमणः पतिः विष्णुः तस्य पदं चरणकमलं तस्यामलनखः तस्माद्भवतिजनिकर्तुरित्य पादानत्वम् तवनिवासःस्थितिः कंदर्पप्रतिभटजटाजूट भवने कंदर्पस्यानंगस्य कंदर्पोदर्पकोनंगइत्यमरः प्र तिभटः प्रतिपक्षीशिवः तस्यजटाजूटः कपर्दः सएवभवनंगृहं तत्रवर्ततइतिशेषः अथानंतरं तवायंव्यासंगः उ

अथायंव्यासंगोहतपतितनिस्तारणविधौनकस्मादुत्कर्षस्तवजननिजागर्तिजगति २१ नगेभ्यो यांतीनांकथयतटिनीनांकतमयापुराणांसंहर्तुः सुरधुनिकपर्दोधिरुरुहे॥ द्योगः हतपतितनिस्तार

णविधौ हताः शत्रुभिः शस्त्रादिनामारिताः पापश्चिपतिताः तेषांनिस्तारणंउद्धारः तस्याविधिः करणंतत्रवर्ततइतिशे षःविधिर्विधानेदैवेचेत्यमरः २१ इदानींहरशिरसिनिवसंत्याःविष्णुपदोद्भूतायाः तवोपमेयाकापिनदीनास्तीत्या ह नगेभ्यइति भोजननि कविभिः पंडितैः संख्यावान्पंडितः कविरित्यमरः तवतुलालेशः तुलायाःउपमायाः लेशः लवः लवलेशकणाणवइत्यमरः यस्यांदीयेत तादृशीकाचर्वतते अपितुनकापीत्यर्थः नतुकृष्णादयोपव्द्योव

गंगाल
१७

तेनेइतिचेत्तत्राह नगेभ्यइति नगेभ्यः पर्वतेभ्यः नगोप्राणिवन्यनरस्यामिति पाक्षिक प्रतिभान्नत्रोनलोपाभावः यातीनामागच्छंतीनांमध्येयतश्चनिर्धारणमितिषष्ठी कतमयातटिन्याधुराणांनगरणांसंहर्त्तुर्दाहकस्यशिव स्यकपर्दः जटाजूटः अधिरुरुहे अध्यारूढः नगेभ्योयांतीनांतटिनीनांमध्येकयावातटिन्याश्रीभर्तुःविष्णोःपद कमलंचरणपंकजंसलिलैः अक्षालिधौतमितित्वंकथय अर्थात् अस्मान्प्रतिवद एवंच तत्कार्यकारणाभावात्

कयाचश्रीभर्तुःपदकमलमक्षालिसलिलैस्तुलालेशोयस्यांनत्वजननिदीयेतकविभिः२२ विध त्तांनिःशंकंनिरवधिसमाधिंविधिरहोसुखंशेषेशेतांहरिरविरतंनृत्यतुहरः॥

कास्युपमेयानेतिभावः इदमेवमनसिनिधायत्वामहंशरणंगतइत्याकूतं अक्षालीत्यत्रचिण्भावकर्मणोरिति कर्मणिचिण् आदौपूर्वार्द्धं योजयित्वा पश्चादुत्तरार्द्धंयोज्यम् २२ इदानीमेवजननिमनोरथदायिनित्वयिसत्यांब्रह्मादीनांप्रयोजनमेवनास्ती त्याह विधत्तामिति भोजननि जनयतिविश्वमुत्पादयतिइति जननीविश्वमाता तत्संबोधनं जगतिविश्वस्मि न् कामानांमनोरथानांकर्मणिषष्ठी सवित्रीउत्पादयित्रीयदिजननीविश्वमाता त्वंजागर्तिअस्तितर्हिविधिः

टीका

१७

विदधाति विश्वमिति विधिः ब्रह्मा विधात्रो वेधचेति वेधादेशोऽसि प्रत्ययश्च निरवधिसमाधिं निगर्तः अवधि र्यामादिरूपा मर्यादा यस्य तादृशो यः समाधिः चित्तवृत्तिनिरोधस्तं निःशंकं निर्गताशंका यस्मिन् कर्मणि यथा भवति तथा मयि निर्व्यापारे जगदुत्पत्तिः कथं भविष्यतीति शंकारहितमित्यर्थः विधत्तां करोतु हरिः हरति सर्वे षां दुःखमिति हरिः अचइ इरित्यौणादिको इः शेषे सुखं यथा स्यात्तथा शेतां आम् निद्रां करोतु सुखमित्यनेन निद्राभं गजनकः जगद्रक्षणरूपोपाधिः मास्त्विति सूचितम् हरः हरति विश्वमिति हरः पचाद्यच् शिवः अविरतं निरं

कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः सवित्रीकामानां यदि जगति जागर्ति भवति २३

तरं यथा स्यात्तथा नृत्यतु नृत्यं करोतु अविरतमित्यनेन मध्ये कार्यांतरचित्ततया नृत्यविरामो मास्त्विति सूचितं प्रा यश्चित्तैः कृतं स्वहस्तेन शुद्धिकरणाभावात्तानि व्यर्थानीति भावः अथानंतरं तपोदानयजनैः तपांसि कृच्छ्रचां द्रायणादीनि दानानि गजाश्वादीनि यजनानि देवपूजा यागादीनि तैरलम् तैः साध्यं नास्तीति भावः गम्यमानक्रि याप्रतिकारकत्वात् तृतीया अहो इत्याश्चर्ये अनेकेषां कार्यमेकेवत्वं करोषीत्याश्चर्यम् २३ ७ ७

इदानींअनाथइत्यादिविशेषयुक्तोहं स्नेहार्द्रामित्यादिविशेषणयुक्तांत्वांप्राप्तोस्मि अतस्त्वंस्वमहत्त्वयोग्यंकु
र्वित्याह अनाथइति भोगंगे अयमर्भःशिशुःश्यतिदिनेदिनेकृशोभवतीतिशिशुः शावकःशःकिस्तन्वन्त्वंत्या
दिसूत्रेणसाधुः पृथुकः शावकःशिशुरित्यमरः मातरंजननींत्वांप्राप्तोस्मिइहविषयेत्वंसमुचितंसम्यगुचितंयो
ग्यंविदध्याः कुरुशरणागतबालंमांमातृत्वात्त्वंमात्यजेतिभावः कीदृशोहं कीदृशींत्वांअनाथःदीनःस्वाम्यंतराभा

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदांपतन्विश्वोद्धर्त्रींगदविगलितःसिद्धभिषजं

यत्वान्नित्यर्थः स्नेहार्द्रांस्नेहेनप्रीत्याआर्द्रांक्लिन्नां आर्द्रंसार्द्रंक्लिन्नमित्यमर पुनःकीदृशोहं कीदृशींत्वांविग
लितगतिः विगलितानष्टागतिः गमनंयस्यसः यद्वा विगलितापापबाहुल्येननष्टागतिः पुण्यलोकेगतिः ग
मनंयस्यसः पुण्यगतिदांपुण्येषुगतिः तांददातिसातां यद्वापुण्येषुपुण्यलोकेषुगतिदां पु॰ पतन्पतितःवि
श्वोद्धर्त्रींउद्धारकर्त्रींत्रिभुवनविधातुश्चकलहइतिवत् शेषषष्ठ्यासमासः एवंचविश्वांतर्गतस्यममोद्धारंकरि

रिष्यस्येवेतिभावः पु० मदविगलितः गदैः आतंकैः रोगैरित्यर्थः विगलितः विशेषेणगलितः जर्जरितः यक्ष्मांत
कगदाबाधाः शब्दाः पर्यायवाचकाइति सिद्धभिषजंसिद्धौषधदांसिद्धवैद्यरूपामित्यर्थः रोगहार्यगदंकारोभिष
क् वैद्योचिकित्सकइत्यमरः पु० तृष्णाकुलितहृदयः तृष्णयापिपासया आकुलितंव्याप्तंहृदयं यस्यसः सु
धासिंधुंसुधायाअमृतस्यसिंधुंसमुद्रं यद्वासुधायाः सिंधुंदेशंयद्वासुधायाः सिंधुंनदीं तथाचामरः देशेनद
विशेषेब्धौसिंधुर्नासरितिस्त्रियामिति अत्रपरिकरालंकारः साभिप्रायविशेषणानांसत्वात् तदुक्तंकुवलया

सुधासिंधुंतृष्णाकुलितहृदयोमातरमयंशिशुः संप्राप्तस्त्वामहमिहविदध्याःसमुचितम् २४

विलीनोवैवस्वतनगरकोलाहलभरोगतादूतादूरंक्वचिदपिपरेतान्मृगयितुम् नंदे अलंकारः परिकरः

साभिप्रायेविशेषणइति २४ इदानींयदारभ्यतवकथाभूलोकमागतातदारभ्ययमनगरकोलाहलः शांतः तद्दूताअ
पिदूरदेशंगताः विमानसंघश्चदेववीथींविदलयतीत्याह विलीनइति भोजननियदवधियदारभ्यतेतवकल्याणीक
ल्याणकारिकाकथामहीमंडलमगात् इणोगालुङीतिगादेशोगातिस्थेतिसिचोलुक् तदारभ्यवैवस्वतनगरकोला

हलभरः वैवस्वतस्यांतकस्य वैवस्वतोंतकइत्यमरः नगरंपुरंतत्र कोलाहलभरः कलकलसमूहः कोलाहलःकलक
लइत्यमरः विलीनः विशेषेणलीनः गुप्तअभूदितिशेषः विशेषश्चकस्मि न्नपि कालेईषदपिनास्तीति पूर्वं तत्रपापि
गमनेनतेषांताडनात् कोलाहलःस्थितिः इदानींतुत्वत्कथाश्रवणमाहात्म्येनपापाभावात् कस्यापितत्रगमना
भावेनताडनाद्यभावादितिभावः दूताअपिअर्थात् यमसंदेशहारकाअपि स्यात्संदेशहरोदूतइत्यमरः क्वचिद्दे
शेपरेतान् शवान्मृगयितुं अन्वेषितुंदूरंगताः यस्मिन्देशेत्वत्कथाश्रवणंनास्तितत्रगताइत्यर्थः ननुयमनगर

विमानानांव्रातोविदलयतिवीथीर्दिविषदांकथातेकल्याणीयदवधिमहीमंडलमगात् २५

गमनाभावेत्वत्कथाश्रवणिनः केगच्छंतीतिचेत्तत्राह विमानानांविशिष्टंआनयंति येते विगतंमानंवायेषांतेवि
मानाः व्योमयानानि व्योमयानंविमानोस्त्रीत्यमरः तेषांव्रातोनिकरः स्तोमौघनिकरव्रातेत्यमरः दिविषदांदिविसी
दंतितेदिविषदोदेवाः तेषांशाड्वलविशरणगत्यवसादनेष्विति धातोःसत्सूद्विषेतिक्विप् ह्रद्युभ्यांचेतिङेरलुक् सु
षामादित्वात् षत्वं वीथीः मार्गान् देवगमनमार्गानित्यर्थः विदलयति विशेषेणदलयति विदारयति त्वत्कथाश्र

णमाहात्म्येनसर्वेषांविमानैर्गमनात् वारंवारंविमानसंबंधात् खनितानिव करोतीत्यर्थः २५ इदानींतवजल
कणाः कामक्रोधज नितज्वरदग्धशरीरिणामस्माकंसंतापशमनंकुर्वीत्विति प्रार्थयते स्फुरदिति दिव्यसरितः दि
विआकाशेभवादिव्या भवार्थेदिगादित्वाद्यत् स चासौसरिच्चतस्याःगंगायाःमरुदुल्लासलहरिच्छटाश्चंचत्पाथः
कणासरणयः मरुतः वायोरुल्लासः संबंधः गमनंवा लसंसश्लेषणगमनयोरितिधातोर्भावेघञ् तेनयाल्लहर्यः

स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांनः प्रतिदिनं हरंतांसंता
पंकमपिमरुदुल्लासलहरीछटाश्चंचत्पाथःकणसरणयोदिव्यसरितः २६

तासांयाश्छटाःपरंपराः ना
भिश्चंच त् उद्धत् यत्पाथः उदकं कबंधमुदकं पाथः इत्यमरः तस्यकणाःतुषाराः तेषांसरणयः पंक्तयःनः
अस्माकंकमपि औषधादिभिरसाध्यतया अपहर्तुमशक्यमपिसंतापंहरंतांनाशयंतु कथंभूतानांनः प्रतिदिनंदि
नेदिने इतिप्रतिदिनमव्ययंविभक्तीतिसूत्रेयोग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानीतिचत्वारोयथाशब्दार्थाः त
त्रवीप्सायांअव्ययीभावःस्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांकामोभिलाषःकामःपंच

शरः स्मृतइत्यमरः क्रोध अमर्षः कोपक्रोधामर्षरोषइत्यमरः स्फुरंतौदेदीप्यमानौचतौकामक्रोधौचताभ्यांप्रबलत
रमतिशयितंसंजातःउत्पन्नः अतएवजटिलः शिरसावान् एतादृशोयोज्वरः तस्यज्वालाः अर्चयः तासांजालंसमूहः
तेनज्वलितंदग्धंतादृशंवपुः शरीरंयेषांतेषाम् २६ पूर्वंजलकणाः संतापंहरंतामित्युक्तम् इदानींतापबाहुल्यात्कणा
नांकथंतत्संभवतीतिचेत् नवजलानांसंघातः अस्माकंतापशमनंकरोत्विति प्रार्थयते इदमिति भोजननि श्री

इदंहिब्रह्मांडंसकलभुवनाभोगभवनंतरंगैर्यस्यांतर्लुठतिपरितस्तिंदुकमिव सएषश्रीकंठप्रवितत
जराजूटजटिलोजलानांसंघातस्तवजननितापंहरतुनः २७

कंठप्रविततजटाजूटजटिलः प्रविततः विस्तृतः
सचासौजटाजूटश्च श्रीकंठस्य प्रविततजटाजूटः तेनजटिलः सजटः एतादृशः सएषः नवजलानांसंघातः समुदायः
नः अस्माकंतापंहरतु सकः यस्यजलानांसंघातस्यांतर्मध्ये सकलभुवनाभोगभवनम् सकलभुवनानांचतुर्दशभुव
नानां आसमंतात् भोगः सुखं भोगः सुखेस्त्र्यादिभृतावित्यमरः यद्वा सकलभुवनानांआभोगः परिपूर्णता आ
भोगः परिपूर्णतेत्यमरः तस्यभवनंगृहम् एतादृशमिदंब्रह्मांडंतरंगैःसह सहयुक्तेप्रधानेइतिसूत्रेण तृतीया प

४१२

रिनस्तिंदुकमिव तिंदुकस्यफलंतिंदुकम् तिंदुकः स्फूर्जकमित्यमरः तेंबुणीतिभाषायांप्रसिद्धिः लुठति लुठसंश्ले
षणे तुदादिः हीति आश्चर्ये यस्मिंश्चतुर्दशभुवनाधारब्रह्मांडमपिस्थितंसोपिशिवकपर्देस्थितइत्याश्चर्यम् अ
त्रोत्तरोत्तरमुत्कर्षस्यसत्वात् सारालंकारः तदुक्तं अप्पय्यदीक्षितैः कुवलयानंदे उत्तरोत्तरमुत्कर्षः सारइत्य
भिधीयतइति २७ इदानींननुरे तीर्थांतराणिशिवादिदेवांश्चविहायमामेवकिंस्तौषीतिचेत्तीर्थानिमदुद्धरण
विधौ लज्जंते शिवादयश्चकर्णेहस्तंस्थापयंति त्वंतुमातृत्वेनदययामांपुनानातेषांपापनाशनाभिमानंनाश

त्रपंतेतीर्थानित्वरितमिहयस्योद्धृतिविधौकरंकर्णेकुर्वंत्यपिकिलकपालिप्रभृतयः॥

यसीत्याह त्रपंतइति भोअनुकंपार्द्रहृदये अंब अनुकंपादयातया आर्द्रंहृदयंयस्याःसातत्संबोधनं एतादृ
शि अंबजननि अंबत्वेनत्यागानर्हता तं इमंतवसमीपेवर्त्तमानंमांजगन्नाथंपुनानापुनातितच्छीला ताच्छील्येशा
नच् पवित्रीकुर्वाणाइयंत्वंतेषांतीर्थादीनां अघमथनदर्पं अघस्यपापस्यमथनंनाशनंतस्यदर्पःगर्वःतंदलयसि
विदारयसिनाशयसीत्यर्थः एतावत्कालपर्यंतंतेषांपरमगर्वःस्थितः वयंसर्वेषांपापनाशनं कुर्मः इदानींतुममप

रमपातकिनः तद्धस्तेन उद्धारणाभावात् त्वयाउद्धारणास्य कृतत्वात् तेषांगर्वोगत इतिभावः ननुतेषांहस्तेन कि मित्युद्धरणंनभवतीतिचेत्तत्राह तंकम् इहयस्य उद्धृतिविधौउद्धृतेःविधिः करणं तत्र विधिर्विधानेदैवे चेत्यमरः ती र्थानिगोदावर्यादीनि त्वरितंयथास्यात्तथामहापातकिनो ममदर्शनसमयएवेतिभावः त्रपंते लज्जितानिभवंति स्वह स्तेन महापातकिनोममोद्धारणाभावाल्लज्जेतिभावः पुनस्तंकम् यस्योद्धारणविधौकपालिप्रभृतयोपि कपालीप्रभृतिः

इमंतंमामंवत्समियमनुकंपार्द्रहृदये
पुनानासर्वेषामघमथनदर्पंदलयसि २८

आदिर्येषांतेविष्ण्वादयोपिकर्णेहस्तंकुर्वंतिस्थापयंतीत्यर्थः स्वहस्तेनएतस्योद्धृत्यभावात् एतस्यकिमपिनश्रोत व्यमित्याशयेन कर्णेहस्तन्यासइतिभावः करंकर्णेइत्येकवचनंतुद्वितीयकर्णेनश्रोतव्यम् यदिस्वहस्तेन एतदी यंकार्यंभविष्यतिचेत्करिष्यामः नोचेन्नेत्येतदर्थबोधनाय २८

414

इदानीं अपरिमित संशयेन पापाचरणेनिवृत्तेश्चांडालानांसमूहैरपित्यक्तानांपापानामाकरैः पुनातुंयत्नंकुर्वं त्यास्तवस्तुनिंकर्तुं नरपशुरहं कथंशक्नुयामित्यहंकारपरिहरणव्याजेनाह श्वपाकानामिति भोजननि मामुद्द र्तुंपरिकरं कटिबंधंविवेकमारंभं यत्नंवा मगाढगात्रेक बंधेविवेकारंभयोरितिविश्वः यत्नारंभोपरिकरावित्ति त्रिकांडशेषः घटयंत्याः कुर्वत्यास्तवश्लाघांस्तुतिंकर्तुंनरपशुरिवेति व्याघ्रादित्वात्समासः सर्वानविशे षेणपश्यतीतिपशुः हिताहितज्ञानशून्यः मूर्खइतियावत् एतादृशोहंकथमिवकेनाधिप्रकारेणसमर्थः

श्वपाकानांव्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकंकिलसदनमेनःपरिषदां ॥

अपितुनकथमपीत्यर्थः मन्मतिमांद्यात्तवगुणानामपारत्वाच्चेतिभावः अहोइत्याश्चर्ये परमपातकिनंमां पुनातुंयत्नादिकंकरोषीत्याश्चर्यम् कथंभूतंमाम् अमितविचिकित्साविचलितैः अमिता अपरिमिता बह्वी त्यर्थः साचासौविचिकित्साचइतः परंपातकानिकर्तव्यानिवानवेत्याकारःसंशयः विचिकित्सातुसंशय इत्यमरः यद्वा विचिकित्साजुगुप्साख्योबीभत्सरसस्थायीभावः कितसंशयइति धातोर्गुप्तिज् किद्भ्य

इति सनिसन्यङोरितिद्वित्वेगुरोश्चहलः इत्यप्रत्ययेटाप् अभितोविचिकित्सायाश्चलितैः पातकान्विह्नैः एता
दृशैः श्वपाकानांश्वानंपचंतितेश्वपाकाः चांडालाः यद्यपिपचादिगुणेश्वपचेतिअजंतोनिपातितम् तथापि
न्यङ्कादिगणेश्वपाकशब्दस्यपाठात् पक्षेकर्मण्यणिकुत्वम् निषादश्वपचावंते वासिचांडालपुल्कसाइत्यम
रः तेषांव्रातैः समूहैः नवैकेनद्वाभ्यांवाविमुक्तानांविशेषेणमुक्तानांविशेषश्चमनः पूर्वकत्यक्तानांनतुलोकलु

अहोमामुद्धर्तुंजननिघटयंत्याः परिकरं नयश्लाघांकर्तुंकथमिवसमर्थोनरपशुः २९ नकोप्यत्रा
यंतरवलुसमयमारभ्यमिलितोयदुद्धारादाराद्भवतिजगतोविस्मयभरः॥

ज्जयेति एतादृशीनामेनःप
रिषदांएनसांपापानांपरिषदः सभाः समूहाइत्यर्थः तासामेकं अद्वितीयंसदनंगृहंकिलनिश्चयेनप्रसिद्धौवा
आश्चर्येवा एतादृशमपिपापिनंमांपुनातुंउद्धर्तुंकासीत्याश्चर्यम् २९ इदानींकस्यचिन्महापातकिनः समुद्धरणेनज
गतः आश्चर्यसंपादनीयमिति तवमहतीच्छास्थितासाएतावत्कालपर्यंतंतादृशस्यकस्यचित्पातकिनः अभावा
न्नैवपूर्णा अहंतुतादृशेच्छांसफलीकर्तुंप्राप्तोस्मि अतः ममोद्धरणेनस्वेच्छासाफल्यंकुर्विति प्रार्थयते नेतिभो

416

अंबएतावंतंसमयमारभ्यएतावत्कालपर्यंतंकोपिकश्चनपातकीनमिलितः नमासःमयेतिशेषः आरात् यदु
दूरात् यस्योद्वारस्तस्मात् जगतःविस्मयपरः भवतीति तेमनसिचिरकालं बहुकालंस्थितवतींतिष्ठतीति
स्थितवती तामिमांपूर्वोक्तामीहामिच्छांसफलयितुं असफला सफलाभवतितथाकर्तुम् भृशादित्वात्
क्यङ्मानिनोश्चेतिपुंस्त्वम् तुमुन् अयमहंजगन्नाथः संप्राप्तः अस्मीतिशेषः नः अस्मान्प्रणयपापंनिर

इतीमामीहांतेमनसिचिरकालंस्थितवतीमयंसंप्राप्तोहंसफलयितुमंबप्रणायनः ३० श्ववृत्ति
व्यासंगोनियतमथमिथ्याप्रलपनंकुतर्केष्वभ्यासःसततपरपैशून्यमननम्॥ स्योत्तमांगतिंनयेत्यर्थः

उपसर्गादसमासेपीतिणत्वम् अंबेत्यनेनतवजननित्वंचेदहंतवपुत्रः एवंचमातुरिच्छासत्पुत्रेणमयासफली
कर्तव्येतिसत्पुत्रधर्मएवायमितिसूचितम् ३० इदानींममानेकदुष्टगुणान्श्रुत्वात्वांविनाअन्यः कश्चनममसु
खनिरीक्षणमपिनकुर्यादित्याह श्ववृत्तीति भोमातः श्ववृत्तिव्यासंगः शुनःवृत्तिः इतस्ततोभ्रमणंउच्छि
ष्टभक्षणाचरणादितद्व्यासंगःउद्योगः मयाकृतइतिशेषः अथानंतरंनियतंनियमेनमिथ्याप्रलपनंअस

स्यानर्थकमपिभाषणंकृतं मलापोनर्थकंवचइत्यमरः परमपुण्यशीलेनयुधिष्ठिरेणसकृन्मिथ्योक्तमितितज्ज
न्यपापवशादंतरिक्षगस्तद्रथः भूमौलग्नइतिस्पष्टं महाभारते मयातुसत्यत्यागपूर्वकंसर्वदैवतत्कृतमितिमत्पाप
संख्यैवनेति आकृतम् कृतर्केषुकुत्सितानांपरस्त्रीगमनपरगृहहारादिरूपकर्मणांतर्काः ऊहाः तेषुयद्वाकुत्सि
ताश्चतेतर्काश्चतेषुयद्वा साक्षाद्ब्रह्मविद्यायाअप्रतिपादकत्वे नपरजयेच्छयाच कुत्सितास्तर्काः तर्कशास्त्र
ग्रंथाः तेषुअभ्यासोपिकृतः सततपरपैशून्यमननमपिकृतंपिशुनस्यसूचकस्यभावः पैशून्यंहेजिह्मपरेषांपै

अपिभावंभावंसमतुपुनरेवंगुणगणान्हृतेत्वत्कोनामक्षणमपिनिरीक्षेतवदनम् ३१

शून्यंतस्यमननंचिंतनम् अभ्यासमितियावत् सततंनिरंतरंचतत्पैशून्यमननंचतदपिकृतं एवंप्रकारेणमम
तुपुनर्गुणगणान् भावंभावंकृत्वाकृत्वात्वद्दृतेत्वांविना अन्यारादितिसूत्रेणकृतेयोगेत्वदितिपंचमी कोना
मक्षणमपिवदनं अर्थात् ममसुखंनिरीक्षेतपश्येत् अपितुनकोपीत्यर्थः तवतुमातृत्वेनदयावाहुल्यादीदृश
स्यममसुखनिरीक्षणमावश्यकमेवेतिभावः तदुक्तंश्रीमच्छंकराचार्यैः कुपुत्रोजायेतक्वचिदपिकुमातानभवती
ति ३१

इदानीं यस्य मनुष्यस्य नेत्राभ्यां परमरमणीयं तव शरीरं न दृष्टं यस्य कर्णाभ्यां तव लहरीकोलाहलश्च न श्रुतः तस्य नेत्रे व्यर्थे कर्णौ च व्यर्थावित्याह विशालाभ्यामिति अत्र यस्य तस्येत्यध्याहारः भोजननि यस्य मनुजस्य मानवस्य मनुजामानवा नराइत्यमरः याभ्यां नेत्राभ्यां परमरमणीया अतिसुंदरी अनेन दर्शने कारणं सूचितं एतादृशी तव तनुः शरीरं न आलीढा न सादरमवलोकिता तस्य मनुजस्य विशालाभ्यां आकर्णविस्तृताभ्यां आभ्यां नयनाभ्यां कृत्वा

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया तव तनुः अयं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ३२

इह भूलोके किं फलं न किमपीत्यर्थः यद्वा इह नालीढेति योजना यस्य ययोः श्रवणयोः कर्णयोरंतर्मध्ये तव लहरिलीलाकलकलः लहरीणां लीलाक्रीडा तया कलकलः कोलाहलः कोलाहलः कलकल इत्यमरः इह न यातः न प्राप्तः तस्य तयोः श्रवणयोः अयं श्रवणरूपः न्यक्कारः धिक्कारः अस्ति विशेषः खलु निश्चयेन यद्वा ययोः श्रवणयोः अंतर्मध्ये तव लहरिलीलाकलकलः न यातः ताभ्यां श्रवणाभ्यां कृत्वा किं फलम् न किमपीत्यर्थः परंतु अयं अदर्शनाश्र

यथारूपन्यक्कारोमनुजस्यनत्विंद्रियाणाम् इंद्रियव्यापारस्यमनुष्यव्यापाराधीनत्वादितिभावः तदुक्तम् कर
णंहिकर्तृकमिति एनत्पक्षेयस्यतस्येतिनाध्याहारः नाभ्यामित्यस्यचाध्याहारः अहंतुसर्वदैवनवतत्त्वं
पश्यामि लहरीशब्दंचशृणोमि अतोममनेत्रकर्णनव्यर्थमित्याकूतम् एवंचशीघ्रंमांपुनीहीति भावः अत्र
विनोक्तिध्वनिरलंकारः त्वद्दर्शनंविनानयनयोः त्वल्लहरीकोलाहलश्रवणंविनाश्रवणयोश्चरमणीयत्वस्यफ
लम्भ्रधिक्काराभ्यांव्यंजनात् ३२ इदानींपुण्यवंतोविमानैः सुरपुरंस्वच्छंदंयांतिपापिनरकपराधीनाः संतो

विमानैःस्वच्छंदंसुरपुरमयंतेसुकृतिनःपतंतिद्राक्पापाजननिनरकांतःपरवशाः॥

नरकमध्येपतंतीतिकोटिद्वयंयत्रदेशेत्वंनासितत्रसंभवति यत्रतुनिखिलपापनाशिनीत्वमसि तत्रद्वितीय
कोटेरभावात् आद्यकोटिरेवसंभवतीत्याह विमानैरिति भोजननिसुकृतिनःपुण्यवंतः विमानैः सुरपुरं सुरा
णांदेवानांपूर्नगरीताम् यद्वा सुराणांपुरंनगरंस्वर्गं स्वच्छंदं यथास्यात्तथानतुतद्गुणादिवशेन अयंतेगच्छंति
पापाःपापरूपाःजीवाः पापबाहुल्येनपापपुरुषयोरस्त्रिसुनिव्याकरणमितिवदभेदः यद्वापापमस्तियेषांतेपापाः

इतिमत्वर्थे अर्शआद्यच् अतएवपापोहं पापकर्माहमित्यादिप्रयोगाः संगच्छंतइतिदिक् पापमर्हंतीतिवापर वशाः संतः यमनगरगणाधीनाः संतइत्यर्थः नरकांतः नरकस्यांतर्मध्येद्राक्शीघ्रंयमनगरगमनसमयएवेत्यर्थः पतंति भोमातः अयंविभागः विषयव्यवस्थातस्मिन्नशुभमयमूर्तौ अशुभमयी अकल्याणप्रचुरामूर्तिः तनु र्यस्यतस्मिन् स्त्रियाःपुंवदितिपुंवद्भावः देशस्याशुभमयत्वंतत्रत्तवस्थितेरभावादेव एतादृशेजनपदेदेशेनी वृज्जनपदोदेशइत्यमरः अस्त्विति शेषः तस्मिन्नशुभमयमूर्तौ जनपदे अयंविभागइति योजना तस्मिन्क

विभागोयंतस्मिन्नशुभमयमूर्तौजनपदेनयत्रत्वंलीलादलितमनुजाशेषकलुषा ३२

स्मिन् यत्रजनपदे दलितमनुजाशेषकलुषा मनुजानांमनुष्याणां अशेषकलुषंसमस्तपापं दलितंनाशितं मनुजा शेषकलुषं ययासा एतादृशीत्वंनासि यत्रत्वंदलितमनुजाशेषकलुषासतीनासीतिवायोजना एवंनार्थादेता दृशीत्वंयत्रासि तत्रकस्यापियातकिनअभावात्सर्वेपिविमानैः सुरपुरंगच्छंतीति आद्यकोटिरेवास्थितेतिभावः अत्रपरिकरालंकारः दलितमनुजाशेषकलुषेतिसाभिप्रायविशेषणस्यसत्वात् तल्लक्षणंतुपूर्वमुक्तम् ३२

421

इदानींसमस्तमहापातकिनोपिमरणसमये त्वयिशरीरं त्यक्तवंतः संतः उत्तमलोकं गच्छंतीत्याह अपीति अ
मयंतेइत्यध्याहारः पूर्वश्लोकात्पापाइत्यनुवर्तते तथाचैवंयोजना भोअंब तेपापाःपापिनःपुरुषाः अंतेमरणस
मये त्वयि ननुंशरीरं विहायसंत्यज्य अतनुदानाध्वरजुषाम् ननतनु अल्पमित्यतनु महत् तच्चतद्दानंच तेनयेध्वराः
सर्वस्वदक्षिणायज्ञाः यज्ञः सवो ऽध्वरोयागइत्यमरः यद्वा अतनूनिमहांतिदानानियेषुतेचतेअध्वराश्च यद्वा
अतनुदानानिचाध्वराश्च यद्वानतनुः कोपः तेनयानिदानानि अध्वराश्च ननुः कोपेत्वचिस्त्रीस्यात्रिष्वल्पेविरले

अपिघ्नंतोविप्रानविरतमुशंतोगुरुसतीः पिबंतोमैरेयंपुनरपिहरंतश्चकनकम् ॥

कृशइतिमेदिनी तान्जुषंतिसेवंतेकुर्वंतीत्यर्थः तेअतनुदानाध्वरजुषः तेषांउपरिउपरिलोके क्रीडंतिविहरं
ति महादानयागप्राप्यलोकोपरितनलोकं गच्छंतीत्यर्थः तथाच गंगातनुत्यागादेवोत्तमलोकप्राप्तेःपरमो
त्कृष्टसाध्यमहादानयागेषुनकिंचिदधिकंफलमितिभावः तेकेयेपापाः विप्रानपिब्राह्मणानपि अविरतंनि
रंतरं यथास्यात्तथा इदंसर्वक्रियान्वयि घ्नंतितेघ्नंतः हनधातोः शतरिगमहनेत्युपधालोपः नलोपेतिषष्ठीनि

षेधाद्दिमानित्यादिद्वितीया पुनः तेके ये गुरुसतीः गृणातिबोधकंकरोतिगुरुः कृग्रोरुच्चेत्युणादिसूत्रे
णगृशब्दे इत्यस्मात् कुप्रत्ययःउकारश्चांतादेशः तथाचोपनयनादर्वाचीनसंस्कारपूर्वकंवेदाध्यापकोमंत्रो
पदेशश्चगुरुः स्यान्निषेकादिकृद्गुरुरित्यमरः तस्यसत्यःपतिव्रताःस्त्रियः सतीसाध्वीपतिव्रतेत्यमरः ताःउ
शंतः वशंति इच्छंतितेउशंतः वशकांतौअदादिः तत्रहिकांतिरिच्छेत्युक्तम् तस्माच्छतरिग्रहिज्येतिसंप्र
सारणम् यद्वा गुरोःपितुःसतीःमातृरित्यर्थः यद्वागुरोःश्रेष्ठपितृव्यभ्रातृमातृमातुलादेःसतीः यद्वागुरोःब्रह

विहायत्वय्यंतेतनुमतनुदानाध्वरजुषास्पर्यंबक्रीडंत्यखिलसुरसंभावितपदाः३४

स्पतेःसतीः तस्यएकस्त्रीत्वेपिजात्यभिप्रायेणबहुवचनमिति यथाकथंचिद्योज्यम् तथाचानेकार्थकोशः गुरुः
पितागुरुःश्रेष्ठोगुरुः स्मरपुरोहितः दुर्वहोपिगुरुःप्रोक्तोगुरुःशिष्याभिसेचकइति पु॰ येमैरेयंसीधुम् मैरेयमास
वःसीधुरित्यमरः पिबंतःपानंकुर्वंतः पु॰ तेकेयेकनकंस्मबर्णस्मवर्णंकनकमित्यमरः हरंतःचोरयंतः कथंभूताःतेअ
खिलस्मरसंभावितपदाःअखिलसुरैःसमस्तदेवैःसंभावितंसंभावनायुक्तंस्मृतंपूजितमितियावत्तादृशंपदंचरणं

येषांते बहुवचनांतेन समासः यद्वा अखिलस्मराणां संभावितं प्रासं तादृशं पदं स्थानं यैस्ते स समी विशेषेण इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिर्वा कर्तव्यः संपूर्वकभू धातोर्णिजंतात्क्तः उपसर्गबलादुक्तार्थलाभः ३४ इदानीं महान् चोरः पुनरपि नराणां प्राणहारकोपि वायुः खलु हरिसंबंधमाहात्म्येन त्रिभुवनं पवित्रीकरोतीत्याह अलभ्यमिति भो अंब सोपि परचौर्यपरप्राणापहारित्वादिगुणयुक्तोपि पवमानः प्रभंजनः पवमानः प्रभंजन इत्यमरः त्वदीयानां तव इमाः त्वदीयाः युष्मदस्मदोरन्यतरस्यां खञ्चेति चाच्छः प्रत्ययोत्तरपदयोश्चेति त्वादेशः तासां लीला

अलभ्यं सौरभ्यं हरति सततं यः सुमनसां क्षणादेव प्राणानपि विरहशस्त्रक्षतभृतां

चलितलहरीणां लीलया चलिताः चंचलाः गच्छंतो वा चल गतावित्यस्मात् गत्यर्थाकर्मकेत्यनेन कर्तरि क्तः एतादृश्यो याः लहर्यः तासां व्यतिकरात् संबंधात् त्रिभुवनं जगत्त्रयं पुनीते पवित्रीकरोति अहह इत्यद्भुते अहह इत्यद्भुते खेद इत्यमरः ननु देवोपि वायुः कथं चौर्यादिगुणयुक्त इत्याकांक्षायामाह सकः यः पवमानः सुमनसां पुष्पाणां स्त्रियः सुमनसः पुष्पमित्यमरः अलभ्यमन्यत्र चोरैरप्राप्यम् अनेन चौर्ये वायोः कौशल्यमावेदितम् एतादृशं

सौरभ्यंसौगंध्यंनियतंयथातथा हरतिचोरयति पुनःसकः यःविरहशरस्यक्षतभृतांविरहएवरूत्यादिवियोगएवश
स्त्रंमारकत्वात् यद्वा विरहश्चशरस्त्रंचविरहशरस्त्रे ताभ्यांयत्क्षतंतत् बिभ्रतितेविरहशरस्त्रक्षतभृतः तेषां
कचित्तुविरहशरस्त्रक्षतत्त्वदामितिपाठः तत्रविरहशरस्त्राभ्यांक्षतंक्षतयुक्तंकृतम् विदारितमितियावत् ताह
शंहृत् येषामितिसमासः यद्वा विरहशरस्त्रयोःक्षतंयस्मिन्नितिव्यधिकरणपदोबहुव्रीहिः ताद्दशंहृत् येषाम्
विरहशरस्त्रक्षतयुक्तंहृत्येषामितिशाकपार्थिवादित्वान्मध्यमपदलोपिसमासोवा तेषांप्राणानपि असू

त्वदीयानांलीलाचलितलहरीणांव्यतिकरात्पुनीतेसोपिक्ष्मांमहहपवमानस्त्रिभुवनं २५.

नपि पुंसिभूम्न्यसवः प्राणाइत्यमरः क्षणादेवक्षणमात्रेणैवनियतंयथास्यात्तथाहरति एताहशःदुष्टोवायुःश्रे
ष्ठः त्वल्लहरिसंबंधमहात्म्येनमहत्कार्यंकरोतीतिभावः उक्तंचहनूम न्नाटके येमज्जंतिनिमज्जयंतिचपरांस्तेप्र
स्तरादुस्तरेवार्द्धौवीरतरंतिवानरभटान्संतारयंतेपिच नैतेग्रावगुणानवारिधिगुणानोवानराणांगुणाःश्रीम
द्दाशरथेःप्रतापमहिमासोयंसमुज्जृंभतइति लोकेपिदुष्टःप्रभुर्भृत्यत्वसंबंधमाहात्म्येनमहत्कार्यंकरोतीतिप्रसि

४२९

इमेव ३५ इदानींकेचनलोकाः परकार्यसंपादकाः संतिकेचनपवित्रात्मानः संतः परलोकप्रणयिनोभवंति अ
हंतु त्वयिस्थापितलोकहृद्यभरः सन्स्फुरत्वेननिद्रांकरोमीत्याह कियंतइति भोमातः कियंतः कतिसंख्याकाः
एकेसाधारणालोकाः इहजगतिनियतंलोकार्थघटकाः लोकानांजनानांअर्थाः प्रयोजनानि अर्थरैविभवा
अपीत्यमरः तेषांघटकाःसंयोजकाःसंति यद्वा इहकियंतःएके लोकार्थघटकाःसंतः परलोकप्रणयिनःपर
लोकंप्रणायंति प्रार्थयंतितेते यद्वा परलोकंप्रकर्षेणनयंतिगच्छंति तेपरलोकप्रणयिनः संतीतियोजना इहलो

कियंतःसंत्येकेनियतमिहलोकार्थघटकाः परेपूतात्मानः कतिचपरलोकप्रणयिनः

केपरकार्यसंपादनजन्यपुण्येनस्वर्गलोकंगच्छंति एवंचतेषामयंलोकः परलोकश्चसमीचीनइत्याकूतम् परेचा
न्येचकति यद्वा कतिपरेचपूतात्मानः संतःपूतः तपःसेवनादिनापवित्रः आत्मायेषांतेएतादृशाःसंतः नियतं
परलोकप्रणयिनः संति भोमातः अयंजगन्नाथस्तुपुनः शब्दस्वर्धःतवकृपातः धंचम्यंतात्तसिल्प्रत्ययाहेतोः
शश्वन्निरंतरंस्फुरत्वंयथास्यात्तथाशेतेनिद्रांकरोति शश्वदित्यनेनकदापिअन्यन्नकरोति स्फुरत्वमित्यनेन त

426

नैवममस्करवंनान्यत्रेतिसूचितम् ननुएवंच लोकद्वयेतवकागतिरितिचेत्तत्राह कथंभूतोयं त्वयिनिहितलोकद्वयभरः
त्वयिभवत्यांलोकद्वयेइहलोके परलोकेचभरः सर्वेभ्योउत्कृष्टतानिहितः स्थापितः लोकद्वयभरोयेनसः भरःउद
रपोषणंवाडुभृञ्धारणपोषणयोरित्यस्मादचीतिदिक् ३६ इदानींननुरेपापनिवृत्तयेमांस्तौषितत्रादोपायमेव
किमर्थंकरोषीतिचेत्त्वयास्वपतितात्श्लीलशववशकलसमुदायपरित्राणं यथाक्रियते तथामयापिपापंक्रियतेस्व
स्वभावस्यसर्वैरपिदुष्परिहारित्वादित्याह भवत्याहीति भोअंब व्रात्याधमपतितयाव्रात्याश्च अधमाश्चव्रात्याध

सुरवंशेतेमानस्तवरवलुकृपातः पुनरयंजगन्नाथःशश्वत्त्वयिनिहितलोकद्वयभरः ३६ भवत्या
हिव्रात्याधमपतितयारवंडपरिषत्परित्राणःस्नेहःश्लथयितुमशक्यःरवलुयथा॥ माः व्रात्याःसंस्का
रहीनाः अधमानीचाःतेपतिताःयस्यांसातया आहिताग्न्यादित्वात्पतितशब्दस्यपरनिपातः यद्यपिपतेःसनितनिपति
इत्यस्यवेट्कत्वात् निष्ठायांयस्यविभाषेतिइण्निषेधः प्राप्नोति तथा द्वितीयाश्रितातीतपतितेतिनिपातनाद्भवति
एतादृश्याभवत्यात्वयारवंडपरिषत् परित्राणस्नेहः रवंडानामर्थात् स्वपतितशववशकलानांभिन्नशकलरवंडेवाङुस्य

द्वेर्दैसमेंशक इत्यमरः परिषत् समुदायः तस्याः परित्राणं पालनं तत्र स्नेहः प्रेम प्रेमा नाधियता हार्दं प्रेम स्नेह इत्यमरः
श्लथयितुं त्यक्तुं यथाशक्यः खलु निश्चयेन एवं दुरितनिवहे दुरितस्य पापस्य निवहः समूहः तत्र ममापि प्रेमाधियता अ-
स्तीति शेषः यतो यस्मात् कारणात् जगति सर्वैरपि अयं स्वभावो निसर्गः स्वरूपं च स्वभावश्च निसर्गश्चेत्यमरः दुष्परि
हरः दुःखेनापि परिहर्तुमशक्यः अस्तीति शेषः दुःखशब्देऽपपदे हरतेः ई षद्दुःखितसूत्रेण खलु यद्वा दुरितनिवहे जग
तीति योजना आत्माधमपतित येत्यनेन तेषामपि रक्षणे किं वक्तव्यं पुण्यवतामित्यावेदितम् खंडमित्यनेन अवयव

ममाप्येवं प्रेमा दुरितनिवहे ऽंब जगति स्वभावोयं सर्वैरपि खलु यतो दुष्परिहरः ३७

स्य पालने किं वक्तव्यम् अवयविनः इत्याशयः परिषदित्यनेन नैकमपि न त्यजत इति भावः दुरितनिवहे त्यनेन बहुषु पातके
षु मम मेच्छानत्वेकस्मिन् द्वयोर्वेत्यावेदितम् अत्र निंदया स्तुत्यभिव्यक्तेर्व्याजस्तुत्यलंकारः तदुक्तं कुवलयानंदे उक्ति
र्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोरिति मम यथा विवेकलेशोपि न ते रामचंद्रचरणे रिपून् हतान् खनाशकान् शी
घ्रं पापिनो नयसे दिवमिति अत्रारीन् दिवं नयसे इत्युक्त्या भक्तान् अवश्यं नयसे इति स्तुत्याभिव्यक्तिः ३७ ६७

इदानीं गंगाताण्डवविधिं वर्णयन् स्वतापशमनं प्रार्थयते प्रदोषेति त्रिदशतटिनीताण्डवविधिः त्रिदशानां देवानां तटिनी
गंगा तस्याः ताण्डवम् तण्डुना तच्छास्त्रप्रवर्तकाचार्येण प्रोक्तं ताण्डवं नाट्यं तेन प्रोक्तमित्यणि ओर्गुण इति गुणः ताण्डवं
नटनं नाट्यमित्यमरः तस्य विधिः करणं विधिर्विधाने दैवे चेत्यमरः तापं अर्थाद्भक्तजनसंतापं यद्वा पूर्वश्लोकान्मम
त्यनुवर्तते तथाच मम तापं तिरोधत्तां अंतर्धानं गमयतु नाशयत्वित्यर्थः ताण्डवसामग्रीमाह कथंभूतस्त्रिदशत
टिनीताण्डवविधिः प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः प्रदोषस्य सूर्या

प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः बिलक्रोडक्री
डज्जलडमरुटंकारसुभगास्तिरोधत्तां तापं त्रिदशतटिनीताण्डवविधिः ३८

स्तानंतरं षट्घटिकात्मककाल
स्यांतर्मध्ये नृत्यं कुर्वन् स चासौ पुरमथनश्च शिवश्च तेन लीलया उद्धृताः उत् ऊर्ध्वं धृताः इयं नृत्यचेष्टा एता दृश्यः याः
जटाः संयताः केशाः जटा स्यात्संयतालका इति कोशः तटे आभोगः पतनात्मकः संयोगसंबंधः नृत्यत्पुरमथनली-
लोद्धृतजटानां तटाभोगः तेन प्रेंखंत्यः गच्छंत्यः चंचला वा या लहर्यः वीच्यः ता एव भुजाः संतानं च विधुतिश्च संतानवि

धुतीसंतानांदीर्घीकरणंविधुतिःकंपः भुजान्तः संतानविधुतीयस्मिन्सप्रदोषांतः इदंसमस्तंव्यस्तंवाउक्तप्रदोषलक्ष
णेप्रमाणंतु त्रिमुहूर्तंप्रदोषःस्यात् भानावस्तंगतेसतीति हेमाद्र्याधृकदाद्दृतंवचनंबोध्यमितिदिक् संतानेत्यत्रसंपूर्वक
धुञ् कंपनेइत्यस्माद् स्त्रियांक्तिन् पुनः कथंभूतःत्रिदशतटिनीतांडवविधिः बिलक्रोडक्रीडज्जलडमरुटंकारस्फुभगः
बिलस्यविवरस्यक्रोडंअर्थात्मध्यः नना क्रोडंभुजांतरमित्यमरः तत्रक्रीडत्विहरत् यज्जलंतदेवडमरुः वाद्यविशेषः
ढक्केत्यर्थः वाद्यप्रभेदाडमरुमड्डुडिंडिमझर्झराइत्यमरः तस्यनेनवाद्यः टंकारः शब्दविशेषः तेनस्फुभगःशोभनं

सदैवत्वय्येवार्पितकुशलचिंताभरमिमंयदित्वंमामंबत्यजसिसमयेस्मिन्स्फुविषमे॥

स्फुवाभ
गंभीर्यस्यसः भगंश्रीकामसाहात्म्येत्यमरः स्फुदरइत्यर्थः क्वचित्तटक्रोडेतिपाठः ३८ इदानींसर्वदाभवत्यांस्थापित
कुशलचिंताभरंमांत्वंविषमेअस्मिन्समयेयदित्यजसितर्हि अतःपरंभुवनत्रयेतवविश्वासंकोपिनकुर्यात् तवकरु
णाचनिराधारास्यादितिगंगायाः भयप्रदर्शनेनाह सदैवेति भो अंबसदैवसर्वदैवत्वय्येवभवत्यामेव एवेत्यनेनतीर्थां
तरंव्यावर्तयति अर्पितकुशलचिंताभरंकुशलस्यक्षेमस्यकुशलंक्षेममस्त्रियामित्यमरः तस्यचिंताकथंममकुशलं

भविष्यतीत्याकारिकातस्याभरः आधिक्यंवल्लीचिंतेत्यर्थः भरः समूहोवा अर्पितः स्थापितः कुशलचिंताभरोयेन
सः तंगंगेवममकुशलंकरिष्यतीतिमन्यमानंइत्यर्थः इमंत्वत्समीपेवर्तमानमेतादृशंमांस्फविषमेस्फुतरामत्यंतंविष
मोदुःसहःतस्मिन् अतिकठिनइत्यर्थः यद्वाविषंगरलंमयतेददातीतिविषमःतस्मिन्मेङ्प्रणिदानेइत्यस्यआदेश
उपदेशेशितीत्यात्वेआतोनुपसर्गेकइतिआतोलोपःइटिचेत्याकारलोपःएतादृशेस्मिन्समयेयादित्यजसितदात
र्हिअयंविश्वासःगंगाशरणागतकुशलकर्त्रीत्याकारोनिश्चयः त्रिभुवनतलात्त्रिभुवनस्यतलंतस्मात् अस्तंतिरोभा

तदाविश्वासोयंत्रिभुवनतलादस्तमयतेनिराधाराचेयंभवतिखलुनिर्व्याजकरुणा ३९ वं अयतेग
च्छतिगमिष्यतीतिवा वर्तमानसामीप्येतिभविष्यतिलट्चपुनः इयंनिर्व्याजकरुणा अकपटकरुणानिराधाराभ
वति निर्गतः आधारोयस्याःसाएतादृशीभवति खलुनिश्चयेनसंदेहोनास्तीतिभावः विश्वासाभावेनकस्यापितव
निकटेआगमनाभावात् करुणायास्तिरोधत्वात् लोकेपियस्यविश्वासोनास्तितस्यनिकटेकोपिनगच्छतीतिप्रसिद्ध
मेव एवंचमाहात्म्यसंरक्षणायझटितिममोद्धारणंकुर्वितिगंगायाः प्रार्थनीमदर्शनमितिभावः कचित्तुसमयेइत्यस्य

स्थानेविषयेइतिपाठः तत्रविषयोद्धारणारूपेविषयेइत्यर्थः ३९ इदानींहरवामभागेकाद्धितीयाकांतावर्ततेइति प्रेक्षितुंकपर्दादुल्लस्यसीमंतसरणौआगताअतएवपार्वत्यासापत्न्यभावात् करेणाकर्षितात्एताहृशयस्त्वलहर्यो विजयंतामित्याह कपर्दादिति भोजननि तेतवलहर्यः कपर्दात् शिवजटाजूटात् उल्लस्यप्रसृत्यप्रणयामिलद्द र्द्धांगयुवतेः प्रणयेनप्रीत्यामिलंतीसंयुज्यमाना अर्द्धांगेवामभागेयुवतिःपार्वतीयस्यसःतस्यपुरारेःशिव

कपर्दादुल्लस्यप्रणयमिलदर्द्धांगयुवतेःपुरारेःप्रेंखंत्योमृदुलतरसीमंतसरणौ भवान्या साप त्न्यस्फुरितनयनंकोमलरुचाकरेणाक्षिप्तास्तेजननिविजयंतांलहर्यः ४०

स्यमृदुलतरसीमंतसरणौ अतिशयेनमृदुलः कोमलः मृदुलतरः तादृशोयःसीमंतः केशवेशःसीमंतः केशवेशेइतिशकंध्वादिगणसूत्रे यापररूपम् तस्यसरणिः तत्रप्रेंखंत्यःगच्छंत्यः उपरिष्टादधोभागेआगताइत्यर्थःपुनः कथंभूताः अतएवभवान्याः पार्वत्याकर्तृभूतयाकोमलरुचा कोमलारुक् कांतिर्यस्यतेन एतेनपार्वतीसौंदर्यमुक्तम् अतएवशिवेनप्रीतिव शात् लहरीकर्षणेननिवारिताएताहृशेनकरेण सापत्न्यस्फुरितनयनंयथास्यात्तथासमानःपतिर्यस्याःसास

432

पत्नी तस्याः भावः सापत्न्यं तेन स्फुरितेन कोपेन चंचलेन यनेयस्मिन्कर्मणि यथा भवतितथा आक्षिप्ताः
आकर्षिताः क्वचित्तु भवान्याइतिषष्ठ्यंतः पाठः तत्र भवान्याः करेण कर्तृभूतेनेत्यर्थः ४० इदानीं बहवो लोकाः त्वा
मायांति तत्र तेषामभीष्टं करोषीतिकारणं वर्तते अहं तु स्वभावादेव त्वय्यनुरक्त इतितुभ्यं शपइत्याह प्रपद्यंतइति
भोमातः सुरधुनिकतिलोकाः अत्र भवतीं पूज्यां भवतीं त्वां न प्रपद्यंते नायांति अपितु बहवः प्रपद्यंतइ त्यर्थः तत्रायमुपा

प्रपद्यंते लोकाः कृतिन भवतीमत्र भवतीमुपाधिस्तत्रायं स्फुरतियदभीष्टं वितरसि
शपेतुभ्यं मातर्ममतुपुनरात्मा सुरधुनिस्वभावादेव त्वय्यमितमनुरागं विधृतवान् ४१

धिःकारणं स्फुरतिवर्तते किंतदित्याकांक्षायामाह यत् यस्मात् कारणात् अभीष्टं वांछितं वितरसि ददासि तेभ्य
इतिशेषः ममतुपुनः जगन्नाथस्यात्मा स्वभावादेव निसर्गादेव त्वयि भवत्याममितं अपरिमितं अनुरागं प्रीतिं विधृ
तवान् धारयामास इतितुभ्यं भवत्यैशपे शपथं करोमि श्लाघंह्नुङ्स्थाशपामिति संप्रदानत्वम् ४१ ६२

इदानींत्वदीया मृत्तिकामदीयंसमस्तंशोकंदूरीकरोत्विति प्रार्थयते ललाटइति पूर्वश्लोकात्संबोधनपदमावर्तनीयम् भोस्कर धुनि त्वदीयात्वत्संबंधिनीसामृत्स्ना प्रशस्तामृत मृत्स्नासस्नौप्रशंसायामितिमृच्छब्दात्स्न प्रत्ययः मृन्मृत्तिकाप्रशस्तातु मृत्सामृत्स्नाच मृत्तिके त्यमरः ममजगन्नाथकवेः कृत्स्नामपिसंपूर्णमपिशुचंशोकंहरतु ननुमृत्तिकायाः शोकहरणेकथंसामर्थ्यमित्याकांक्षायामाह साका यामृत्स्ना इहलोकेललाटेभालदेशेसलिलंयथास्यात्तथातिलकितासती पुंड्रीकृतासतीतमोहंतुं तरुणतरमार्तंडतुलनाम् तरुणतरः माध्या

ललाटे यालोके रिहरवलु सलीलंतिलकितातमोहंतुं धत्तेतरुणतरमार्तंडतुलनाम् ॥

ह्निकोयोमार्तंडः सूर्यः तस्य तुलनांसाम्यं धत्ते बिभर्त्ति अत्रप्रमाणंतु गंगातीरसमुद्भूतांमृदंमूर्ध्नाबिभर्तियः बिभर्ति रूपंसोर्कस्यतमोनाशायकेवलमिति ब्रह्मांड पुराणवचनं बोध्यम् तिलककरणप्रकाराश्चकस्तत्रैवयामह्स्तेजलंकृत्वासावित्र्याचाभिमंत्रितम् तोह्विष्णोरितिमंत्रेणमर्दयेन्मृत्तिकांततः अतोदेवेतिसूक्तेनतिलकं कारयेत्सदेति इदंतिलककरणंप्रातःस्नानोत्तरंबोध्यंपुनःसाकायावधिलिखितदुर्वर्गसरोजिम् विधिनाब्रह्मणालिखिताःते

चेतेदुर्वर्णाः दुष्टाक्षराणि अयं दरिद्रो भविता मृतभार्यश्चेत्यादयः तेषां सरणिः तां सद्यः पालनाद्यवहितोक्तकाले एव विलुंपंतीति विशेषेण लुंपंती प्रोच्छंती एवंच विधिलिखितमपि अलीकं कुर्वत्याम्मम शोकहरणे सामर्थ्यमस्तीति भावः ४२ इदानीं मूढान्नरानुपहसंतः स्ववासिश्चमराणां मालिन्यदोषं दूरीकुर्वाणाश्च गंगातीरतरवः ममसखायः संतित्याह नरानिति त्रिदशततटिनीतीरतरवः त्रिदशततटिन्याः गंगायाः तीरं तत्रतस्य वा तरवः वृक्षाः नः अस्माकं

विलुंपंती सद्यो विधिलिखितदुर्वर्णसरणिं त्वदीयास्तन्मूलस्नानश्रमहरतु कृत्स्नामपि शुचं ४२
नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो हसंतः सोल्लासं विकचकुसुमव्रातमिषतः ॥

भक्तजनानां सखायः मित्राणि संतु भवंतु अथ मित्रं सखा स्त्रहदित्यमरः कथं भूताः त्रिदशतटिनीतीरतरवः मूढान् मूर्खान् अतएव तत्तज्जनपदसमासक्तमनसः तेचते जनपदाश्च तत्तज्जनपदाः स्वस्वदेशा नीवृज्जनपदो देश इत्यमरः तेषु समासक्तं संबद्धं एतादृशं मनो येषां ते तान् एतादृशान् नरान् मनुष्यान् विकचकुसुमव्रातमिषतः विकचानि प्रफुल्लानि यानि कुसुमानि पुष्पाणि तेषां व्रातः समूहः तस्य तदेव वा मिषं छलं तस्मात् सोल्लासं सहर्षं यथा

स्यात्तथाहसंतः उपहासं कुर्वंतः एतेषां दुष्टस्त्रीयस्त्रीयदेशरचिताभक्त्यातत्रैवमरणेन दुर्गतिर्भविष्यतीति अस्माकं तु सदैव गंगातीरवासित्वात् उभयगतिर्भविष्यतीति तानुपहसंतीत्युत्प्रेक्षा पुनः कथंभूताः नित्यमलिनाः नित्यंमलिनाः मालिन्ययुक्ताः तान् जन्मतः श्यामानित्यर्थः एतादृशान् अलिनः भ्रमरान् सौरभ्यैः निजकुसुमसौगंध्यैः संततंनिरंतरं यथास्यात्तथा पुनानाः पवित्रीकुर्वाणाः एवंच तादृशान्येपुनंतितेस्वसरवंमाम पिपवित्रंकरिष्यंतीतिभावः

पुनानाः सौरभ्यैः सततमलिनोनित्यमलिनान्सखायोनः संतुत्रिदशतटिनीतीरतरवः ४३ यजंत्येकेदेवान्कठिनतरसेवांस्तदपरेवितानव्यासक्तायमनियमरक्ताः कतिपये ॥

सौरभ्यैः नित्यमलिनान् पुनाना इतिवायोजना मधुलिण्मधुपालिन इत्यमरः ४३ इदानीं केचनस्वेष्टफलावाप्तये यमनियमादियोगं कुर्वंति अहंतु त्वन्नामस्मरणेन प्राप्तकामः सन् जगज्जालं तृणतुल्यंमन्य इत्याह यजंतीति भोत्रिपथगे एके लोकाः कठिनतरसेवान् अतिशयेनकठिना कठिनतरा सेवा येषां ते तान् एतादृशान् देवान् विष्ण्वादीन् यजंति पूजयंतितदपरेते भ्यः देवपूजकेभ्यः परे अन्ये पंचमीतियोगविभागात्समासः यद्वा ते देवपूजकाः अपरे ये भ्यः -

तेइतिपंचम्यर्थेबहुव्रीहिः देवपूजके भ्यउर्वरितइत्यर्थः वितानव्यासक्ताः वितानेषुउल्लोचेषुयज्ञेषुवाव्यासक्ताः विशे
षेणआसक्ताः तत्पराइत्यर्थः संतीतिशेषः अस्त्री वितानउल्लोचेइत्यमरः लोकेचांदवाइतिप्रसिद्धिः क्रतुविस्तारयो
रस्त्रीवितानंत्रिषुतुच्छकइत्यमरः कतिपयेन्येलोकाः यमनियमरक्ताः यमनियमयोरक्ताः अनुरक्ताः संतीतिशेषः
तान्कुर्वतीत्यर्थः तत्करणकाठिन्यात् कतिपयपदोपादानंयमनियमग्रहणम् अष्टानामप्युपलक्षणंतेचयमनिय
मासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्रअहिंसादिपरिग्रहोयमः शौचादिसंपादनंनियमः पद्मका-

अहंतुत्वन्नामस्मरणाभृतिकामस्त्रिपथगेजगज्जालंजानेजननितृणजालेनसदृशं ४५

द्यासनंरेचकादिप्राणायामः इंद्रियाणांस्वस्वविषयेभ्यः प्रत्याहरणंप्रत्याहारः तत्रैवविच्छिद्यअंतरिंद्रियप्रवाहो
ध्यानंचित्तवृत्तिनिरोधः समाधिरितिदिक् भोत्रिपथगेजननित्रीन्पथोगच्छतीतित्रिपथगा यद्वात्रयाणांपथांस-
माहारस्त्रिपथंपथः संख्याव्ययादेरितिनपुंसकत्वंतेनगच्छतीति त्रिपथगागमेडः तत्संबोधनंअहंतुजगन्नाथ-
स्तुत्वन्नामस्मरणकृतकामः सन् तवनामत्वनाम प्रत्ययोत्तरपदयोश्चेतित्वादेशः त्वन्नामस्मरणचिंतनंतेनकृताः

णं भवति ध्रुवं चंद्रो मंदक्षेत्रगो [illegible] सूर्यश्चाष्टमसंयुतः एकोनत्रिंशे वर्षे जातो यमपुरं व्रजेत्
पापात्मका अष्टमारिस्थाः सौम्याः केंद्रवहिःस्थिताः अस्मिन्योगे समुत्पन्ने अष्टविंशे मृतिर्भवे
त् जन्मरंध्रपयोर्मध्ये निशानाथो व्ययेऽपि वा सप्तविंशतिवर्षे वा त्रिंशद्वर्षे पिता मृतिः रंध्रेशे
जीवसंदृष्टे पापे पापनिरीक्षिते रंध्रस्थे जन्मपे वापि अष्टविंशे मृतिर्भवेत् अष्टमाधिपतौ केंद्रे ल
ग्नेऽबलवत्तरे त्रिंशद्वर्षाण्यसौ जीवेत् द्वात्रिंशात्परतः जन्मात् यः कश्चिदष्टमस्थश्च पापः कश्चि
द्बलवान् स्थितः त्रिंशद्वर्षाण्यसौ जीवेद्द्वात्रिंशत्परतः जन्मात् लग्नात्षष्ठमराश्यपशं [illegible] जातस
मन्विते पापे बलाधिके लग्ने केंद्रे [illegible] अन्त्यात्क्षेत्रगतो गुरौ लग्नस्थे पापवीक्षिते

पिसंदृष्टाः रविचंद्रभौमसुतसूनुभिः शुक्रगुरुसौरेंदुभिस्त्रिषष्ठेव्ययस्थैः रविशशिभौममंदाः केंद्रेऽस्तंगतरव
लुपंचभिर्वर्षैः रविराहुयुक्तः शशिजः सौम्यैर्दृष्टो विनाशयति नूनं एकादशभिर्वर्षैर्देवांकेपि स्थि
तं जाते लग्ने विशति भौमेः शुक्रगुरुसप्तमे राशौ दीनाः दृष्टा न देवगुरुणा सप्तभिर्वर्षैर्विनाश
यति केंद्रे रविसुधितनुः क्षितितनयो दविलोकितो न युतः षर्षत्रहिकेनाभ्युमारयति किमत्र
गणितेन लग्नाधिपतिश्चंद्रो मरणाय दस्थोपि क्रूरैर्न तथा ततः क्रूरैः सफलैर्दृष्टो वर्षैस्त्रिभि
स्तु मारयति पापो विलग्नाधिपतिः शशांकदत्तस्थितः क्रूरनिरीक्षितस्थैन चंद्रोशकस्थो यदि
वा तदा शोभा नः त्रिभिर्वर्षैः प्रेतपुरीं नवाद्यैः दृश्येप भागे संयुक्ताः सौम्यखेटः पापाः सर्वे यत्स्थजन्म
न्यष्टमे राहौ लग्ने पापयुक्तेऽथ षष्ठे जातो मृत्युं याति पक्षात् तु लग्ने राहुः सप्तमभवने शशिसूर्य
र्यनिरीक्षितो न शुभदृष्टः दशभिर्दिवसैर्हि तेरदेर्जातं विनाशयति घटालिसिंहे कर्कनाथयु
क्तेन स्थितो विलग्नेसति पापदृष्टे जातोयमसप्तदशोप्रयाति वर्षे ... दृष्टः दीर्घो दुःख
पसंदृष्टो राहुर्दृष्टो विशेषतः जातो यमपुरं याति दिवसैः कतिपैरपि जन्मलग्नाधिपतौ विल
ग्नात् षष्ठाष्टमांत्यगे दिनेशयुक्ते जातो धर्मं द्वादशभिश्च वर्षैः प्रयाति सौम्यैर्नयुताः प्रदृष्टाः
होराधिपतिर्हीनपापजितो मरणमेव विदधाति राशिं त्रिंशांशं कृत्वा वर्षैर्मासैर्न संदेहः त
रणिंदुभौमाः ... नयुक्तान्सौम्यगाः जातो यमपुरीं याति नवमे दिनसंशयः लग्नस्थे रवि

मोक्षोदये तद्दिवसे [illegible] होरा स्वामी लग्नकेंद्राद्धिबुकः जातो यो सौ हि बुधमेवेति मृत्युमोक्षः सोऽप्य
वमेव विधेया होरा स्वामी मृगास्य तु हि मंत्री वा ग्रहः जातः शुक्रः स्वर्गं गच्छति सौम्य केंद्र रहितो
ज्ञाने नवेदि वि तः लग्नं त्वाष्टम धर्म भवलाहितांश्च नार्के भौमार्कजाः द्विधं गच्छति चांगकेतु पापे
मैत्री न्यस्ते द्विस्थितः लग्नेवेदमात्रे वा बलिष्ठ पापैः केंद्रे नैधने वक्रि कोणे शुक्रः स्मर्यः शीघ्र गुरुचक
संस्थानांशा गच्छन्त्येवमेवेति ज्ञातं ४ मेषे विंशति भागाः स्यात् सूर्यस्य दशांशा त्रिंशाका कर्कः एकविंशति
भागा तु सिंहे तत्र तु वृषे प्रथमे मेषे वृद्धे त्रयो विंशति भागकः द्वाविंशति तुलाराशौ तु ला
यां वेदभागकः विंशतिर्मकरे चंद्रः कन्यायां प्रथमांशकः धनुष्यष्ट दशो भागो मीने दशम
भागकः ७ द्वाविंशतिर्नवमे तु चंद्रो प्युच्चं तस्मिन् ध्रुवः येये नीचांशका राशा मृत्युभागा विवर्जि
ताः ८ तावद्भिर्वत्सरैर्ज्ञातो मृत्युमेति न संशयः जन्म लग्नात्पयो यत्र राहुर्लग्नगतः शुभः ९
पारोति मृत्यु जातस्य तयोर्मिश्रं मासं च दशे धराधरतु दिने शासो राजा तस्य मृत्युसमुपैति मास
रे केतुस्तु यत्किंतु दिने जातो मासद्वये नैव यमव्रजति ११ भूपालयोगायवनैः प्रदिष्टा राजः
कुले जातधरानरेशाः तेन प्रयोगाल्लभ्यते जाताः सदायं संयांति न राज्यपदे १२ भानुर्नभ
स्थायदि पापदृष्टो धराधरतत्र तदेहराशिनस्य गेहे जातस्तु मृत्युसमुपैति शीघ्रं भौमे न दृष्टो क्षितो
पिचैव लग्ने येङ्कानि गलाहि [illegible] हंगपेक्षाधारस्तः मरणाय समवर्षैः क्रूर स्तुता [illegible]

अथावसरलक्षणमाह ॥ यत्रार्थांतरमिति यत्र वस्तुनार्थस्य वार्थीयस्योत्कर्षे प्रसिद्धे अर्थांतरं लसंतं सेत्य
ति बुधैरवसरः प्रोक्तः १२४ उदाहरणं रुद्ररा जावतीते भङ्घो जयदेवसिंहदेवः कीदृशो राजा निश्चया
नंदः निश्चयेन सार्वभौमत्वेनानंदरवहति एवं वायस्य नकचित्य राजयादि प्रपंचविज्ञातः पुनः किंस्वच्छंदत
मः साधानतमो नलंविकमो यस्य सः उपलक्षणमाह ये नामे नराज्ञा सोप्यतीव प्रसिद्धोपि वर्वरो नाम नक्ते
चरो राक्षसस्वरूपो राज्ञा युद्धसंग्रामे जितः पराभूतः अत्र जयसिंहदेवार्थांदिव प्रसिद्धस्य वर्वकस्यरात्रौ

यत्रार्थांतमुत्कर्षं संभवत्युपलक्षणं प्रक्रांतार्थस्य सप्रोक्तो बुधैरवसरो यथा १२४॥
रुद्रविश्रुयानंदो स्वच्छंदस्तमविक्रमः येनं नंचरः सोपि युद्धे वर्वरको जितः ॥१२५॥ यत्रनिर्धा
रितात्सारात्सारं सारं ततस्ततः ॥ निर्धार्यते यथाशक्ति तत्सारमिति कथ्यते ॥१२६॥ संसारे मानुषं सारं मा
नुष्ये पि कौलीन्यं कौलीन्ये धर्मित्वं धर्मित्वे पि सदयत्वम् १२७

जयकारित्वेणोपलक्षणेन ज्ञायते इत्यवसरोयं १२५ अथ सारलक्षणमाह ॥ यत्रनिर्धारितादिति य
त्र निर्धारितात्सामान्यवस्तुनाप्यथक्कृतात्सारात्सारं ॥ नावस्तुनः सोरनिर्धार्यते पृथक्क्रियते
सारत्ततस्तदनंतरं पुनर्पुनर्यथाशक्ति स्वात्मशक्त्यनुसारेण सारं वस्तु निर्धार्यते तत्सारमि
ति सारनामालंकारः कथ्यते १२६ अथोदाहरणं संसार इति सुगमं

१ यत्र व्रह्मविधोऽश्लेषः [illegible] वदति [illegible] व्रह्मविधो श्लेषः शब्दालंकारः एकदा [illegible]
[illegible] शब्दाः [illegible] यथा लोके [illegible] लोके [illegible]

वा०म

२८

अथ श्लेषं लक्षयति [illegible] वदेत्तैरेवेति यत्र वाक्ये [illegible] कारे एकार्थवाचकैरेव पदैर्यथावाक्यैः प
दैरनेकमर्थं नानाविधं वाक्यं वक्ति वृते स श्लेषनामा लंकारः स्यात् १२८ तैरेव पदैः श्लेषो
दाहरणं आनंदमिति यस्य राज्ञो [illegible] पालस्योदये सोमनवाप्याः सिंधुनाथः सिंधुदेशस्वामी
किल निश्चितं वेलां मर्यादिकां जगाम ह कालमति वाहितवान् किंभूतस्य राज्ञः प्रजानां सम

२ पदैस्तैरेव भिन्नैर्वा स्वभावतयैव यत्र वक्ति अनेकमर्थं यत्रासौ श्लेषः परस्परं भवति यथा १२८
आनंदमुल्लासयतः समताल्करैस्संतापकरैः प्रजानां ॥ यस्योदये सोमनवस्य राज्ञो
जगाम वेलां किल सिंधुनाथः ॥१२८॥

[illegible] यत्र [illegible]
[illegible] अन्यैरनेकमर्थं [illegible] अत्र त्वा
तादानंदमुल्लासयतः केकलाकरैर्दंडैः किं विशिष्टैः संतापकरैः संतापं दुःखं कुर्वंतीति संताप
करा न संतापकरास्तैः असंतापकरैः करैः किं यस्य चंद्रस्य चागुनिष्ठ [illegible] मर्यादां
वा सिंधुदेशाधिपः समुद्र इति [illegible] नाम [illegible] वाक्यमनेकार्थं वक्ति अथ
[illegible] अनेक [illegible]
कारः [illegible]
चिनो शब्दानामेको

610

श्र बा.र

२

सामान्येति॥ सामान्यवनिताकपटपंडिता वेश्या पण्यांगना भवेत् तस्या दातारं नायकं विना नहि कश्चित्प्रि
यो भवति यो दाता स एव नायकः सामान्यो प्रियेति १४ अथ शृंगाररसस्य प्रकाशप्रच्छन्नभेदद्वयमाह॥
सर्वप्रकाशमिति एषाप्यंगना उक्ता सती सर्वप्रकाशमेव सर्वप्रकटमेव नायकं प्रति याति प्रकाशो रसः
अन्यस्त्रीणां प्रियसमागमः प्रच्छन्न एव भवति एवं प्रच्छन्नशृंगाररसः १५ समासः संभोगशृंगाररसः वि
प्रलंभशृंगारमाह पूर्वानुराग इति पूर्वानुरागात्मको विप्रलंभः मानात्मको विप्रलंभः प्रवासात्मको वि

सामान्यवनिता वेश्या भवेत्कपटपंडिता॥ नहि कश्चित्प्रियस्तस्या दातारं नायकं विना॥१४॥ सर्वप्रका
शमेवैषा याति नायकमुक्ता वाच्यः प्रच्छन्न अन्यस्त्रीणां प्रियसमागमः॥१५॥ पूर्वानुरागो मानाख्यः
प्रवासः करुणात्मकः॥ विप्रलंभश्चतुर्धा स्यात्स पूर्वः पूर्वो यं गुरुः॥१६॥ स्त्रीपुंसयोर्नवालोकादेवोल्ल
सितरागयोः॥ ज्ञेयः पूर्वानुरागोयमपूर्णस्पृहयोर्दशा॥१७॥

प्रलंभः करुणात्मको विप्रलंभः इति विप्रलंभश्चतुर्धा स्यादेवं विप्रलंभः॥ पूर्वः पूर्वोगुरुः प्रवासात्मको गुरु
रित्यर्थः १६॥ अथ क्रमेणैतेषां लक्षणमाह॥ स्त्रीपुंसयोरिति स्त्रीपुंसयोर्नवालोकात् एवं नवदर्शना
त् एवोल्लसितरागयोः अपूर्णस्पृहयोर्या दशावस्था अयं पूर्वानुरागविप्रलंभः शृंगाररसः॥१७॥

611

अथ सामान्येन चतुर्विधां स्त्रियमभिधत्ते॥ तथा शृंगाररसस्य नायको युवा पुमान् प्राक् कथितस्तस्य नायकस्य पु
रुषरूपस्य नायिका अपि चतुर्विधा भवतीत्याह॥ आरूढेति स्त्रियश्चतुर्विधा अनूढा स्वकीया परकीया पण्यां
गना च त्रिवर्गेण धर्मार्थकामयुक्तस्य स्वकीया परिणीता स्यात् अन्या अनूढा या स्त्रियः केवलकामिनो भवं
ति आसां लक्षणमाह॥ १॥ अनुरक्तेति॥ याऽनुरक्तेन नरेण अनुरक्ता सती या स्वयं स्वीकृता अंगीकृता भवति
साऽनूढोच्यते यथा दुष्यंतस्य राज्ञः शकुंतला॥ ११॥ या नायकाद्देवतागुरुसाक्ष्येण स्वीकृता सा स्वीया नायका स्व
अनूढा च स्वकीया च परकीया च पण्यांगना॥ त्रिवर्गिणः स्वकीया स्यादन्याः केवलकामिनः॥ १॥ अनुरक्तानुरक्तेन
स्वयं स्वीकृता भवेत्॥ सानूढेति यथा राज्ञो दुष्यंतस्य शकुंतला॥ ११॥ देवतागुरुसाक्ष्येण स्वीकृता स्वीयनाय
का॥ क्षमावती गंभीरप्रकृतिः सच्चरित्र धनका॥ १२॥ परकीया परोढैव वा च्यमेदोत्तिकानयोः॥ विपयमप्यति
कामेकारस्थैवैकाप्रियं वदेत्॥ १३॥

कीया सा क्षमावती गंभीरप्रकृतिः सच्चरित्रवत् प्रधानचरित्रवती॥ १२॥ परकीयेति॥ परकीया
विस्त्री अन्योढैव वा स्यात् परमनयोः परकीयानूढयोर्वाच्यभेदान्नितराह विशेषः कोपितया ति विशेषमाह
एका परकीया अतिकामाकुला सती स्वयमेवाप्रियं वदेत् एका द्वितीया अनूढा लज्जया स्वयं वदेत् पर
कामाकुला सती स्वयमेव कृत्वाप्रियं वदेत्॥ १३॥

अथ भिन्नपदैः श्लेषोदाहरणं ॥ कुर्वन्निति यो राजा विजिशांते तः पुरः कांतिमत्तया कस्य राजः किं विशिष्टो
राजा कुवलयस्य पृथ्वीवलयस्योल्लासं कुर्वन् रम्यां प्रधानां भोजराजस्य श्रियं लक्ष्मीं हरन् योऽन्यो
ऽपि राजा चंद्रमाः सन्निशांते प्रभाते कांतिमत्तया कस्यां न राजाते किं विशिष्टो च चंद्रमाः कुवलयं कु
मुदस्योल्लासं विकासं कुर्वन् रम्याणि च तानि अंभोजानि च तेषां विकासि कमलानि तेषां सो
भां हरन् अत्र कुवलयस्येति भिन्नपदं वलयस्येति रम्येति भिन्नपदं अंभोजश्रीरिति भिन्नपदं ॥ १२ ॥

कुर्वन् कुवलयोल्लासं रम्याभोजश्रियं हरन् ॥ राजे राजा विजयत्यत्र निशांते कांतिमत्तया ॥ १२ ॥

एकत्र यत्र वस्तूनामनेकेषां निबंधनं ॥ अत्युत्कृष्टापकृष्टानां तं वदंति समुच्चयं ॥ १३ ॥ उदा

हरणं अस्त्युपाध्यकं पुरमेव निपातिः कर्णदेवनृपसूनुः श्रीकर्णनामधेयं करीव रत्नानि जगती ह ॥ १४ ॥

अथ समुच्चयलक्षणमाह एकत्रेति यत्रैव एकस्मिन्नेकेषां वस्तूनां निबंधनं भवति तं समुच्चयमलंकारं
बुधा वदंति कीदृशानां वस्तूनां अत्युत्कृष्टानां अतीव प्रधानानां अपकृष्टानां नीचानां ॥ अथोदाहरण
मणिहि त्रीति इह जगति त्रीणि रत्नानि वर्तंते तानि कानि इत्याह एव मणिः चपलेन नागरत्नं द्वितीयो रत्नानिपतिः
कर्णदेवनृपसूनुः श्रीजयसिंहदेवः तृतीयः श्रीकर्णनामधेयः करी गजः अत्रोत्कृष्टानां वस्तूनां

पा०अ ग्र

अथाप्रस्तुतवस्तुनो निबंधनं दर्शयति ॥ ग्रामे वासयति सुगमं ॥१३३॥ अथाप्रस्तुतप्रशंसा लक्षणमाह ॥
प्रसंसेति यत्राप्रस्तुतस्याप्ययोग्यस्यापि वस्तुनः प्रशंसा वर्णना क्रियते तामप्रस्तुतप्रशंसामलंका-
कारं कृतधियः पंडिता आहुः कथयंति १३४ अथोदाहरणं स्वैरं विहरतीति सुगमं १३५ अथैकाव-
लीलक्षणमाह पूर्वपूर्वेति पूर्वपूर्वो येषां वैशिष्ट्यनिबंधना नाम यथोत्तरोत्तरविशेषणा बु-
धैरेकावलीकमता कथिता १३६ ॥ अथोदाहरणं ॥ देशाः स्फूर्जन्नगरा इति सुगमं १३७

ग्रामे वासो नायको निर्विवेकः कौटिल्यानामेकपात्रं कलत्रं ॥ नित्यं रोगः पारवश्यं वपुसामेतत्सर्वं
जीवितामेव मृत्युः १३३ प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुन । अप्रस्तुतप्रशंसां तामाहुः कृतधि-
यो यथा १३४ स्वैरं विहरति स्वैरं स्वपिति स्वैरं च जल्पति ॥ भिक्षुरेकः सुखी लोके राजचौरभयोज्झितः ॥
पूर्वपूर्वार्थवैशिष्ट्यनिबंधना मुत्तरोत्तरा । यथोत्तरविशेषणा बुधैरेकावली मता ॥१३६॥ देशाः स-
स्फूर्जन्नगरा नगराणि तु सप्तभूमिनिलयानि निलयाः सलीलललनाललना मन्मथसंततरङ्गिताः १३७

ग्रामे वसतिर्मुद्रस्य निवासस्ततिवासस्तिरन्यथा ॥ व्याजेन स्तुतिर्व्याजस्तुतिः स्तुतिः मुखे यन्मतः निंदा विमया स्तुतिः यथा दातारः कृपणं मन्यमतो व्यर्थे नन्दयति
अथ यातायुरुषस्यालीधनं संपद्यमानत्वादेताहितिका व्यपरीक्षायां स्याद्व्यतेया त्यते चापि यथा पूर्वं परं परं विशेषणं तथा वलीयत्र सेकावलीद्विधा पूर्वपूर्वप्रतिय
त्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन स्थापनं निबंधो यस्या द्वितीयेकावली क्रमेणोदा० पुरातिथ्यस्यास्वरांगना निवं रांगनाः रूपयदि स्फुतोगणः
रूपं तदुक्तासितसद्विलासं विलासमद्वंके सुसुमायुधस्य द्वितीय० न तज्जलं यन्न सुचारुपंकजं न पंकजं तद्यदलीनषट्पदं ॥ न षट्पदोसौ न जुगुंजयः कलं
न गुंजितं तन्न जहार यन्मनः ॥ पूर्वत्र ... विशेषणं विधीयते ।

अनुमानं तदुक्तं ॥ यत्साध्यसाधनयोर्वचः यथा वनेतालहरीचसाचलदृशो आपारयंति भवंत्यतत्रैव पतंतिसंततम

अथानुमानलक्षणमाह ॥ प्रत्यक्षादिति ॥ यत्रालेकाप्रत्यक्षात्लिंगतः कालत्रयवर्त्तिनोऽतीतानागतवर्तमा
नस्य लिंगिनो अनुमेयस्य ज्ञानं भवति तदनुमानमुच्यते ॥१६॥ अतीतोदाहरणं ॥ नूनेनयइति ॥ नूनं स्नि
तं नयनस्तदाजन्मकाले विभोः श्रीनेमेरभिषेकांभसा अभूवन् अन्यथैतासु नदीषु जनो लोकः स्नानेन क
थं प्रभुत्याति ॥१७॥ अनागतोदाहरणं ॥ जंभजिदिति हे सखि अहमेव मन्ये जंजित्क कुमिद्वर्ष्यादिति श्रुत्वं
ज्योतितत्याविजंभतेतथाग्रकं भवति यथा वसो दुर्जनो निशाकरद्वंदेत्याति १८ अथवर्त्तमानकालो
दाहरणं
सा प्रत्यक्षात्लिंगतो यत्र कालत्रितयवर्त्तिनः ॥ लिंगिनो भवति ज्ञानमनुमानं तदुच्यते ॥१९॥ रनेनद्य
सरोरुहवक्त्रमिषेकांभसाविभोः ॥ अन्यथा कथमेतासु जनः स्नानेन भुञ्ज्यति ॥२०॥ जंभजित्क
कुमिषौ तृष्णादोषाकरः किं करतो विभर्त्ति ॥ तच्छ्रो वनभ्राणि सापराधान्य ज्ञानिनो वेत्ति
मचेलिणोति १८१ मीभिक्षुः सोमागिणः । वघनीकृतचापसंधितशरप्रेंखत्करक्रोधनो धावतगत एवशासनधनुः सत्तत
दाज्ञास्वरः अत्रवस्तगत्वाच्या प्रसत्वपिकवि वाहो त्रैव तथापि धानसिंसलकारित्व अन्यथा ब्रकुमात्रदमादि
मुखपद्मभेति ॥ दोषाकरश्चंद्रमा अस्याः स्त्रियामुखस्य किं करतां दासतां विभर्त्ति धरति किं वि । चंद्रमामु खजादितथा स्यात्
खपद्मभयावदनकांत्या बाधिता गृहीता कांतिर्यस्य सः चेद्यदि नो तर्हि चंद्रमा अद्य ज्ञानि किं क्षि
णोति किंपीडयति हेतुगर्भितविशेषणमाह ॥ इहशान्यभ्रातस्यानापकापारोचनोऽप्रियः शो
भायां तदिहरणेन तेन सापराधानियः किं लोतिसलेसेवकोभवति तस्य राजुसपीडयाति ॥१९॥

प्रमाणांतरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनवशात् ... स्त्वेतरव्यवच्छेदाय तत्र परिसंख्या
तत्र प्रश्नपूर्विका अप्रश्नपूर्विका च ... प्रश्नो नरेतु ... विशेषरहिता ... भेदः

बा०भ
प्र

परिसंख्यालक्षणमाह ॥ यत्र साधारणमिति ॥ यत्रालंकारे किंचित्साधारणमेकत्र प्रतिपाद्यते कथ्यते अ-
न्यत्र स्थाने तन्निवृत्त्यर्थं सा परिसंख्या कथ्यते ॥१४३॥ अथोदाहरणं ॥ यत्र वायुरिति ॥ यत्र नगरे परं
केवलं वायुश्चौरो वर्त्तते केषां चौरः पौरस्त्री रससंपदां पुरस्थे देशे तस्य दमणकद्रुः पौरवनितासौरभ-
प पौरसौरभस्य संपदा एतावता तत्र नगरे अन्यश्चौराः कोपि नास्ति यत्र युवानो यौवनस्थाः पुरु-
षाः विधुजनादेव बिभ्युः किंविशिष्टाद्वधुजनात् कृतक्रोधात् एतावतान्यद्भयं नास्ति ॥१४३

यत्र वायुः पुरे चौराः पौरस्त्रीरससंपदां युवान अकृतक्रोधादेव बिभ्युर्वधूजनात् १४३ प्रश्ने यत्रो-
त्तरव्यक्ते गूढवाप्यथवोभयं प्रश्नोत्तरं तथान्नानां संसर्गं संकरं विदुः १४४ अस्मिन्नपारसंसार-
सागरे मज्जतां शतां किं समालंबनं साधो रागद्वेषापरिक्षयः १४५

३

अथ प्रश्नोत्तरलक्षणं द्वेलंकारमाह ॥ प्रश्ने यत्रोत्तरमिति यत्रालंकारे प्रश्ने उत्तरं व्यक्तं प्रकटं भवति वा
गूढं भवति अथवा गूढं भयं गूढव्यक्तं भवति तं प्रश्नोत्तरमलंकारं विदुः यत्र पूर्वप्रतिपादितानामलंकि-
यानां संसर्गः संयोगः एकत्र मिलितं संकरं विदुरलंकारं १४४ अथोदाहरणत्रयं क्रमेण दर्शयति ॥
अस्मिन्नपारेति हे साधो अस्मिन्नपारे संसारसागरे मज्जतां शतां किं समालंबनं व्यक्तं मुत्तरं रागद्वेषाप

तद्वदित्यर्थः ॥१४॥ एवंमात्मस्वरूपज्ञानविवेचनप्रकारमाह ॥ वपुस्तु
षादिभिः कोशैर्युक्तं युक्त्यावघाततः ॥ आत्मानमंतरं शुद्धं विविच्यात्तंडु
लं यथा ॥१५॥ पंचकोशेष्वावृतात्मनि स्थितं वपुः स्थूलशरीरं तुषादिभिर्यु
क्तं तंडुलमिव युक्तं युक्त्यावघाततः अवहननात् शुद्धमात्मानं तंडुलमिव
विविच्याहिविवेकेन जानीयात् कथमयं स्थूलदेहो नात्मा भूतकार्यत्वात्
घटवत् सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलदेहवदित्यनुमानादिनां ते
भ्यः कोशेभ्यो भिन्नमात्मानं विविच्य जानीयादित्यर्थः ॥ ननु आत्मा
सर्वगतः तर्हि किं सर्वत्र सर्वैर्न दृश्यत इत्यत्राह ॥ सदा सर्वगतोप्यात्मा
न सर्वत्रावभासते ॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥१६॥ आत्मा

न्यमिति तद्वाह्यिणमोत्मानमेवधार्येत्तज्जानीयादित्यर्थः १२ नन्वन्न
न्नमयादिषु कोशेषु व्याप्य तत्तन्मयतया स्थितस्य कुतो निसमुच्यत श्लो
शे व्योह पंचकोशादियोगेन तत्तन्मयइव स्थितः शुद्धात्मा नीलवस्त्रा
दियोगेन स्फटिको यथा १४ अन्नमयप्राणमयमनोमयविज्ञानमु
योनंदमयाः पंचकोशाः आदिशब्देनोशनापिपासादिग्रहणं तै
र्योगेन मिथ्यातादात्म्येन तत्तन्मयइव स्थितः आत्मा शुद्धः न तु तेषु
वस्तुतो रंजितः वेदेपि स वा एष पुरुषोन्नरसमयइत्यादिभिः सूक्ष्म
वस्तुदर्शनार्थमेवोपाधिस्थब्रह्म सूचयति न तु तत्वदृष्ट्या निर्मलस्फ
टिको नीलपीतवस्त्रादियोगेन तत्तन्मयइवाभाति वस्तुतो नातिरंजना

एकोना
मलि २
कथन

लेखा ७ दीर्घे चेत्त्रय मादौ तत्व स्मालघुयुग्मं अंते स्यात् क्रुरुयुगं यस्याः सा

मदलेखा २५ मधुमती सकलवसुमती विदितदितमते नगणनगणैः

रचय मधुमती २६ विद्युन्माला ८ दीर्घा यस्या मर्त्यौ वर्णाः विश्रामः स्यात् द्वे

दे वेदैः ओङ्तनन्दो ली नाथप्रोक्ता वृत्ति विद्युन्माला २७ प्रमाणिका लगौ

स्थिति निरंतरा प्रमाणिकाष्टका लरा इयं परे रुदीरिता नगमत्र रूपिणी

क्रिया २८ चित्रपदा भद्वितयं द्विगयुक्तं पन्नगनाथनिरुक्तं सज्जनचेत

सि वृत्तं चित्रपदाभिधवृत्तं २९ माणवकः यत्र गुरुस्याद्ग्रगणः स्यात् स्वर

तोऽतस्सगणः माणवकोः सप्रथितः छंदसि लोगो निहितः ३ अनु

ष्टुप् ८ पंचमो लो गुरु षष्ठः सप्तम स्तु समे लघुः पादेहि विषमेग स्त्व।

कौ. ४

२

छ्लोको नुष्टुपूचकीर्तितः ३८ क्वचित्यादेनुविषमेपंचमाद्यास्त्रयोपिलाः नैकोपिस
र्वेगाःश्लोकेक्वचित्केवलपंचमः ३२ कमला ० द्विगुणानगणसहितःसगणाद
हविहितः कलितवलिमतिविमलाद्विजपमवतिकमला ३३ मणिबंधः म्रा
दितुरीयंपंचमकंषष्ठमघांत्यंस्यागुरुचेत् इंद्रियवेदैश्छेदिरतित्तन्मणिबंधं
मारफली ३४ रूपामाली मंकोन्मानावर्णाःयत्रस्युःसर्वेदीर्घाःसर्पराजेनोक्ता रू
पामालीसंतंतद्वत् पर्सिअन्तः के पाठवत् ३५ चंपककमाला १० मुद्दरपंक्ति
स्ताद्गुणचद्रहारपंक्तेरहारपंक्ता यत्रविरामःसाकथितासौचंपककमा
लाबलितविशाला ३६ सारवती चद्गगणत्रितयंक्रमतःस्याद्गुरुएगणतोत्र
मतः श्रीयशवंतनपप्रथिसारवतीकविभिःकथिता ३७ सुमनगतिः प

ता

620

दिदशामंगुरुविहितेविशिरववमितंसुकविहितं समभनगातिः फणिकधिनाद्दलयतिका
न्यविहिता ३८ हंसी स्याच्चेद्‍द्वर्णौमभनगाणनः पश्चाद्दीर्घौविपुलफणिनः हंसीा
ख्याता भ्रकतिरसयतिस्तस्याकेषां नजयतिमतिः ३९ सुंदरी सगणौजगणौगुा
रूभवेद्विषमेचेच्चरणेदशाक्षरे समरालगुरुरूहराक्षरे समपादेयदिसुंदरीतदा
३० इंद्रवज्रा स्याद्यद्ययंचमकेतुरीयंचेदष्टमंदीर्घमुपांत्यमंत्यं तदींद्रवज्रा
भवसंस्तववर्णहक्तान्नृपश्रीयशवंतसिंह ४१ उपेंद्रवज्रा यदींद्रवज्राचरणा
द्यवर्णोनरेंद्रसर्वेलघवोभवंति उपेंद्रतुल्यामलशीलज्ञालिन्नुपेंद्रवज्राभि
हितातदानीं ४२ उपजातिः उपेंद्रवज्राचरणेषुपन्नेष्विंद्रवज्राचरणः
प्रयुक्तः स्वछंदविन्यासवशेनवृत्तं नदोक्तमाद्यैरुपजातिसंज्ञं ४३ रथोद्धा
ता राज्परोयदिगणेनसंज्ञकोरस्ततोलघुगुरूनिवेशितो गौडवंशतिल

२ ४ ६२२

कंधुकाशिलासानंदा कविकुलैरध्योद्धता ४४ स्वागता रोगणेन च नगणेन भगणेन
यत्र द्वौ गुरू च निहितौ यदि सा स्यात् स्वागतेति यशश्वंतं नरेश स्वांमृत्तानयनयोऽन्न
तशीत ४५ दोधकवृत्तं संगरश्शंगमुक्तिश्चितिपालिसहैदसनीतमूर्तिं रूपाणे
चेद्गणत्रितयं गुरुयुग्मं दोधकवृत्तमुशंतितदानी ४६ शालिनी दीर्घौ वर्णौ
पंचषष्ठात्यरौ द्वावंत्यौ पात्यौ चेद्य्यलिर्वेदशौलैः गौडहत्वत्क्ष्मापते वंशहंसप्रोक्ता
वृत्तिः शालिनी नाम धेया ४७ हरिणप्लुता १२ विषमे सुगणत्रितयं लगवद्य
समे नगणो भगणौ च रः यशवंतमहीशनदेशोदितां कविकुलेरमलां हरिणप्लुतां
४८ द्रुतविलंबितं नगणतो भगणौ रगणस्ततौ यदि भवेद्यशवंतमहीपते द्रुतवि
लंबितमेतदुदीरितं कविवरैरमितौ विदितं हि तं ४९ तोटकवृत्तं स्वयशोधिकशोभि
तभूमिपते सगणेरिह वेदगुणैः सुमतेऽभ तोटकवृत्तमिदं विहितं ननु तेऽस्तिमुद
हृदये निहिते ५० प्रमिताक्षरा सगणाद्वादीह जगणो निहितः सगणस्ततोऽपि सगा

६

राहुर्द्रौदशाघसैसुकेतुर्भौमस्यभोगं वदेत् प्रजितंडं यस्ताग्ने क्षेत्रंसंवनसंशयः ७ ॥ षद्
द्विनं वांघवंशोक्तं प्रजितं डं विचक्षणैः स्वनाम्नाग्निह्नं जातं स्वं स्वंसु तिन संशयः ॥ ८
दशा दशाहतकार्यो परमायुर्विभाजिता अंतर्दशाप्ति केषां केविदुः स्वं सर्वतः सदा
९ ॥ दशादशा हताया द्वादश नराम हताचयात्सुगतांतर्दशाप्यास्तु विनाय्यासे नजायेत
१० ॥ दशादशा हता यद्वा चार्द्धमासा गतेभवेत् अर्द्धं द्विगुणं त्रिधुंमवेदं तर्दशाफलं
११ ॥ समाधुवा राम हता यद्वा वायनसमा हताः तन्मध्ये तर्दशा नस्य विनायासे नजायते

त

॥ १२ ॥ कृत्वा चौर्दशापिंडं परमायुर्विभाजितं ध्रुवं समा हृते यस्पष्ट स्वस्पष्ट द्विदशा
फलं ॥ १३ ॥ कवेरंतर्दशा रवेद वर्ष षसंशम च्यात दशानाथ रिनै हनाशने रा हो विंद
शेताः ॥ १४ ॥ इंदोरर्द्धितंशे चौमिस्यादाहु अंशेर वेभे वेन दशानाथ रिनैर्ध्युत मिदं केतोः

623

यत्र सर्वं फलं वदेत् द्युमान् मारकादि खरवा निच ॥३०॥ कामार्थपति संबंधी मन्को
पगि णायं कविन्त ॐ केंद्र लग्नतः कामनाथस्य च दशाथवा ॥३१॥ कोणनाथस्य
संबंधे दशास्वंतर्दशा ॐ पुत्रादीनां वदेत् जन्मसु धीर्मता ॐ सारतः ॥३२॥ इति
श्रीमहल्नीयकृष्णोकशतके द्वितीयः ॥२॥ भानुचंद्रगुरु राहोर्ज्य मंदविल्के तु भार्गवाः
जन्मर्क्षं नवशेषेतु द्विहीनेनएदे शाधिपाः ॥१॥ एतदशा नगघस्य दिसमांशं घ तिता
था अनुविंशे लक्कृत्य त्यक्तां क्रमेण कथितां बुधैः ॥२॥ मन्मंके तदशाम्यस्तं म
भोगां पूंसमादिकम् ॥ गतं भोग्यं समाख्यातं यद्वाभोग्यं समाहृतं ॥३॥ क्रान्त्वा नुसारकं मं
के स्वं दशानादिनाधनः धक्तो द्वंतं समा धेस्यात् गतमेव न संशयः ॥४॥ षडिंशद्दिवसं
मानं मासयुग्मं निशाकरः भौमः करयुग्म [illegible] वर्षाणि [illegible] ॥५॥ द्वादशा
ब्दिनं जीवः पक्षाधिकदिनं नवयाम [illegible] सप्तनिः षड्विंशतिदिनै विंना ॥६

सैका ५

यं गंधग्राहकं घ्राणं नासाग्रवर्त्ति विषयो मृत्पाषाणादिः॥ शीतस्पर्शरसवत्य आपः ता
श्च द्विविधा नित्या ऽनित्याश्च॥ नित्याः परमाणुरूपाः ऽनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रि
यविषयभेदात् शरीरं वरुणलोके इंद्रियं रसग्राहकं जिह्वाग्रवर्त्ति विषयः सरित्समुद्रादिः उ
ष्णस्पर्शवत्तेजः नित्यमनित्यंच नित्यं परमाणुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधम्॥ शरी
रेंद्रियविषयभेदात् शरीरमादित्यलोके इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति॥ विष
यश्चतुर्विधः भौमदिव्यौदर्याकरजभेदात् भौमं वह्न्यादिकं अबिंधनं दिव्यं विद्युदादि भुक्तान्न
परिणामहेतुरौदर्यम् आकरजं सुवर्णादि॥ रूपरहितस्पर्शवान् वायुः स द्विविधः नित्यो
नित्यश्च नित्यः परमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः शरीरेंद्रियविषयभेदात् श
रीरं वायुलोके इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्त्ति विषयो वृक्षादिकंपहेतुः शरीरांतः

स्पर्शाधारा युक्ता

संचारी वायुः प्राणः स एकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशम्॥
स विभिन्नेश्वरो नित्यो विभुः
तच्चैकं विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च प्राच्यादिव्यवहारहे
तुः दिक् सा चैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवश्च तत्रेश्व
रः सर्वज्ञः परमात्मा एक एव जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युपलब्धिसा
धनमिन्द्रियं मनः तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च इति नवद्रव्यनिरूपणं
इति अथ गुणाः कथ्यन्ते चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिश
चित्रभेदात् सप्तविधम् पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधम् अभास्वरशुक्लं ज
ले शुक्लं भास्वरं तेजसि रसनाग्राह्यो गुणो रसः स च मधुराम्ललवणकटुकषायतिक्तभे
दात् षड्विधः पृथिवीजलवृत्ति तत्र पृथिव्यां षड्विधः जले मधुरः घ्राणग्राह्यो गुणो गं
पृथिवीजलयोर्मध्ये

२

पः स द्विविधः सुरभिरसुरभिश्च पृथ्वीमात्रगामी वृत्ति त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः स त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथिव्यतेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च अन्येषां पाकजं नित्यमनित्यं च नित्यगतं नित्यं अनित्यगतमनित्यं एकत्वादिव्यवहारासाधारणहेतुः संख्या नववृत्तिः एकत्वादिपरार्द्धपर्यन्ता एकत्वं नित्यगतं नित्यं द्वित्वादिकं तु सर्वेषामनित्यमेव मानव्यवहारासाधारणकारणं परिमाणम् नववृत्ति तच्चतुर्विधम् अणुमहद्दीर्घह्रस्वं चेति पृथग्व्यवहारासाधारणकारणम् पृथक्त्वं सर्वद्रव्यवृत्तिः संयुक्तव्यवहारासाधारणं हेतुः संयोगः सर्वद्रव्यवृत्तिः संयोगविनाशको गुणो विभागः सर्वद्रव्यवृत्तिः परापरव्यवहारकारणं परत्वापरत्वे ते द्विविधे

पृथिव्यादिचतुष्टय
जो २
रूपरसगंधस्पर्शानि
ताम

ॐ
तर्क
२

628

दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वं ज्येष्ठे कालकृतं परत्वं
कनिष्ठे कालकृतमपरत्वं आद्यपतनासमवायिकारणं गुरुत्वम् पृथ्वीजलवृत्तिः
आद्यस्यन्दनासमवायिकारणं द्रवत्वम् पृथिव्यप्तेजोवृत्तिः तद्द्विविधम् सांसिद्धि-
कं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथ्वीतेजसोः पृथिव्यां घृतादावग्निसंयो-
गजं द्रवत्वं तेजसि सुवर्णादौ अग्निसंयोगजं द्रवत्वम् स एव नैमित्तिकं चूर्णादिपिं-
डीभावकरणहेतुर्गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्र-
वृत्ति स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः सं-
स्कृतभाषारूपः सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः सा द्विविधा स्मृतिरनुभवश्च संस्का-
रजन्यं ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकार-

पे

यथार्थस्य तद्वति तत्प्रकारकं अयथार्थस्य इति

रामचंद्राय कृष्णायनमः

गद्यारत्नानि। दानं चतुष्टयं ग्रहिणा किमर्थं दीयते। यतिनो सो हे देव। आहारदानेन देहस्थितये दीयते अत एव आ
हारदानं मुख्यं। येनाहारदानं दत्तं तेन सर्वाण्यपि दानानि दत्तानि। तथा चोक्तं। उरगतुरगसहस्रं गोकुलं भूमिदानं। क
नकरजतपात्रं मेदिनीसागरांतं। सुरयुवतिसमानं कोटि [illegible] कन्यादानं न हि भवति समानं अन्नदानात्प्रधानं। १ औ
षधदानमपि दातव्यं। येन रोगग्रस्त निर्भवति तत् दोषधदानं [illegible] विनाशो स तिततपोजपोसंजमं च करोति। पुनः कर्म
क्षयं [illegible] मोक्षं गच्छति ततपश्चात् तेन कारणे [illegible] न औषधदानं दातव्यं। तथा चोक्तं। रोगिभ्यो भेषजं देयं रोगा
दे हविना शाकादिरूपादो कृतं ज्ञानं ज्ञानात्ता [illegible] त्तेन निर्वृतिः। १ द्वारवत्यां वासुदेवेन औषधदानेन तद्दारकस्य
[illegible] तेन औषधदानफलेन तीर्थकरगोत्रं नाम कर्मोपार्जितं। अत एव औषधदानमपि श्रेष्ठं। अभयदानम
पि [illegible] एकं जीवं रक्षति मः सर्वे दानि तेभ्यो भवति किं पुनः सर्वान्। तथा चोक्तं। [illegible] सर्वे दा दानं अलयेस वे दि
[illegible] अस्मिन् भवे जीवो निर्भयो भयदानतः। अन्यच्च। यो दद्यात्कांचनं मेरुं कृत्स्नां चापि वसुंधरां। एकस्य जीवि
तं दद्यात् [illegible] न च समं भवेत्। ३ गादाने हिरण्यदाने भूमिदानेन च। एकस्य जीवितं दद्यात् फलेन समं भवेत्। ४
अन्नादीयं [illegible] अलयोक्षु [illegible] तदेव केवले कथायुक्ता जीवदयां वि [illegible] पात्राय दानं ददाति तद्दानं नि

नराश्चैराट्नरायणाय्रहिणसेषामुक्तनावनातावातुतमोत्नोकानाशीलंपरिपालयेति।य्रहिणस्तमेतप्रानस्मा
श्रा[illegible]मनिरसतोहलधियातेषानसद्भावना।इत्येवंनिपुणेनरूतमनसासम्यग्मयानिश्चितं।नोत्तारोस्तवकृ
[illegible]दादानावलवात्परः॥१॥एतएवमुनीनांदानेदातव्यंमुक्तेःकारणंतएवास्तदंति।य्रहिणःतमोवोस्तां॥
[illegible]सुरासुरेंद्रमहितंमुक्तेःपरंकारणं।रत्नानांददतित्रयंत्रिभुवनप्रद्योतकाः।येसतिवृत्तिस्तस्ययदत्ततःपरमयात्त।
[illegible]पितानायतान्तेषांतरूहमेधिनांगुणवतांध म्मोनिकस्यप्रियः॥ततदानंतरंकरोमुकुलीकृत्यविस्वत्तितिद्धिजं
वतिराजान्तस्तितिविस्मृतेमुनिदत्ताहारदा नफलेममाहंप्रयच्छाममवक्तुसुवर्णयज्ञफलादेवांदत्तापवि
[illegible]तिनात्तानितेनाराजन्स्वयादिकंयेनद नेनसाध्यतेतदानेकवदायते।राजोक्तं।वेदरिद्रोवांस्थितमवं
गृहेवामुनिदत्ताहारदानफलाईदीयतेविमृतितिनात्तानि।नात्पतोदरिद्रपीडितोपिसत्पुरुषानीतिंपरित्यज्य
[illegible]न्यथाकरोतिकिं।तमोवोस्ता।कुत्सामापिरयान्वितोपिसिथिलप्रायोपिकष्टोदशामापंनोपिविपन्नदीधितिरपिप्राणे॥
[illegible]नउपस्थपिमत्तेतेंडविलिन्नकुंभदंलनयासैकवद्धस्पृटः।किंजीर्णहृणमत्तिमानमहतामग्रेसरःकेशरी॥७॥तत
वन्मायोपवर्गसाधकं।आहारस्तयसेपघ्वासंवमितिदामेनचतुर्थयंडविलावंचविक्रीयते।ततोमुनिनावसमीपे

ऽसपक्षं च साध्यविपक्षाश्च विपक्षे दृष्टान्ता हेतवश्च विरुद्धा यथैते ॥ व्यापकत्वं नामानिर्वचनीयत्वं दृष्टान्तत्वं नाम चेतनस्य
विषयत्वं श्रुतेनानवगतार्थाव्यभिचारः न चाऽनुमानमेवास्ति रूपमेकमेवान्यत्केवलान्वयि श्रुतस्यान्यनेव ।
व्यतिरेकिसमर्थस्याऽन्यत्ताभावप्रतियोगित्वेनानवस्थानियोगित्व रूपकेवलान्वयित्वस्याऽप्रसि-
द्धेः नापि व्यतिरेकि साधनेन साध्यानुमितौ साध्याभावसाधनाभावव्याप्तिज्ञानस्यानुपयोगात् व्य-
न्वयव्याप्तिमविदुषः साध्यप्रमाया अपि प्रमाणान्तरैरिति वक्ष्यते साहचर्यग्रहणनिरूपमिति । वाक्य-
करणिका प्रमा शाब्दी शाब्दं हि योग्यतासन्निधिमत्पदसमभिव्याहृतं वाक्यं अयं च यानपणनिरोधको ।
ऽनन्वयार्थः व्याघातो योग्यता अविलम्बेनोच्चारणं सन्निधिः अन्यस्य तत्संगतिग्रहस्तु आकाङ्क्षा
वाक्यप्रमा । पदपदार्थयोः स्मार्यस्मारकभावः संगतिः सा च द्विधा शक्तिर्लक्षणा चेति शक्तिर्नाम
मनुष्यानुगतिः पदपदार्थयोर्वाच्यवाचकभावः संबन्ध इति यावत् सा च द्विधा योगो रूढिश्चेति

पदोत् पक्षतारतम्यतया =१ पदोस्माद्योपसंहारोनिगमनम् =१ जीवब्रह्मणोरैक्यसाधकानुमानं वाक्येनैकदेशं ब्रुवन्नाह तत्र पञ्चावयवेति =१

साध्यविशिष्टधर्मिप्रतिपादकं वाक्यं प्रतिज्ञा =१ पक्षधर्मता वाचकं पंचम्यंतः शब्दो हेतुः =१ लीनमर्थं गमयतीति लिंगं ... साध्यसाधको हेतुर्लिंगशब्दवाच्य इत्याह इदमितीति =

प्रत्यक्षादिविभागदर्शयति जीव इति =२

ननु स्वात्मनः सच्चिदानंदलक्षणत्वं तत्र किमित्युच्यते अनुभवसिद्धमतः कारणदेहात्मत्वेन सच्चिदानंदलक्षणत्वमनुभवसिद्धमतः कारणदेहात्मत्वर्थः =५=

ननु व्यापकता च्छेदकपक्षधर्मताज्ञानेन व्याप्त्यनुभवः ... ते के वा विद्वांसो ...

रूपा उदाहरणोपनयनिगमनरूपा वा। तथाहि जीवः परस्मान्नभिद्यते सच्चिदानंदलक्षणा-
णत्वात् परमात्मवदित्यत्र जीवः परस्मान्नभिद्यत इति प्रतिज्ञा सच्चिदानंदलक्षणत्वं हेतुः।
इदमेव लिंगमित्युच्यते यः सच्चिदानंदलक्षणः स परस्मान्नभिद्यते यथा परमात्मेत्युदाहर-
णं शुद्धं ब्रह्मास्मीति भावयामीति करणप्रयोगेन भवामीत्यनेन भवा जीवस्य सच्चिदानंदलक्षणा-
त्वं श्रुतौ न हेतुत्वसिद्धिः सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानादित्यादिश्रुत्या ब्रह्मणः
सच्चिदानंदलक्षणत्वं श्रुतौ न दृष्टांतासिद्धिः एवं च स्वमतत्वश्रुतिवेदांतस्य शोधितत्वं पदार्थस्य
स्वस्मिन् सच्चिदानंदलक्षणादर्शनात् अहं ब्रह्मेति ब्रह्मामि त्वमिति रूपेण न च श्रोत्रोपनिषदस्य
ब्रह्मैकस्य श्रवणमाननत्वान्नोपपत्तिः मंतव्य इति मननविधानात् वेदांतसहकारित्वेन श्रुत्यनुमा-
नयोर्मार्गस्वीकारात् परार्थानुमितिरत्र न्यायोपदेशेनोत्पद्यते न्यायोदाहीनः एवं ब्रह्मसत्यानि तिरि।

सिद्धे जीवस्य ब्रह्मत्वे अभावात् परमते तस्य ज्ञानस्वरूपत्वेन सच्चिदानंदलक्षणत्व साध्याभावात् दृष्टांता सिद्धिरिति मां कश्चित् ... पार्थिकः भेदाभावेऽपि जीवपरयोः ... सच्चिदानंदलक्षणत्वे ... वदन्ति ...

ब्रह्मणि आत्मनः ... अनुभवामि ... इति भावः ४=

ननु तत्रोपनिषदं पुरुषं ... धर्मविद्वत्त्वेऽपि वेदैकगम्यता ... नेक ... गम्यत्व ... =२ चेति =३

शविस्तारइत्यत्रकथितः अर्थात् साक्षाद्धरिणो दशरथादी
नांपुत्रपौत्रप्रपंचः तथाचवक्तुःकथनसामर्थ्याद्भूतंभविष्यंच
वृत्तंसर्वंकथनसमयेमस्यसंभवतीति वाल्मीकिविरचि
तरामायणादावुक्तं एवंनारदादिष्वपि परंत्वयमनुभवो
भक्तानांसहृदयानांचैव ननुकथनेन कायापश्चारिणांभि
क्षूणांदरिद्राणां किंचसन्क्रियादेशकालौच शौचंअश्वरा
संपदः पंचैतान्विस्तारोहन्तितस्मान्नेहेतविस्तर मितिमनुव
चने कथनस्यवरणरूपार्थाभावेपिविस्तरइतिप्रयोगोदृश्यते
एवंब्रह्मणोमानसःपुत्रोगोपतिर्नाममानवः तस्यवंशा
स्यविस्तारंक्षमोवक्तुंनरःकथमितिभविष्यपुराणस्यश्लो
केकथनरूपार्थेपिविस्तारइतिप्रयोगस्यदर्शनात् अथ
वाकेवलात्स्तृधातोर्घञ्प्रत्ययेकृते पश्चाद्विशब्दयोगे वि
स्तारइतिप्रयोगोभवतिसचसमुदायशक्त्याविस्तृतरूपा
र्थस्यबोधकः ततोवंशशब्देनसमासः अथाचवंशविस्ता
रइतिसाधुप्रयोगोजायते अथवायथामहाभारतेचक्र
वत्परिवर्तनंगृहीत्वापाणिनाकरमितिश्लोकेपरिवर्तनेत
मित्यत्रपुंस्त्वतङ्भावश्चार्षः एवमत्रापिवंशविस्तारइ
त्यार्षप्रयोगः एवंचकथितोवंशविस्तारोभवतेस्मत्प्रभो
वैतिकस्यचिज्जन्मांधस्यकथनमेवाशुद्धमिति ॥ ९ ॥

निगमकल्पतरोर्गलितमित्यादि अत्रवेदतिरस्
कृताहिपतितमितिविरुद्धोगलितमित्यत्रबुधम्

एकादशीद्वे पंचम्योवात्रासम्बद्धमेव श्रृणुतेति
वक्तृभ्येपिवनेत्यशुद्धमेव ॥

निगमकल्पतरोर्गलितं फलमितिश्लोके श्रीमद्भागवतस्य
महापुराणस्य वेदकल्पवृक्षस्य फलरूपत्ववर्णनेनास्य वे
दरूपत्वं प्रतिपादितं वेदशब्दः ऋगादीनामिव पुराणा
दीनामपि वाचकः तदुक्तं सामसु कौथुमीशाखायां छा
न्दोग्योपनिषदि ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदम
थर्वणं चतुर्थमितिहासं पुराणं पञ्चमं वेदानां वेदमित्यादि
मनुः इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति नह्यवेदे
न वेदस्योपबृंहणं भवति नह्यपरिपूर्णस्य कनकवलयस्य त्र
पुणा पूरणं युज्यते पूरणात्पुराणमिति चान्यत्र भवि
ष्यपुराणे ऋग्यजुःसामाथर्वाख्याः काव्यं रामायणं तथा।
भारतं पंचरात्रं च वेदा इत्येव शब्दिताः पुराणानि च सर्वाणि वै
ष्णवानि विदो विदुः स्वतःप्रामाण्यमेतेषां नात्र किंचिद्वि
चार्यत इति पुराणादीनामपि ऋग्वेदादिवदपौरुषेयत्वं।
माध्यंदिनश्रुतावुक्तम् एवं वा अरेस्य महतो भूतस्य निश्व
सितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोथर्वांगिरस इतिहा
सःपुराणमित्यादि अपरार्के मत्स्यपुराणे मत्स्य उवाच
पुराणं धर्मशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् अनंतरं च
वक्त्रेभ्यो वेदा अस्य विनिर्गताः पुराणमेकमेवासीत्तस्मि
न्कालांतरेपि च त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं

तदर्थोऽत्र चतुर्लक्षे संक्षेपेण प्रदर्शितः पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते नाम तस्तान्प्रवक्ष्यामि शृणुध्वमृषिसत्तमा इत्यादि शिवपुराणस्य वायवीयसंहितायाम् संक्षिप्य चतुरो वेदांश्चतुर्धा व्यभजत्प्रभुः व्यस्तवेदतया लोके वेदव्यास इति श्रुतः पुराणमपि संक्षिप्तं चतुर्लक्षप्रमाणतः अद्याप्यमर्त्यलोके तच्छतकोटिप्रविस्तरमिति एवं चात्र वेदनिन्दाकृता ही तिकस्यचिद्विदिप्तस्य कथनमेव अत्र गलितमिति पदं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया ग्रानैरखंडमेवावतीर्णं न तु त्रुटित्वा निपातेन स्फुटितमित्यर्थकम् अत्र शब्दश्लेषेण च भागवतं रसं नाम भगवत्संबंधिरसमिति ज्ञेयम् तत्पक्षे गलितमित्यनेन तस्य सुपाकिमत्वेनाधिकस्वादुत्वं दर्शितम् शास्त्रपक्षे सुनिष्पन्नार्थत्वेनाधिकस्वादुत्वमिति ज्ञेयम् एवं च पतितमिति वक्तव्ये गलितमित्यशुद्धमिति कस्यचित्प्रमत्तस्य कथनमेवाशुद्धम् निगमकल्पतरुपदो जरवर्त्तिनी याषष्ठी तस्याः फले ऽन्वयः सुकमुखादिति पंचम्याः गलितमित्यत्रान्वयः एवं च स्कन्धषष्ठी हि पंचम्यो वात्रासम्बद्धमेवेति कस्यचित्कथनमेवासंबद्धम् शास्त्रपक्षे यतः श्रीमद्भागवतं रसात्मकफलस्वरूपमतः पिबत एवं लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपंकजमित्यत्र यदीयानां

नेनेतिशेषः

वाचामसतमयमात्वामभिरसमित्यादावपिज्ञेयम् भगव
त्संबंधिरसपक्षेतुरसस्यपानमेवसंभवत्यतआह पिबत
इति इत्यंचमत्वानेनिवक्तव्ये पिबतेत्यशुद्धमेवेति क
स्यचित्कथनमेवाशुद्धम्

नेमं विरिञ्चिर्नभवोनश्रीरप्यंगसंश्रया प्र
सादंलेभिरेगोपीयत्तत्प्राप विमुक्तिदात् ॥१॥
अत्रैकोनकारःसार्थकोद्वावनर्थकौस्तोनिं
दाचकृताब्रह्मादीनांदेवक्यादीनाञ्च ॥ ० ॥

अत्रइमंपूर्वोक्तंप्रेमपरीपाकरूपंप्रसादं नविरिंच्यः
प्रापनभवःप्रापनश्रीरपिप्रापेत्यर्थः अथवागोपी
यत्तत्प्रापतद्रूपमिमंविरिंच्यादयोनलेभिरेनलेभिरे
नलेभिरे नञत्रयवशेनक्रियावृत्तिः अथवानेमशब्दो
ऽर्द्धवाचकः तदुक्तंसिद्धांतकौमुद्यांनेमइत्यर्द्धसमःस
र्वपर्य्यायइति तथाचविरिंच्यादयोनेममर्द्धमपूर्णंप्र
सादंनलेभिरे नअपितुलेभिरएवगोपीत्वित्यादिव्या
ख्येयम् अत्रैकोनकारःसार्थकोद्वावनर्थकौस्तइत्यु
क्तकथनमेवानर्थकम् अत्रयशोदायाःशुद्धवात्स
ल्यभावेनपरमोत्कर्षवर्णनम् नतुदेवक्याऐश्वर्य्यसंव
लितभावेनअशुद्धवात्सल्यभावः ब्रह्मादीनांनरा
कारपरब्रह्मणिनवात्सल्यभावः इत्थमेवप्रेम्णाथ
परमाकाष्ठाप्राप्ता परित्यागावधिविरहासहिष्णुता

रूपेत्यादि मधुसूदनसरस्वतीभिरुक्तम् आदिपुराणे च तेनैव ब्रह्मादयो देवा वांछन्ति मदनुग्रहम् प्रयत्नेना । सां गोपीनां प्रेमानुग्रहवांछकः भावानुरूपं सर्वत्र पा र्थ व्यवहराम्यहम् किंतु तासु व्रजस्त्रीषु परिकीनं वां निष्कामिति एवं च निंदाचक्रुनेत्यादिकं कस्य चि । न्निन्दकस्य कथनमेवेति

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविं
द विमुखाच्छ्वपचं वरिष्ठम् अत्र ब्राह्मणा
निंदाकृता अव्यक्तं व्यक्तिमापन्नं मन्यंते
मामबुद्धयः अस्माद्विरुद्धत्वादसुरोऽपि ।

अत्र भगवद्भक्तानां माहात्म्यवर्णने भक्तिहीनानां निन्दने च नाश्चर्यम् न ब्राह्मणनिन्दने एवं पद्मपुराणे ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः विष्णुभ क्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः चांडालोपि म । निश्रेष्ठो विष्णुभक्तिपरो यदि विष्णुभक्तिविहीनस्तु द्विजोपिश्वपचाधमः इति क्रियायोगसारे जैमिनिं प्रति व्यासवाक्यम् यस्मिन्कुले द्विजश्रेष्ठ जायंते वै ष्णवा जनाः उत्तमं वानुत्तमं वा तत्कुलं मोक्षगामि चे ति शंकराचार्यधृतकात्यायनवचने च वरं हुतवह ज्वालापंजरस्यान्तर्व्यवस्थितिः न शौरिचिंताविमुख जनसंवासवैशसमिति नारदीये रुक्मांगदं प्रति ब्राह्मण

देववाक्यम् श्वपचोपि महीपाल विष्णुभक्तो द्विजाधिकः
विष्णुभक्तिविहीनोपि यतिश्च श्वपचाधिक इति एवं चा
त्र ब्राह्मणानिंदाकृतेति कस्यचिन्निंदकस्य कथनमेवे
ति कृष्णरूपेण प्रादुर्भूतं मां पामरा अव्यक्तं मन्यंत इत्य
र्थः अनंतफलायाहोरवलुकष्टं वर्तत इत्यनुक्रोशान्द
र्शयति भगवान् किंनिमित्तं त्वामेव न प्रपद्यंत इत्युच्यते
अव्यक्तमिति अव्यक्तं अप्रकाशं व्यक्तिमापन्नं प्रकाशं
गतमिदानीं मन्यंते मां नित्यप्रसिद्धमीश्वरमपि संतमबु
द्धयोऽविवेकिन इति शंकरभाष्यम् उक्ते वैपरीत्ये कारणा
मविवेकातिरिक्तं नास्तीत्यभिप्रेत्याह अहो खल्विति ।
भगवद्भजनस्योत्तमफलत्वेपि प्राणिनां प्रायेण तन्निष्ठ
त्वाभावे प्रश्नपूर्वकं निमित्तं निवेदयति किंनिमित्तमि
त्यादिना अप्रकाशं शरीरग्रहणात्पूर्वमिति शेषः इदा
नीं लीलाविग्रहावस्थायामित्यर्थः प्रकाशस्य नहि का
दाचित्कत्वं भगवति प्राप्तं नेत्याह नित्येति कथं तर्हि सा
दितट्टीका एवं च अस्माद्विरुद्धत्वादशुद्धोपीति कस्यचि
त्पामरस्य कथनमेवाशुद्धमिति ॥ ॥ ॥

कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना
पशुघ्नात् अत्र वेदविहितकर्मकर्तॄणां निन्दाकृता अ
र्थाद्वेदानामपि नास्तिको वेदनिन्दक इत्युक्तं मनु
ना अतएवायं भागवतस्यास्य कर्त्ता नास्तिकः

ऽत्रभगवत्कथामाहात्म्यवर्णनंतद्विमुखानांचनिन्दनं
कृतम्वायुपुराणेस्कन्दपुराणादौचैतद्विस्तरेणकथितं
तत्रैवावलोकनीयम् योगोऽग्नतंकनकश्रृंगमयंददातीं
त्यादौ चरितंरघुनाथस्येत्यादावपितथैवोक्तम् ऽत्रवेद
विहिनेत्यादिकथनंतुकस्यचिद्दुष्टस्यैव यतोवेदव्यास
स्यवेदरूपस्यास्यश्रीमद्भागवतस्यचायंनिन्दकोऽतो
मनुवचनान्नूनमयंनास्तिकएवेति ॥ ॥ ॥

यद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लो
कमबद्धवत्यपि॰ऽसम्बद्धोयंश्लोकः ॥

ऽत्रापशब्दादियुक्तेपिवाचांप्रयोगेयस्मिन्भगवतोना
मानिसंति सकलमघघ्नः चित्रपदादियुक्तेपियत्रभगव
तोनामानिनसंतिसतुनपापघ्नः लौकिकभाषायामपि
भगवतोनामकीर्त्तनादिकं पापनिवर्त्तकमितितदुक्तं
मात्स्यदंष्ट्रिदंष्ट्राहतोम्लेछोहारामेतिपुनःपुनः उक्त्वा
मुक्तिमवाप्नोतिकिंपुनःश्रद्धयागृणन्निति इत्थंचास
म्बद्धोयंश्लोकइतिकस्यचिद्दुर्जनस्यकथनमेवासम्ब
द्धमिति

व्यासनारदसंवादेव्यासस्यापिनिंदाकृताव्यासः
शोकातुरोऽभूत्तत्रनारदऽप्रागतः पुनर्नारदेन
बोधितइतिव्यासस्तुनारायणावतारस्त
स्यकथंशोकःसंभवेत्

ऽत्रप्राधान्यतोभगवद्यशोऽवर्णनेनव्यासस्यशोकानु रत्वंकात्वन्येषांवार्त्ता नारदेनभगवद्भक्तिवर्णनेप्रेरितो व्यासस्तद्वर्णनेनविशोकः सन्परमानन्दंप्राप्तवान् ऽतोभगवद्भक्तिः शोकनाशिनी ब्रह्मज्ञानादपिप रमानंददायिनीतिनाश्चर्यम् किंच यथामहाभार तेपुत्रवियोगेनव्यासस्य शोकानुरत्ववर्णनम् यथावा वाल्मीकिविरचितरामायणेरघुनाथस्यसीताविरह जदुःखेनशोकानुरत्वकथनंमनुष्यदेहधारणेन त थवेहारनटनाभिप्रायेणातद्वदत्रापिज्ञेयम् यथावा वाल्मीकिविरचितरघुनाथचरितेयुद्धकाण्डयुद्धपरि श्रांतंचिंतयास्थितंरामंप्रत्यगस्त्योपदेशोलोकानुग्र हाय एवमत्रनारदोपदेशोपिलोकशिक्षणायैवेतिज्ञे यम् एवंचात्रव्यासनिंदाकृतेतिकस्यचिन्निन्दकस्य जन्मांधस्यशाउस्यैवकथनमिति ॥ ० ॥ ० ॥ ० ॥

भस्मासुरकथायांशिवस्यापिनिंदाकृताभस्मासु रभयाच्छिवः कैलासंविहायवनंगतवान्पुन र्विष्णुनारक्षितइतिकस्मादपित्रैलोक्येभयंन संभवतिशिवस्ययदिकश्चिद्ब्रूयात् दत्तवराय भस्मासुरायदण्डनदत्तवानितितर्हिरावणा यदत्तवरायशिवेनदण्डः कथंदत्तः यस्यक्रो धलेशेनसर्वंपंचभूतात्मकंजगद्भस्मीभूतं

भवति तस्य भयं कर्त्तुं कः समर्थः पुमान् भवेत्
अत्र सत्वं ततो विष्णोरुपासनया जीवानां श्रेयांसि नेतरे
षां देवानामुपासनयेति विष्णोरुत्कर्षवर्णने चेतितात्प
र्य्यम् तदुक्तमादिपुराणे नजानाति नरो मूढः किं देवैः
सेवितैः सुखम् खलांगूलं समाश्रित्य को हि तीर्णोऽम्बु
धेर्ज्जलम् येऽधमाः पापकर्माणो देवतान्तरसेवकाः
कामिनो विष्णुविमुखास्तेयान्ति नरके ध्रुवम् पतिंत्य
क्त्वा यथा नार्य्यो जारं सुखलवेच्छया भजन्ति लोके निं
दान्ताः प्राप्नुयात्यधमां गतिं देवाश्च कर्मसचिवाः के
वलं न हितेरताः अपराधे हृतेऽप्येवै देहद्रविणनाश
काः येर्यैः संसेविता देवास्तेवतेषां सुखं ध्रुवम् सदैवस
र्वैसंसेव्य पशुरेवाण्णोभवत् शिवसेवां समासाद्य क्षयं
प्रापवृकासुरः वाणो वाहुसहस्त्रस्य नाशं कस्मादवा
पह विश्वरूपः सुरपतिं संतोष्य निधनं गतः आराधन
विरोधाभ्यां देवैर्नाशो हि दृश्यते विपरीतमिदं विष्णावु
भाभ्यां मुक्तिभाग्भवेदिति एवं भगवदुपासनयैव निः
श्रेयसाधिगमो जीवानां न देवतान्तरोपासनयेति हरिवं
शे काशीखंडे च घंटाकर्णकथाप्रसंगे स्पष्टमेवोक्तं वि
स्तरेण तत्रैवावलोकनीयमिति महाभारते व्यासवा
क्यम् आलोड्य सर्वशास्त्राणि विचार्य्य च पुनः पुनः
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति हरिवंशेम

हरिदेववाक्यं हरिरेकः सदाध्येयो भवद्भिः सत्वसंस्थितैरिति पाद्मे यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः समत्वेनैव वीक्षेत स पाषण्डी भवेद्ध्रुवमिति स्कांदे शिवशास्त्रे युत ग्राह्यं भगवच्छास्त्रयोगियदिति आदिवाराहे ।
जन्मांतरसहस्त्रेण समाराध्य वृषध्वजम् वैष्णवत्वं लभेद्धीमान् सर्वपापक्षये सतीति सत्वैकस्वभावस्येश्वरस्य नंदनंदनविग्रहे ऽतिशयेन सत्वमभिव्यक्तं अतएव तस्मिन्निरतिशयं धर्मज्ञानवैराग्यैश्वर्यादिकमस्ति कामक्रोधाऽभिमानिदेवताविग्रहे तु सत्वं तिरोभूतम् औपाधिकं लोभप्रवृत्यादिकं प्रमादमोहादिकं चाविर्भूतमितिमहाभारतटीकायामिति नृसिंहतापिन्यां रुद्रजापकशतमेकमथर्वांगिरसशिखाध्यापकेन तत्समं अथर्वांगिरसशिखाध्यापकशतमेकं मंत्रराजाध्यापकेन तत्सममित्याद्यनेकवचनानां च विष्णोरुत्कर्षवर्णनेनाश्चर्य्यम् न तु शिवनिंदने निरतं तु सर्वथा परिहर्त्तव्यमेव तदुक्तं भगवतायो मां समर्चयेन्नित्यमेकांतं भावमास्थितः विनिंदंदेवमीशानं स याति नरकं ध्रुवमिति भस्मासुरभयाच्छिवस्य पलायनं तु विषवृक्षोपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायेन एवं श्रीभगवतः कृष्णस्य कालयवनात्पलायनादावपि बोध्यम् कैलासोत्पाटने दत्तवरायरावणाय शिवेनयोदत्तोऽदत्तः

मनुरावणस्य हितार्थेवेति ततः प्रीतो महादेवः शैलाग्रे वि
हितं प्रभुः मुक्त्वा चास्य भुजान्रामः प्राह वाक्यं दशानन
म् प्रीतोऽस्मि तव वीरस्येत्यादि वाल्मीकि रचित रामचरित्र
स्योत्तरकाण्डस्य श्रुतम् अथ च भस्मासुर भयात्पला
यनं रावणस्य दण्डदान मिति स्वतंत्रेच्छस्य नियोगपर्य्यनु
योगानर्हस्य महादेवस्य इच्छैव नियामिकेति बोध्यम्
इत्यं च भस्मासुर कथायामित्यादि कथनं कस्यचिन्म
हामूर्खस्यैवेति ज्ञेयम् ॥

वाणासुर कथायामपि शंकरस्य निंदा कृता
कृष्णेन शंकरः पराजित इति कोपि शंकरं
पराजेतुं समर्थो नास्ति

अत्र श्रीकृष्णात् शंकर पराजय वर्णनं एवं वाल्मीकिरा
मायणस्य बालकाण्ड तदा तु देवताः सर्वाः पृच्छंतिस्म
पितामहं शितिकण्ठस्य विष्णोश्च बलाबल निरीक्षया
अभिप्रायं तु विज्ञाय सदेवानां पितामहः विरोधं जनया
मास तयोः सत्यवतां वर विरोधे तु महायुद्धमभवद्रोमहर्ष
णम् शितिकंठस्य विष्णोश्च परस्पर जयैषिणोः तदा तु
जृंभितं शैवं धनुर्भीमपराक्रमम् हुंकारेण महादेवस्तं
भितोऽथ त्रिलोचनः देवैस्तदा समागम्य सर्षिसंघैः स
चारणैः याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ जृंभितं
तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः अधिकं मेनिरे विष्णुं

देवाः सर्षिगणास्तथेत्यादिभिः समरेऽशंकराद्दिष्मोरा
धिक्यवर्णनमस्त्येवेति एवं महाभारतस्य शांतिपर्वणापदि इ
त्यं च बाणासुरकथायामित्यादि कथनं त्वज्ञानमूलकमेवेति

गृहस्थानामपि निंदाकृतेति कपोतगुरुकरणकथा
यां गृहस्थाश्रमो ऽश्रेष्ठ इति यथा नदीनदाः सर्वे सा
गरे यांति संस्थितिम् तथैवाश्रमिणः सर्वे गृहस्थे
यांति संस्थितिम् श्रेष्ठ एव गृहस्थाश्रमो व्यवहा
रे ऽतो ऽश्रेष्ठ इति कथनं यत्तत्स्वमतगीतमेव ॥

ऽन्याश्रमांतरसाध्यं ज्ञानं गृहस्थेन साधयितुं शक्यं न तु गृहस्थे
न साध्यं यज्ञादिकं ऽन्याश्रमांतरेप्यस्तीति कृतत्त्रेऽधर्मो गार्ह
स्थ्य एव प्राप्यते संन्यासिनां गृहस्थगृहे विहितं भोजनादि
कं गृहस्थः स्वात्मानमन्यांश्च पित्रादीन्तारयति यतींश्च
पुष्णाति यतिस्त्वात्मानमेव तारयति न पित्रादीन् पोषणं
च स्वस्यापि न करोति भिक्षोपजीवित्वादतो गार्हस्थ्यमेव
श्रेष्ठमिति महाभारतादावुक्तम् सर्वाश्रमानुपादाय स्वाश्र
मेण कलत्रवान् व्यसनार्णवमत्येति जलयानैर्यथार्ण
वमित्यादि वाक्यैः श्रीमद्भागवते च परं च तत्र गृहासक्ति
र्न कार्या कपोतगुरुकरणकथायाः गृहासक्तिस्तिर
श्चामप्यनर्थहेतुर्मनुष्यस्य त्विति निंदितेति तात्पर्यमि
ति इत्यं च गृहस्थानामपि निंदाकृतेत्यादिकं कस्यचि
द्भिक्षुकपरास्यवान्ताशिनः कथनमसंबद्धम् ॥ ० ॥

कृष्णस्यापि निंदा कृता रासमण्डलचीरलीला कथायाम् परस्त्रीभिर्लीलां कृतवान् कृष्णः नग्न दाराहरणं चेति अदत्तानामुपादानं हिंसा चैवा विधानतः परदारोपसेवा च शारीरं त्रिविधं स्मृतं पापमिति शेषः नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियमित्याह भगवान्मनुः अस्मा द्विरोधाल्लोकविरोधाच्च प्रमत्तगीतमेतत् ।

रासलीलावर्णनम् ब्रह्मवैवर्त्ते गर्गसंहितायां पद्मपुराणे आदिपुराणे विष्णुपुराणे हरिवंशे आदिवाराहे बृहद्गौतमीयतंत्रे गौरीतंत्रे अग्निपुराणे विष्णुतंत्रे गोपालतापिन्यां ब्रह्मसंहितायां कृष्णयामले विष्णुयामले तथान्येष्वार्षग्रंथेष्वस्ति तथा मधुसूदनसरस्वतीकृतभगवद्भक्तिरसायने आचार्यकृतप्रबोधसुधाकरे माधवपुरीविष्णुपुरीप्रभृतिग्रंथेषु तथा गीतगोविंदप्रभृतिकाव्येषु मुरारिनाटकादिषु तथा धर्मशास्त्रनिबंधेषु क्रमदीपिकादिमंत्रशास्त्रग्रंथेष्वस्त्येव किंच शंकराचार्यैः गोपीमण्डलगोष्ठीभेदमिति गोविंदाष्टके गोपीनां मंडलं समूहस्तेन सह गोष्ठीभेदः क्रीडाविशेषो यस्य स तथोक्तस्तं रासक्रीडारतमित्यर्थ इति तट्टीकाकारेण च रासलीला वर्णिता एवं तत्रैव स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं व्यादित्संतीरपदिग्वस्त्रा ऽऽपादा

नुमुपकर्षतमिति स्नानार्थं जलक्रीडार्थं व्याकुला: सं
भ्रान्ता योषितस्तासां वस्त्रमुपादाय स्वीकृत्य अगं वृक्षं ।
अगं वृक्षवत्लीलाकदंबवृक्षमधिरूढमुच्यतइत्या
गमवचनात् कीदृग्विधमित्याह दिग्वस्त्राइतिदिगंब
रा: अतएव वस्त्रं व्यादित्संती: विशेषेणादातुमिच्छं
ती: तायोषित: उपसमीपे आकर्षतं स्वनिकटमान
यंतमित्यनेन चीरलीलाते: प्रतिपादितेवेति स्मृति
कारोक्तपरदारोपसेवनादिकं मनुष्याणां पापावहंन
तुदेवानां तदुक्तं महाभारततात्पर्यविनिर्णये ननुवेद
विरुद्धमेकस्या बहुभर्तृता नैकस्यैव बहवो नैका द्वौ
पतीइति च श्रुती नैकस्यैव बहवस्सह पतयइति तस्मा।
न्नैकाद्वौपती विंदते इति च विशेष: अग्नीन्यं चक्रमा
सप्यहव्यमेति मनुष्यतां अग्नयस्त्वग्निरर्क: क्ष्मापु
रुषोयोषिदित्यपि अग्नौ प्रास्ताहुति: सम्यगादित्य
मुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंतत: प्रजा:
द्रोणो वह्निश्चतुष्को स्यायोषिदग्नेरभावत: अग्नित्र
यो स्थितासीत्ता भूत्या पित्रोरभावत: अग्निद्वयो स्थितादे
वानस्पृशंतिक्षितिं हिते देवजा: पार्थमाद्रेयाभूद्युम
राप्यग्निवर्जिता: एकाग्निजातो वसुतो द्रुपदस्य सुराधि
को सर्वे सर्वात्मका देवा विराजो वयवा यत: सर्वे एवस
मा: सर्वेनंता इति हिवेदगी: नतेषां व्यभिचारोस्तिनचे

त्सूर्य्यमौकथं पितापुत्रौसतीं कुंतीमुपेयातां सुरोत्तमौ ।
द्रौपदीं देवजां पार्था देवजा यदि भुंजते नतेषामत्र दोषो
स्ति देवा एव हि ते स्वयम् अपि तेन हि वै देवान्पापं गच्छति
सर्वथा तस्माद्यज्ञैर्देवभावं प्रार्थयीत निरेनसं एते देवा
हि के व्यासो नानाख्यानोपबृंहणैः दर्शयामास लोका
नां संशयस्यापनुत्तय इति एवमात्मज्ञानिनः पापं कर्म
न लगति तदुक्तं वेदे तद्यथा पुष्कर पलाश आपो न श्लि
ष्यंते एवमेवैवं विदि पापं कर्म न श्लिष्यते न कर्मणा लि
प्यते पापकेन नतत्सुकृतदुष्कृते विधुनुते एतं ह वाव न तप
ति किमहं साधुनाऽकरवं किमहं पापमकरवमिति ए
वंमद्भक्तोवानपेक्षक इत्यादि कथनाद्भगवद्भक्तोपि वि
धिनिषेधातीत इति इत्थं च यदि देवादीनामपि व्यभि
चारादिकं कर्म न दोषावहं किमुत पुनः श्रीकृष्णस्य प
रब्रह्मणः सकल देवानामादिकारणस्य व्यभिचारदो
के ति ज्ञेयम् एवं शंकरस्य वृषभपृष्ठ आरोहणम् प्रे
तैः सह संवासः शवशयने सुक्रीडनम् शवदाहभस्म
नोंगे सुधारणम् मनुष्यकपालमाला परिधानम् खट्
वांगधारणमित्यादि यत्तूक्तं दपुराणादिषु वर्णितं वा
लातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम् सविनाशं व्रज
त्याशु सूचकोऽशुचिरेव चेत्यादि मनुवचन विरोधात्त
स्यापि न व प्रमत्तस्य महामूर्खस्य मते प्रमत्तगीतं स्या

दितिकिंवहुना

आप्तकामोयदुपतिःकृतवान्वैजुगुप्सितमकि
मभिप्रायएतन्नःसंशयंछिंधिसुव्रत अत्रापि
कृष्णस्यनिंदाकृतासर्वज्ञःकृष्णःकदाचिज्जु
गुप्सितंकर्मनकुर्यात्

अत्रशिष्टानांचेतसस्तुष्टिर्धर्मेप्रमाणापमस्मृतेशकुंतला
श्रीहमानंदुष्यंतस्यमनोयथेतिमहाभारततात्पर्यविनि ।
र्णयोक्तदिशायदिशिष्टानांमनोप्यसन्मार्गेनोःभिनि
विशतेतदापरमेश्वरस्यश्रीकृष्णस्यनिंद्यकर्मसंभावना
तुदूरापास्तैवेतिशास्त्रतत्त्वविदांराज्ञश्चसिद्धांतएवपरं
चतत्त्वानामनवहितानांकेषांचित्संशयापनुत्तये आप्त
कामइत्यादिनाराज्ञःप्रश्नः अतएवतत्रतिवहुत्त्वकथन
मत्तदीयप्रश्नानुरोधेनैवोत्तरयतिश्रीबादरायणिःकृष्णा
दिपारतंत्र्यरहितानांसमर्थानांधर्मव्यतिक्रमोयोदृष्टः
तथातेषांनिर्भयत्वंचयदृष्टंतच्चतेजीयसांप्रत्यवायायन
भवतियथाऽग्नेःसर्वभुक्त्वंनोऽपायेत्याय धर्मव्यतिक्र
मादिमयमीश्वराचरितमसमर्थोनिश्चयेनकदाचिदपि
एकांशेनापिमनसापिनाचरेत् आचरन्लोकदृष्ट्यदुः

असमर्थः

खित्वादिप्रकारेणनश्यति अनीश्वरोमौढ्यात्कालकूट
विषभक्षणेसद्योनश्यदेव नेश्वरःईश्वरस्तुप्रत्युतऐश्वर्य्य
विशेषप्रकाशादिनाशोभतेयथानीलकण्ठत्वादिना ।

महादेवः शुद्धिमद्धीश्वराणामाज्ञाप्रमाणत्वेनग्राह्या
नेनधमाचरितं कुर्वन्निंदाज्ञानुसारेणाचरितमपि
अहंकाराभावेन कर्मणि निर्लेपत्वान्निरहंकारिणां न प्र
त्यवायो नाऽनर्थः न वा पापाचरितेन नाऽनर्थः यदि निरहं
कारणामात्रे तेषु पुण्यपापसम्पर्काभावादनर्थाभाव
स्तर्हि परमेश्वरस्य सर्वेषां जीवानां नियन्तुः श्रीकृष्णस्य
कुतोऽनर्थशंकापीत्यादि ज्ञेयम् वसिष्ठस्य शतं पुत्रान्ना
शयामास कौशिकः नैनं बबाधिरे ब्रह्महत्यास्तास्तप
सो बलादिति महाभारततात्पर्यविनिर्णये प्रोक्तम् इ
त्यं च अन्यत्रापि कृष्णस्य निंदा कृतेति कस्यचिन्महापा
मरस्यैवोक्तिरिति ज्ञेयम्

सुभद्राहरणकथायां कृष्णार्जुनसुभद्राणां
निंदैव कृता कृष्णः कपटरूपिणमर्जुनं महा
त्मानीति कथितवानिति अर्जुनः कपटरूपं
कृतवानिति सुभद्रापि निंदितं कर्म कृतवतीति

इयमेव कथा त्वति विस्तृता महाभारतस्यादिपर्वण्यस्ति
न चापि कृष्णादीनां निंदात्र कृताऽतो महाभारतं व्यास
कृतमिति त्वयोन्मत्तेन न वाच्यम् तत्र कथायां तात्पर्यमि
दं ज्ञेयम् तत्त्वज्ञानीनां वचः श्रेयस्करं श्रेयस्तु पागते इतीव कृ
ष्णो विजयं स्वस्वसारं महारयदिति अर्जुनस्य मातुल
कन्यापरिणयनं तु आयाहीन्द्रपथिभिरीळितेभिर्यज्ञ

मिमंनोभागधेयंजुषस्वतृप्तांजहुर्मातुलस्येवयोषाभाग
स्तेपैतृष्वसेयीवपामिवेतिमंत्रलिंगात् योषापत्यंमातु
लीयंयथाभागःपितृष्वसुःपुत्रस्येवंवपांमेंशंजुषस्वेंद्र
स्तुतिर्जगादिति

इंद्रस्यापिगोवर्द्धनोद्धरणकथायांनिं
दाकृतांइंद्रोलज्जितोबभूवेति ॥

इत्थंगोवर्द्धनोद्धरणरूपाकथानुविष्णुपुराणेपञ्चमख
ण्डेगोपालतापिन्यांहरिवंशपुराणादावपिवर्णितागोविं
दोगोविदांपतिरित्यस्यव्याख्यायामाचार्यैःअहंकिलें
द्रोदेवानांत्वंगवामिंद्रतांगतःगोविंदइतिलोकास्त्वांस्तो
ष्यंतिभुविशाश्वतमित्युक्तम्अमेयात्मामहाद्रिधृगित्य
स्यव्याख्यानेचमहांतमद्रिंगोवर्द्धनंगोरक्षणेधृतवानि
तिमहाद्रिधृक्इतितैरेवप्रतिपादितम् किंचशंकराचार्यै
र्गोविंदाष्टकेगोपालंप्रभुलीलाविग्रहगोपालंकुलगो
पालंगोपीखेलनगोवर्द्धनधृतलीलालालितगोपालमि
त्यनेनगोवर्द्धनोद्धरणलीलावर्णितागोपीभिःसहविह
रणांतदर्थंवनंप्राप्तेइंद्रवृष्टिभयनिवारणायगोवर्द्धनगिरेर्धृ
तिरकारिसैवलीलातस्मान्नयत्नसाध्यत्वात्तयालीलया
लालिताःपालितागोपालायेनसतथोक्तस्तमितितट्टी
कायांचप्रतिपादितम्इत्थंचेंद्रस्यात्रनिंदाकृतेतिसर्वत्रै
वल्वयाबुद्धिमूल्येनवक्तव्यमिति

अष्टाशीतिसहस्राणामृषीणां महात्मनां
निंदैव कृता समाहात्म्यान कथायाम् तेषांम
ध्ये एकोपि परिक्षितं समाधातुं समर्थो नेति

महाभारतादौ सर्वेष्वपि पुराणेषु सूतशौनक संवादो व
र्तते तत्रापि त्वयादुष्टेन कथं शौनकादीनामृषीणाम
त्र निंदैव कृता तेषां मध्ये एकोपि न पुराणादीनां ज्ञाता य
तः सूत एव पुराणवक्तृत्वेन तैरुररीकृत इति चेन्नतः प्रकृ
ते श्रीशुकदेवस्य माहात्म्यवर्णने तात्पर्यं न तु मुनीनां
निंदायामिति इत्थं चात्र मुनीनां निंदैव कृतेति कस्यचि
त्मतस्य प्रलपनमेवेति ज्ञेयम्

ब्रह्मणोऽपि वत्सहरणाहंसावतरणाकथायां निंदे
व कृता ऽप्रज्ञानी ब्रह्मेति ततः पुष्करतः सृष्टः सर्व
ज्ञो मूर्तिमान्प्रभुः ब्रह्मा वेदमयस्साक्षात्प्रजापति
रनुत्तम इति महाभारतविरोधात्समतगीतमेतत् ।

ब्रह्मा रूपवतीं पुत्रीं संध्याख्यां यौवनोन्मदां ततः पुत्रीमु
पागृह्य समालिंग्य पुनः पुनः ततो निव्रीडिता संध्या मृगी
जाता ततः परं रेमे विधिर्मृगो भूत्वा तं ददर्श ततो हरः ततः
पिनाकमाकृष्य विधिं हंतुं दुराधरम् रभसेन शरं तस्मिन्मु
मोच स शरस्ततः प्रविवेश विधेर्देहं निर्गतश्च स देहतः त
तस्तद्रभसेनैव निहतः स चतुर्मुख इति शिवरहस्ये स्कंद
पुराणादौ च वर्णितम् तत्रापि ब्रह्मा वेदमयः साक्षादिति

महाभारतविरोधात्प्रमत्तगीतमेतदिति त्वयाबुद्धिमूल्ये नवक्तव्यमिति नतु तत्र महादेवोदुर्ज्ञानब्रह्मादीनिर्देवः शिक्षयति किमुतान्यानिति तत्स्पर्द्धस्वमत्रापि देवादीनामपि दर्पदलनं भगवता कृतमन्येषां कावार्त्तेतिज्ञेयम्

किंच त्रिपुरासुरवधे महादेवरथस्य ब्रह्मासारथिः सोमसूर्यौरथचक्रे इत्यादिशिवपुराणादौवर्णितं तत्रापि ब्रह्मादीनां निर्देवत्वं कृतातः प्रमत्तगीतमेतदिति त्वयाभरांड न वक्तव्यमिति

धर्मेचार्थेचकामेचमोक्षेचभरतर्षभयदिहास्तितदन्यत्रयन्नेहास्ति न कुत्रचित् महाभारतादिरुद्धं यत्तन्नव्यासप्रोक्तमिति महाभारते इदंतु भागवतं महाभारताद्विरुद्धमेवास्ति तस्मात्प्रमत्तगीतमेव

श्रीमद्वाल्मीकिविरचितरघुनाथचरितेतद्रामवाणाभिहतं पपात रक्षः शिरः पर्वतसन्निकाशम् वभंज चर्याग्रहगोपुराणि प्राकारमुच्चं तमपातयच्चेत्यादिना रामात्कुंभकर्णवध उक्तः महाभारतेतु तं ब्रह्मास्त्रेणासौमित्रिर्ददाराद्रिवरोपमम् सपपात महावीर्य्योदिव्यास्त्राभिहतोरणे तं दृष्ट्वा वृत्रसंकाशं कुंभकर्णं तरस्विनं गतासुं पतितं भूमौ राक्षसाः प्राद्रवन् भयादित्यादिनालक्ष्मणात्कुंभकर्णवधोवर्णित इति इयं च वाल्मीकिनिर्मितरामायणाभ

दिभारतादिरुद्धमेवतस्मात्प्रमत्तगीतमेवेतित्वयानि
रयगामिनावक्तव्यम् एवंमार्कंडेयपुराणेपक्षिविद्दे
आराणमराडामुपरिघराणपतनस्याकथाकथिता
महाभारतेतुसानास्तितत्रापित्वयाधूर्तेनवक्तव्यंभा
रतविरुद्धंमार्कंडेयपुराणमतोनव्यासकृतंकिंतुप्रम
त्तगीतमेवेति एवंकाशीखराडादिष्वपिज्ञेयमिति
वेदेमहापुरुषतेचरणारविंदमर्घांमूर्ध्नानंघ
स्यविप्रावदंतिखंवैनाभिंसोमसूर्य्यौचनेत्रेदि
शः श्रोत्रेयस्यपादौक्षितिस्मध्यातव्यः सो
सर्वभूतांतरात्मा॥१॥यद्वाचानभ्युदितंयेनवा
गभ्युद्यतेतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते
॥२॥यन्मनसानमनुतेयेनाहुर्मनोमतम् तदे
वब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिभ्यः
श्रुतिभ्योविरुद्धंचरणारविंदवंदनादिकमेवातो
ऽकथनीयमप्रश्रवणीयञ्चेदंप्रमत्तगीतंभागवतम्
एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमेधावभृथेनतु
ल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भ
वायेतिमहाभारते नत्वाकृष्णपदंदेवमूर्ध्नाङ्गदयागिरे
तिगर्गसंहितायां नमस्करोतिमूर्ध्नायंवाचासौतिनिरंत
रमितिवायुपुराणे यत्पादपंकजगतामचलांचभक्तिंवां
छंतीतिपुराणादिषु ऊँनमो विश्वरूपायविश्वस्थितं

नहेतवइत्यादिना पनीयश्रुतिषु पाद्मे नपस्त ब्रानरोघोर
मररोपनियतेंद्रियः यत्फलंसमवाप्नोतितंनत्वागरुडध्व
जमिति ब्रह्मवैवर्त्ते शरणागतरक्षणोद्यतंहरिमीशंप्रण
मंतियेनराः नपतंतिभवांवुधोस्फुरं पतितानुद्धरतिस्मता
नसाविति नारसिंहेश्रीयमोक्तोनस्यवेनारसिंहस्यविष्णोर
मिततेजसः प्रणामंयेपिकुर्वंतितेषामपिनमोनमइतिवि
ष्णुपुराणे पादपद्मप्रणमतीत्यादिच पदनखनिविष्टमू
र्तिभिरितिमधुसूदनसरस्वती एवंवामनस्यविष्णोश्चर
णारविंदवंदनंपुराणादिषु प्रसिद्धं एवंगोविंदाष्टके शंक
राचार्यैरासक्रीडायांदेवगणोःश्रीकृष्णस्यचरणावंदनंकृ
तमितितट्टीकायांच वृंदावनभुविवृंदारकगणवृंदाराधितवं
देहंकुंदाभामलमंदस्मेरसुधानंदंसुहृदानंदंवंद्याशेषम
हामुनिमानसवंद्यानंदपदद्वंद्वंवंद्याशेषगुणाब्धिं प्रणम
तगोविंदंपरमानंदमितिवृंदावनभुविवृंदारगणप्रदेशेरा
सक्रीडायांसंप्रवृत्तायां वंद्याश्चतेऽशेषामहामुनयश्चते
वंद्याशेषमहामुनयोनारदाद्यास्तेषांमानसेनहृदयेनवंद्यं
ध्येयमानंदपदद्वंद्वंयस्यसतथोक्त इति एवंश्रीरामा
नंदसरस्वतीभिरपिसीतारामपदद्वंद्वमद्वंदानंदसाध
नम् नमामियद्रजोयोगात्पाषाणोपिसुखंगतइतिनद्द
र्शितं इत्यंच यदभ्यचानभ्युदितमित्यादिश्रुतिविरुद्धं
चरणारविंदवंदनमित्यादिकं कस्यचिद्विक्षिप्तस्य

कारागाराईस्यप्रलपनमिति ॥

पूर्वापरविरुद्धमप्यस्ति नृसिंहेन प्रह्लादाय
वरोदत्त एकविंशतिपित्राद्यास्तवमोक्षंग ।
च्छन्तु पुनरुक्तम्प्रमत्तेननावेवरावणाकुंभ
कर्णौविभूवतुः पुनस्तावेवशिशुपालदन्तव ।
क्रौबभूवतुरितिच विरुद्धमेव ॥ ॥ ॥

अत्रहेनृसिंहमेपितानवतेजोऽविद्वान्भ्रान्तहेतिम्बाहृष्टि
सन्त्वां अनिंदत्तस्मात्सः पूयेतइमंवरंवृणोइतिप्रह्लादे
नोक्तं भगवनानुहेवत्सतेपिताएकविंशतिपितृभिः सह
पूतः यतो यस्यकुलेत्वंसाधुर्जातः किंचहेप्रह्लादयत्रय
त्रमद्भक्तावसंतितेकीकटा अपिदेशाः शुद्धाभवंतीत्यु
क्तम् हिरण्यकशिपोर्मुक्तिस्तुभागवतेनोक्ता श्रीविष्णु
पुराणेच हिरण्यकशिपुत्वेचरावणत्वेच विष्णुनाहत्वा
पनिहतोभोगानप्राप्यानमरैरपि नालभत्तत्रचैवेहसा
युज्यंसकथंपुनः संप्राप्तः शिशुपालत्वेसायुज्यंशाम्ब
तेहराविस्येवोक्तम् इत्यंच पूर्वापरविरुद्धमप्यस्तीतिक
स्यचिद्देवानांप्रियस्यकथनमेवेति

भवान्कल्पविकल्पेषु नविमुच्यतिकर्हिचिदिति
ब्रह्मणेवरोदत्तोनारायणेन पुनरुक्तंब्रह्मामो
हितोभूत्वावत्सहरणांकृतवानिति विरुद्ध
मेवकथनम् ॥

ब्रह्मणः स्वकन्याभिगमनरूपो मोहः पूर्वकल्पेन तत्रैव कृष्णभू
न मनुचतुःश्लोकी भागवतोपदेशानंतरमपि यत्तु कृष्णा
ऽवतारे ब्रह्मसंमोहनं तत्तु भगवत्कृपाविलसितमेवे

तिनविरुद्धकथनम्

कृष्णो नग्नो वाराणसुरमातरं न दृष्टवान् पुनरुक्तंप्र
मत्तेन चीरलीलां कृतवानिति विरुद्धमेव ॥ ॥

श्रीरामचंद्रस्ताडकां स्त्रीं जघान शूर्पणखां रावणभगि
नीं राक्षसीं स्त्रीं न जघान तत्रापि प्रमत्तकथनमेववा
त्राणां द्रष्टारं शुनःशेफं ज्येष्ठं चक्रुः तदाह त्वयं सर्वे त्वामनुवः स्महि अनुगताः कनिष्ठाः स्मः स्पष्टार्थः
३३ ततः प्रसन्नो विश्वामित्रस्तान्पुत्रानाह वीरवंतः पुत्रवंतो भविष्यथ ये यूयं मे मानं पूजनमनुग

ये मधुच्छंदसो ज्येष्ठाः कुशलं मेनिरे न तत् अशपत्तान्मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ३४ स
होवाच मधुच्छंदाः सार्द्धं पंचाशता ततः यन्नो भवान्संजानीते तस्मिंस्तिष्ठामहे वयं ३५ ज्येष्ठं
मंत्रदृशं चक्रुस्त्वामन्वंचो वयं स्महि विश्वामित्रः सुतानाह वीरवंतो भविष्यथ ये मानं
मेनुगृह्णंतो वीरवंतमकर्त्त मां ३६ एष वः कुशिका वीरो देवरातस्तमन्वित अन्ये चाष्ट
कहारीतजयक्रतुमदादयः ३७ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधं प्रवरांत
रमापन्नं तद्धि चैवं प्रकल्पितं ३८ इति श्रीभागवते नवमस्कंधे षोडशोऽध्यायः १६

ह्णंतः अनुवर्तमानाः संतः मां वीरवंतं पुत्रवंतं यत्कर्तं कृतवंतः स्पष्टार्थः ३६ हे कुशिकाः एष देवरातः
वो युष्मदीयः ३७ कौशिकमेव यतो विश्वामित्रैः तदन्वयमन्विताः हुताः कृत अन्ये चाष्टकादयस्त
स्य सुता आसन् अष्टकादय इति एवमिति एके ग्रामाः एके तु गृहीताः अन्यस्य पुत्रत्वेन स्वीकृतास्तस्मात्क
इति श्रीभावार्थे नवमे षोडशोऽध्यायः १६ ॥

श्री
भाग
नटी
४८

आयोः सप्तदशे तेन सप्तदशे प्रस्तुतसर्वं यत्र क्षेत्रवृद्धादिवंशवर्णनं १ इह श्रीकला
वतारप्रस्तावाद्वैवस्वतादिक्रमेणाम्भसादिक्रमेण प्रक्रांतमिति यत्र शेषकलावतारः तस्य वंशो
ति वितत्वाद्देते न वक्ष्यन्ते अतः पुरूरवसः पुत्र आयोर्वंशो वा कानिरूपणं वंशस्तु क्रोदनी प्रथमस्य

श्रीबादरायणिरुवाच. यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः नहुषः क्षत्रवृद्धश्च रजी
रम्भश्च वीर्यवान् १ अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयः क्षत्रवृद्धसुतस्यासन्सुहोत्रस्या
त्मजास्त्रयः २ काश्यः कुशो गृत्समद इति गृत्समदादभूत् शुनकः शौनको यस्य बा
ह्वृचप्रवरो मुनिः ३ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता धन्वन्तरिर्दीर्घतम
स आयुर्वेदप्रवर्तकः ४ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः तत्पुत्रः केतुमा
नस्य जज्ञे भीमरथस्ततः ५ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः स एव शत्रु
जिद्वत्स ऋतध्वज इतीरितः तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ६ षष्टिं वर्षस
हस्राणि षष्टिं वर्षशतानि च नालर्कादपरो राजन्बुभुजे मेदिनीं युवा ७ अलर्कात्संत
तिस्तस्मात्सुनीथोऽथ सुकेतनः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ८॥

गृत्समदस्य पुत्र इति पर्वं तद्वय यातिपडप्रभृति पितृहवं दनवृद्धः तत्र ऋक्स २२ दीर्घत।
मसः पितः ४ स्मृतिमात्रप्रार्तिरोगादुःखं विनाशयतीति तथा ५ ततः प्रतर्दनादिशब्दवा।
द्युमतः सकाशादलर्कादयः ६ संततिस्तस्तः सत्यकेतोर्दृष्टकेतुः ८ ४८

तस्मात्सुकुमारः तस्माद्वीतिहोत्रः तस्य गर्भः अतो भर्गात् भार्गभूमिः ६ काश्यः काशेर्वंश्याः
कोशिः प्रपितामहस्य क्षत्रवृद्धस्यान्वये ते यान्तीति तथा ततः अनेनसः शुद्धो जज्ञे ११ कृतकृत्यः स
यतः आत्मवान् ज्ञानी अतः शुद्धो सादनेन कृतवानिमर्थः १२ १४ तेषामतिभ्रंशाय गुरुणाह

प्रह्वेदोक्तः तस्मात्सुकुमारः ... वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ९ इती
मे काश्ययो भूपाः क्षत्रवृद्धान्वयायिनः रभस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः १० तस्य
क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः शुद्धस्ततः शुचिस्तस्माच्चित्रकृद्धर्मसारथिः ११ ततः
शान्तरयो जज्ञे कृतकृत्यः स आत्मवान् रजेः पञ्चशतान्यासन्पुत्राणाममितौजसां १२ दे
वैरभ्यर्थितो दैत्यान्हत्वेन्द्रायाददद्दिवं इन्द्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः १३ आत्मा
नमर्पयामास प्रह्रादाद्यरिशङ्कितः पितर्युपरते पुत्रा याचमानाय नो ददुः १४ त्रिविष्ट
पं महेन्द्राय यज्ञभागान्समाददुः गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः १५ अवधी
द्भ्रंशितान्मार्गान्न कश्चिदवशेषितः कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ततः कृतः
कृतस्यापि जज्ञे हर्यवनो नृपः सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः संकृतिस्तस्य
विजयः क्षत्रधर्मा महारथः १८ क्षत्रवृद्धान्वया भूपा इमे शृण्वथ नाहुषान् १९ इति श्रीभा
गवते नवमस्कन्धे सप्तदशोऽध्यायः १७ ॥

बृहस्पतिः नाम्नाभिचारविधानेनाग्नौ हूयमाने सति १५ सिंहावलोकनेनाह क्षत्रवृद्धपौत्रात् कुशात्
प्रतिः प्रतेः संजयः १७ इति श्रीभावार्थे नवमस्कन्धे सप्तदशोऽध्यायः १७

अष्टादशेय ययातेश्चरितमाह स्वसुरस्य केथो मते यपूर्व वस्य पुत्रेषु कनीयान् गृहीजरो तस्य राज्यस्यपरि
णामम न यो ... संसरेतीति तस्यान ज्ञो यत्वं यज्ञेति २ स्थानात्स्वर्गात् द्विजैरगस्त्यादिभिः ३ ५
यवीयसो भ्रातृन् नादिशत् काव्यस्य शुक्रस्य वृषपर्वणश्च कन्या भ्यां कृतदारः सन् न प्रतिलोमतादोष

शुक उवाच। यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः षडिमे नहुषस्यासन्निंद्रियाणीव देहि
नः १ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्य
ते २ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः
चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ४
राजोवाच। ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः राजन्यविप्रयोः कस्माद्विवाहः प्रति
लोमकः ५ शुक उ० एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका सखीसहस्रसंयुक्ता गु
रुपुत्र्या च भामिनी देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले व्यचरत्कलगीतालिनलि
नीपुलिनेऽबला ७ ता जलाशयमासाद्य कन्याः कमललोचनाः तीरे न्यस्य दुकूलानि
विजह्रुः सिंचतीर्मिथः ८॥

ईश्वरत्वादिनादिति दर्शयन् कथामाह एकदेत्यादिना प्रतिजयाद्दतस्त्वं शर्मिष्ठेन गुरोः शुक्र
स्य पुत्र्या देवयान्या च सह व्यचरदिति द्वयोरन्वयः ६ कलगीता मंजुलयोद्गुंजंतोऽलयो यस्यां नलिनी स्थु
लितानि यस्मिंस्तदेव पुलिने ऽबला शर्मिष्ठा ७ सिंचतीः सिंचत्यः ८॥

स्वजानती स्त्रीयं मत्वा गुरुपुत्र्या वासः समवाप्य पर्यधात् ८ असांप्रतं तत्र मायां १२ अमाययेवञ्चा
स्मा सोऽनकर्षवर्णेनेन वनक्रियैर्विनिविभिः ये ब्राह्मणाः परस्परं सोऽसावे स्त्रुवोऽमत्र तेन तत्समिद्दावने
वीक्ष्य व्रजं तं गिरिशं सह देव्या वृषस्थितं सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ९
शर्मिष्ठाजानती वासो गुरुपुत्र्याः समव्ययत् स्त्रीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् १०
अहो निरीक्षतास्या दास्याः साहसं कर्म ह्यसांप्रतं अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ११ यैरिदं
तपसा सृष्टं मुखं पुंसः परस्य ये धार्यते यैरिह ज्योतिः शिवः पंथाः प्रदर्शितः १२ यान् वंदत्यु
पतिष्ठंते लोकनाथाः सुरेश्वराः भगवानपि विश्वात्मा पावनः श्रीनिकेतनः १३ वयं तत्रापि
भृगवः शिष्योऽस्या नः पितासुरः अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती १४ एवं क्षिपंतीं श
र्मिष्ठा गुरुपुत्रीमभाषत रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा १५ आत्मवृत्तमविज्ञाय
कत्थसे बहु भिक्षुकि किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा १६ एवंविधैः सुपरुषैः
क्षिप्त्वाचार्यसुतां सती शर्मिष्ठा प्राक्षिपत् कूपे वासश्चादाय मन्युना १७ तस्यां गतायां स्वगृहं
ययातिर्मृगयां चरन् प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह १८ दत्वा स्वमुत्तरं वास
स्तस्यै राजा विवाससे गृहीत्वा पाणिना पाणिमुज्जहार दयापरः १९

नत्रेष्टा ह्यस्य चेतो ज्योतिर्भ्राजत्पंथा वेदमार्गः १२ १३ तदेवं ब्राह्मणामेवतावत्सं तत्रापि वयं भृगवः
अस्या अपिता नः शिष्यः पवस्त्वपि अस्माभिर्धार्यं वासः अयमसतीधृतवती १५ १५ १५

श्री॰
भाग॰
नटी॰
५८

निषिद्धोयं प्रतिलोमसंबंध इति तत्राह एष इति २२ अतएव मैव त्वं हस्तग्रहीः किमनेनाग्रहेणेति चेत्
त्राह न ब्राह्मण इति बृहस्पतेः सुतः कचः शुक्रान्मृतसंजीवनीं विद्याम् अध्यगात् तदा तद्देवयानी प्र
तिवचकमे सा गुरुपुत्री मम पूज्येति न तामुद्वहत् ततश्च कुपिता सती न तेयं विद्या निष्फला भव
त्विति शशाप स च तत्र ब्राह्मणः पतिर्न भवितेति तां शशाप तदेतदाह यमहमशपम् इतस्य शा

तं वीरमाहौशनसी प्रेमनिर्भरया गिरा। राजंस्त्वया गृहीतो मे पाणिः परपुरंजय २१ ह
स्तग्राहोपरो मा भूद्गृहीतायास्त्वया हि मे। एष ईशकृतो वीर संबंधो नात्र पौरुषः २२ यदि
दं कूपमग्नाया भवतो दर्शनं मम। न ब्राह्मणो मे भविता हस्तग्राहो महाभुज। कचस्य बा
र्हस्पत्यस्य शापाद्यमशपं पुरा २२ ययातिरनभिप्रेतं दैवोपहृतमात्मनः। मनस्तु त
द्गतं बुद्ध्वा प्रतिजग्राह तद्वचः। गते राजनि सा धीरे तत्र स्म रुदती पितुः। न्यवेदयत्ततः स
र्वमुक्तं शर्मिष्ठया कृतं २४ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन्। स्तुवन्वृ
त्तिं च कापोतीं दुहित्रा स ययौ पुरात् २५॥

पात् २३ ययातिरात्मनोऽनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुद्ध्वा तद्गतं तस्यां सकामं स्वमन
श्च बुद्ध्वा न्यस्य धर्मेण मदीयं मनः प्रविशेदिति तस्याः वचः प्रतिजग्राह अंगीकृतवान् २३ शर्मि
ष्ठया कृतं यत्तदपि दैववशादेवाभवदिति दर्शयन्नाह गत इति राजनीति नवभिः उक्तं भित्वा कोपा
त् कूपप्रक्षेपादि २४ कापोतीं संचयहीनां वृत्तिं २५॥

५८

प्रत्यनीका देवानस्ते विवलिताः जयं प्राप्यणी यातत्वमिप्रेतं यस्त्वतयाभूतं ज्ञात्वा प्रत्यनीकानां विव।
दितत्मिति वा २९ सा त्रु वा साली सदिता शर्मिष्ठा मामःतयानि नि २८ ततस्मान्निर्गताकुलात्म
कं देवीत्यपतस्मां देवस्थितादर्थस्य प्रयोजनस्य गौरवं चवीत्स २९ तत्सेमाधानोपगकेवस्मर्यः

वृषपर्वा तन्मे त्वाय प्रत्यनीकविवदितं गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि २९ त
एणार्द्धमन्युर्भगवान् शिष्यं वा च स भार्गवः कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे २
तथेत्यवस्थिते प्राह देवयानी मनोगतं पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु १९ स्वा
नां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् २१ नाहु।
षाय सुतां दत्वा सह शर्मिष्ठयोशनाः तमाह राजन् शर्मिष्ठामाधास्तल्पे न कर्हिचित् २
विलोक्यौशनसीं राजन् शर्मिष्ठा सुप्रजां क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ सती ३१
राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् स्मरन् शुक्रवचः काले दिष्टमेवाभ्यपद्यत ३२
यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ३३ गर्भ
संभवमासुर्या भर्तुर्विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ३४

अपत्यार्थं स्त्रीतकाले प्रार्थनात स्त्रियाः कामस्य रणं धर्मं मवेत्य शुक्रस्य वचस्मरन् दिष्टं दैवप्राप्ति।
तमेव ... मभ्यपद्यत न तु कामतः इत्यर्थः ३२ आसुर्याः शर्मिष्ठायाः भर्तुः
सकाशात् ३३ उपमंत्रयत् प्रसादयन् ३४॥

श्री.
भाग.
नवी.
८८

विक्षतेहृदंकरोतीतिनत्थाते इदितरिकामेवयाणः तस्मोप्सिकामानांभोगैषितिवाउक्कस्त्रा
हतर्हियोः भियास्यती यभितेयावयिष्यति नत्माकृयलाकामेयसम्लनाययेकेजरावास्त्रय
यातव्यमर्पेनीयत. भितिन [illegible] यम्प्रेनिश्च्छेदः नाजरांवपमालगमयेत्पर्थः ३४ इतिलब्ध

प्रियामल्लगतः कामीवचोभिरुपमंत्रयन् नप्रसादयितुंशेकेपादसंवाहनादिभिः ३५
स्मृकस्तस्मादकस्पितः नौकामान्नर्मसृहृत्य नेतत्पातृशनंमदविश्वपकरणीनम्ला ३६
ययातिरुः ब्रह्मणस्पप्रकामानांवत्सन्तुदितोस्मिते फुक्कः व्यस्मिनस्तमयथाकामे
वयवायोभियास्पति शतिलब्धव्यवस्थानः पुत्रंज्येष्ठमवोचत यदोतातप्रतीक्षेमांज.
रांदेहिनिजंवयः ३८ मातामहकृतांवत्सनहमोविषयेष्वहं वयसामवदीयेनरंस्ये
कतिपयाःसमाः ३९ यदुरुः नोत्सहेजरयास्थातुमंतराप्रामयानव अविदित्वासुखं
ग्राम्यंवैतृष्णनैतिपूरुषः ४० तुर्वसुश्चोदितः पित्राद्रुह्युश्चानुश्चभारत प्रत्याचख्युः
रधर्मज्ञाह्यनित्येनित्यबुद्धयः ४१ अपृच्छत्तनयंपूरुंवयसोनगुणाधिकं नत्वम
ग्रजवद्वत्स मांप्रत्याख्यातुमर्हसि ४२ पूरुरुवाच कोनुलोकेमनुष्येंद्रपितुरात्मकृ
तः पुमान् प्रतिकर्तुक्षमोयस्यप्रसादाद्विंदतेपरं ४३ ॥
मध्यमोनेजराया: स्वरुचि
तिर्ष्ठतेःयः ४४ यतोनधर्मज्ञाः अनित्येवयोवनेनित्यबुद्धयः ४५ तेजरांकिंग्रहीष्यसि इत्येक
त्वे प्रत्याख्याने माकृयाइत्याह ननन्विति आत्मकृतः स्वदेहकर्तः प्रत्युपकारंकर्तुकोऽनु

तथापि पितर्यश्चिंतितं कुर्यात् स उत्तम यस्तु शोककारी स मध्यमः यस्त्वश्रद्धा कुर्यात् सोऽधमः ग्रक
र्तापितृवचविनेपुरीषप्रायः ४४ जुजुषे सेवितवान् ययोपजोषं यथाप्रीति जुजुषे ४६ नानाविभा

उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी च मध्यमः अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ४४ इति
प्रचोदितः पुत्र एवं पूरुर्जग्राह जरां पितुः सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप ४५ सप्तद्वी
पपतिः सम्यक् पितृवत्पालयन्प्रजाः ययोपजोषं विषयाञ्जुजुषेऽव्याहतेन्द्रियः ४६ देवया
न्यप्यनुदिनं मनोवाग्देहवस्तुभिः प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ४७ अयजद्यज्ञ
पुरुषं क्रतुभिर्भूरिदक्षिणैः सर्वदेवमयं देवं सर्ववेदमयं हरिं ४८ यस्मिन्निदं विरचितं
व्योम्नीव जलदावलिः नानेव भाति नाभाति स्वप्नमायामनोरथः ४९ तमेव हृदि विन्य
स्य वासुदेवं गुहाशयं नारायणमणीयांसं निराशीरयजत्प्रभुं ५० एवं वर्षसहस्राणि
मनःषष्ठैर्मनः सुखं विदधानोऽपि नातृप्यत्सार्वभौमः कदिन्द्रियैः ५१ इति श्रीभागवते न
वमस्कंधे ययातिचरिते अष्टादशोऽध्यायः १८ ॥

तियावदिन्द्रियप्रहर्त्ताः तदुपरमे नाभाति स्वप्नमायाभ्यां सहितो मनोरथ इवेत्यर्थः मनः सुखं का
मभोगं कदिन्द्रियैः कुत्सितैः पराग्वृत्तैरिन्द्रियैः ५१ इति श्रीभावार्थे नवमे अष्टादशोऽध्यायः १८

ऽनविशेषयतिःस्त्रैणःस्त्रीजितोनतत्रोपह्नवं देवयानीसमागमाद्यावत्कौशलमात्मवान् शुकमोगामा
त्रांहस्तनगवत्कृतमात्मनः विडंबनमिवयावद्बुद्ध्वानिर्वेदयितुमात्मवान् २ कामान्नाचरन्नुपभुंजानः
गाथामितिहासं १ मद्विधेनमादृशेनाचरितां मद्विधयस्याचरितंयस्यामितिवा यस्यग्रामनिवा
सिनःकामिनोमद्विधस्याचरितंस्ववनेस्थिताधीराःशोचंतितस्यगाथांशृणु आत्मानमनुल

शुकउ॰ सइत्थमाचरन्कामान्स्त्रैणोऽपह्नवमात्मनः बुद्ध्वाप्रियायैनिर्विण्णोगाथामेतामगाय
त १ शृणुभार्गव्यमूंगाथांमद्विधाचरितांभुवि धीरायस्यानुशोचंतिवनेग्रामनिवासिनः
२ वस्तएकोवनेकश्चिद्विचिन्वन्प्रियमात्मनः ददर्शकूपेपतितांस्वकर्मवशगामजां ३ त
स्याउद्धरणोपायंवस्तःकामीविचिंतयन् व्यधत्ततीर्थमुद्धृत्यविषाणाग्रेणरोधसी ४ सो
त्तीर्य्यकूपात्सुश्रोणीतमेवचकमेकिल तयावृतंसमुद्वीक्ष्यबह्व्योजाःकांतकामिनीः ५
पीवानंश्मश्रुलंप्रेष्ठंमीढ्वांसंयाभकोविदं सएकोजवृषस्तासांबह्वीनांरतिवर्द्धनः रेमेका
मग्रहग्रस्तआत्मानंनावबुध्यत ६॥

क्ष्याह वस्तइति प्रियामनुलक्ष्याह अजामिति वनेस्थिता
देविचिन्वन्मृगयंश्च ३ रोधसितटेविषाणाग्रेणमृदादिकमुद्धृत्यतीर्थंनिर्गमनायमार्गंव्यधत्त ४ कृत
र्जि स्त्रीमिष्टाःप्रवृत्ताः कामयामासुः कांतंप्रतिकामिनीःकामवत्यः ५ पीवानंपुष्टं श्मश्रुलंश्म
श्रुवत्वलं रतिसमर्थंप्रेष्ठं मीढ्वांसंरेतःसेक्तारं याभकोविदं अभिदंशनपवश्रेष्ठेनावबुध्यत

५
९

स्वामिनमिति ७ स्त्रैकामिप्रायेणाह ८ इडविडाकारं वस्तजातिशब्दं प्रसादयितुं ९ वृषणम
लंबंतं जरया संभोगासमर्थमकरोत् अर्थाय स्वभार्याः कामभोगाय योगवित् उपायज्ञः जरा
पार्श्वेन वृत्तिशक्तिर्देवाविनयार्थः १० कूपलब्धया सह कामैः सेव्यमानैर्न तृप्यति ११ नतुत
हि उन स्त्रीविषयाः सेविता ततो मनसि प्रीतेः सति कामोपशान्तमोहो निवर्तते तिवेत

तमेव प्रेष्ठतमया रममाणमजान्यया विलोक्य कूपसंविग्ना नामृष्यद्वस्तकर्म तत् ७
तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदं इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ८ सो
पि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुं कुर्वन्निडविडाकारं नाशक्नोत्पथि संधितुं ९ तस्य
तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा लंबंतं वृषणं भूयः संदधेऽर्थाय योगवित् १० संब
द्धवृषणः सोपि ह्यजया कूपलब्धया कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ११ तथा
हं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः आत्मानं नाभिजानामि मोहितस्तव मायया १२ यत्पृथि
व्यां व्रीहियवं हिरण्यं पशवः स्त्रियः न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य ते न जातु कामः
कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४ यदा न कुरुते भावं
सर्वभूतेष्वमंगलं समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५

तत्राह यदिति द्वाभ्यां नतुष्से
ति नतृप्यंति १३ हविषा घृतेन कृष्णवर्त्मा १४ अग्निरिव तर्हि कदा केनोपायेन वा मनसः संतु
ष्टिः प्रीतिः स्याद्यथा कामोपशमः स्यादित्यत आह यदेति द्वाभ्यां अमंगलं भावं रागद्वेषादिवैष

९९०

श्री. भाग. नवी. ५१

दुःखानि नितरां वहन्तीति निवहां तां ॥ १६ ॥ स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह मात्रेति अविविक्तं संकीर्णमासनं यस्य सः कर्षतीति नयति स्वात्मारामानपि उक्तं तत्र कथं ब्रह्मणि मनस आधानं स्यात् तत्राह दृष्टमिति यो नानुध्यायेन्न संदिशेन्नचोपभुंजीत तत्र दृष्टश्रुतयोरनुध्यानादौ

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥
मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥
पूर्णं वर्षसहस्रं मे विषयान्सेवतोऽसकृत् तथापि चानुसवनं तृष्णा तेषूपजायते ॥ १८ ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्यध्याय मानसं निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥ १९ ॥
दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संदिशेत् संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् ॥ २० ॥
इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः दत्त्वा स्वजरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥
दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरं ॥ २२ ॥
भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥
आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥

सम्यगात्मदृग्भवति ॥ २० ॥ तस्य पूरोर्वशे स्थापयित्वा ॥ २३ ॥ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिन्द्रियं तत्क्षणेन मुमुचे तत्याज यद्वा विषयेषु आसेवितं सेवितं षण्णामिन्द्रियाणां वर्गं मुमुचे उपेक्षितवानित्यर्थः ॥ २४ ॥

931

विप्रुतं निरस्तं विगुणात्मकं लिंगं येन प्रतीतः प्रत्यगात्मतः २४ प्रस्तोभमेवाह परिहासमिति यद्वा
प्रस्तोभं निवृत्तिमार्गे प्रोत्सनं मेने २५ कथ्यसभावेप्यतदाह नमइति नमनादिभिःसमावानम

सर्वत्रनिर्मोहसमस्तसंगमात्मानुभूत्याविधुतत्रिलिंगः पंचेमलेब्रह्मणिवासुदेवेलेभे
गतिंभागवतींप्रतीतः २४ श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः स्त्रीपुंसोःस्नेहवै
क्लव्यात्परिहासमिवेरितं २५ सासन्निवासंसुहृदांप्रपायामिवगच्छतां विज्ञायेश्वर
तंत्राणांमायाविरचितंप्रभो २६ सर्वत्रसंगमुत्सृज्यस्वप्नौपम्येनभार्गवी कृष्णे
मनःसमावेश्यव्यधुनोल्लिंगमात्मनः २७ नमस्तुभ्यंभगवतेवासुदेवायवेधसे स
र्वभूताधिवासायशान्तायबृहतेनमः २८ इतिश्रीभागवतेनवमस्कंधेययातिचरि
तेनामैकोनविंशोध्यायः १९ बादरायणिरुवाच पूरोर्वंशंप्रवक्ष्यामियत्रजातोसिभारत
यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोह्यभूत्पूरोःप्रचिन्वांस्तत्सुतस्ततः
प्रवीरोथनमस्युर्वैतस्माच्चारुपदोभवत् २ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः संया
तिस्तस्मादहंयातिरौद्राश्वस्तत्सुतः ३

स्करोति २७ इतिश्रीभावार्थेनवमेनामैकोनविंशः १९
विशोपितृप्रसादाप्तराज्यासनमहोन्नतेः पूरोर्वंशोत्र दौष्यन्तेभरतस्येर्यतेयशः १ तत्सुतःअ

धर्मेषु प्रसन्नेषु प्रवर्तितेषु स्वधर्मस्य स्वातेयवः स्वीयं भावमोस्ततः पूर्वं दर्शितेष्वेतेषु प्रमुखा
न्सर्वे योद्धा श्वसा हत्वा मामस्व रक्षितु ग्रामानानाः स्वयं मनुष्य श्रुति पृष्ठीस्तमर्योर्यवशवर्तितेष्वाततः
जगदात्मनः जगतश्चात्मनः तस्य सुखस्य प्राणा स्येन्द्रियाणीव १ उष्यतस्तस्य शाकं वलाया

हतेषु तस्य जहेषुः स्वयं स्थिलिपुः क्षत्तेषुकः जलेषुः स्वतने प्रस्थधर्मस्त्यत्रतेयवः २
दृष्टीति स्वनः प्रत्यक्षवनेपुष्पावृमः स्वतः हेतान्यामिन्द्रियाणीव मनुष्यस्य जगदात्म
नः ३ स्वतेषो दतिभोरांभूत्स्व यस्य स्वात्मनात्स्य समतिपुवोप्रतिरथः कएवोप्रतिर
थिकस्मः ८ तस्य मेधातिथिस्तस्य स्वात्मकश्चैवापाद्विजातयः पुत्रोभूत्तमंत्रैरभिरुप
तस्तत्वतोमतः १ उष्यतोनु स्वस्य यातःकाण्वाश्रमपदंगतः तत्रासीनांस्वप्रभयामंड
यन्तीं रमामिव विलोक्यस्य योमुमुदे देवमायामिवस्त्रियं ४ वभाषेतांवरारोहां
भटैः कतिपयैर्वृतः तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ९ पप्रच्छ कामसं
तप्तः प्रहसन्श्लक्ष्णया गिरा कात्वंकमलपत्राक्षि कस्यासि हृदयंगमे ११ किंस्वि
च्चिकीर्षितं तत्र भवत्या निर्जने वने व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे १२

भवतः सुतोभवदिति कथाहारेणाह उष्यतो स्वगयाभिमिति पंचदशभिः तत्राश्रमे मंडयंती
रिव विलोक्य मुमुदे ९ तस्याद्दर्शनेन प्रमुदितः अतएव संनिवृत्तः परिश्रमोयस्य १०
११ पोस्ववाणीवेतोनस्यधर्मेरमते श्चेतामवेतस्तत्त्वायिरमणादेवाहंतोराजन्यतनयावे

विश्वामित्रस्यात्मजाहं मेनकायां जाता तया वनस्थं अस्मात्यक्ता आश्रमे जनकमेवाहं मित्र
र्षेः १४ किं करवाणि आदिवाक्यात दंश्चिताश्रयंजातादृ उपपन्नमिति १९ गांधर्वविधिनामिथः।

नहिवेतः पौरवाणामधर्मे रमतेकश्चित् शकुंतलोवाच विश्वामित्रात्मजैवाहं त्यक्ता
मेनकया वने वेदैतद्भगवान्कण्वो वीर किं करवाणि ते १४ आस्तमास्सरविद्वान्नरप्रजा
मईणाननः भव्यतां संतितीवाराज्यनायदिदेवते १५ दुष्यंतः उपपन्नमिदं त्वं भुजा
तायाः कुशिकान्वये स्वयं हिवृणुते राजन्कन्याः सह शंवदं १६ ओमित्युक्ते यथाथ
मे तद्यमे शकुंतला गांधर्वविधिनाराजा देशकालविधानवित् १७ अमोघवी
र्यवतिरं निशि निवीरमाद्धे क्षीभूते स्वपुरं याते कालेनासूत सासुतं १८ कण्वकृ
मारस्याश्रमे वने सम्मुदितां क्रियाः बद्धा मृगेंद्रं तरसाक्रीडति स्म स बालकः १९ तं
दुरत्ययविक्रांतमादाय प्रमदोत्तमा हरेरंशांशसंभूतं भर्तुरंतिकमागमत् २० या
दानजगृहे राजाभार्यापुत्रावनिंदितौ शृण्वतां सर्वभूतानां खेवागाहाशरीरिणी २१
माताभस्त्रापितुः पुत्रो येन जातास एव सः भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां २२

रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला २३ पितर्युपरते सोपि चक्रवर्ती महायशाः महिमा गीयते तस्य हरेरंशभुवो भुवि २४

समयपूर्वकेण २० दुरत्ययविक्रांतं विक्रमणं यस्य २। २१ भस्त्राचर्मपात्रं तद्वन्माता आधा
रमात्रं पितुरेव तत्पुत्रः तं त्वं देवः येनेति आत्मा वै पुत्रनामासीति श्रुतेः भरस्व पुष्णाणं अतेन

भारतनामसि [illegible]

993

श्री॰
भाग॰
नवी॰
५२

किं च रेतोधाः रेतः सेक्ता वै पुत्रः पुत्रो यमक्षयात् निरयान्नयति तारयति तथा च श्रुतिः
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति प्राप्तं
तत् रेमात्त्वमपि गर्भाधानाय पुत्रमिति विवादेय यमक्षयादिमं नित्रं गर्भस्य भार्यायाः सेक्ता शापात् रेतोधा
रेतः सेक्ता पिता भवतीति पुत्रं नयति न त्वा माता नेत्यर्थः तत भार्यापुत्रो स्वीकृतवान्

रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकु
न्तला २२ पितर्युपरते सोऽपि चक्रवर्ती महायशाः महिमा गीयते तस्य ह
रेरंशभुवो भुवि २३ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ईजे महा
भिषेकेण सोऽभिषिक्तोऽधिराड्विभुः २४ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वा
जिभिः मामतेयं पुरोधाय यमुनायामनु प्रभुः २५ ॥

त्वं चास्य धातेति तेयं २२ चक्रवर्ती बभूवेति शेषः तस्य महिमा गीयते तदप्येते श्लोका अभिगीता इत्याह
हरेरंशभुवः अंशप्रजातस्य २४ तत्र लिंगमेवाह चक्रमिति गंगायां अनु
लोमं पंचपंचाशता वाजिभिरीजे पुरोधाय पुरोहितं कृत्वा यमुनायामनु च यमुनायां

५२

अष्टाधिकसप्ततिमिथ्यानष्यानर्वंध किंकुर्वन्नस्थनेनकर्षेणाद्दततसावीगुणप्रकृष्टगुणवतिदेशे
अग्निश्रितोभूत यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणाः भवतेन भूरिदताः गाः बहुशाः प्रत्येकं बहवि
भेनिरे विभज्य अग्रहञ्चतस्रशीतमधिके त्रयोदशगाहस्रैवेकं वहं भवति तथाहिहिरण्येन परिवृता
न्कस्मात् प्रत्यक्षदतो मृगान् मस्मारेभवतोदयात्कुलं वंहानि समवेति प्रत्यक्षकानि ग्रामाधिशतं वहानि
श्रीमुकेनोमवश्लोकेचतुर्दशलक्षतेनेनसंगृहीतानि पादाङ्कर्मणि मस्मारेनिपुत्तानि चतुर्दशेति प
वं चतुर्दशलक्षाणां समाधिकं शतभागो वहमित्रं भवति श्यचुवहस्तत्ताश्लोकेन संगृह्यते च

अष्टसप्ततिमिथ्यां प्रववंधप्रदद्दहस्र भवतस्सहिदौष्यंतेरग्निःसावीगुणवितः सहस्रं वहयो
यस्मिन् ब्राह्मणागाविभेजिरे त्रयस्त्रिंशत्कतस्य थानहविस्मापयत्रपात दौष्यंतिरसगान्मा
यो गृह्णतो गुरुमायया २८ मृगाः कृष्णदतः हेमाहिरण्येन परिवृतान् पादाङ्कर्मणि म
श्नारे निपुत्तानि चतुर्दश २९ ॥

चतुर्दशानां लक्षाणां समधिकशतोधिकः वहं चतुरशीतसहस्राणि त्रयोदश २९ देवाना।
मपि मायां वैभवश्रवणादस्मे तपतो गुरुं पुण्यहविःश्राययोग्रामरस्तदेशभवनात मायावतर
इति पाठे ह्रस्य प्रत्यनुसारेण मायावतो श्रेष्टः हविदेवानामविसर्थः २८ मृगान् अष्टगजान्भद्रम
द्रमृगादयो गजजातिभेदाः मस्मारे इत्यस्य प्रत्यपदस्य व्याख्यानेकर्मणीति कस्मिंश्चित्कर्मवि
शेषेः केचित्तमस्मारे तीर्थे इति व्याचक्षते २९ ॥

२१ पुरा देवान्जित्वा ये असुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्वशीकृतैर्देवस्त्रियो रसातलं नीताः सतीः पुनराहरत् दानिभिः प्राणिभिरवमैर्मनुष्यादिभिः सहनीता इति वा प्राणिभिः वितिपाठे प्राणयोः रसातलं नीताः सतीः यज्ञपात्राणि यज्ञताले हर्तान्यस्याः पाहदिन्पर्थः २२ त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रवत्सरान् चक्रमाज्ञां नारायणांशत्वाच्चक्रं स्वद

भरतस्य महत्कर्म न पूर्वे नापरे नृपाः। नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा॥ २॥ किरातहूणान्यवनान्पौण्ड्रान्कङ्कान्खशाञ्छकान्। अब्रह्मण्यनृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान्॥ जित्वा पुरासुरा देवान्ये रसौकांसि भेजिरे। देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत्॥ सर्वान्कामान्दुदुहतुः प्रजानां तस्य रोदसी। समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत्॥ २३। स सम्राड् लोकपालाख्यमैश्वर्यमधिराट् श्रियम्। चक्रं चास्खलितं प्राणान्मृषेत्युपरराम ह॥ तस्यासन्नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः। जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते॥ २५ तस्यैवं वितथे वंशे तदर्थं यजतः सुतम्। मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः॥ २६॥

र्शनमेव वा २२ तस्यैवैराग्येणामोक्षप्रकारमाह स इति मृषेति विचार्येति शेषः २४ नानुरूपा मत्सदृशा न भवन्तीति अभिचारशङ्कया त्यागभयात्सम्भवतीति भयात्स्वजान्जघ्नुः पुनः पुत्राणां दर्शन्नैवं सदृशानां स्थाने नन्यजेन् नामयेत्याशयेन्हनवन्तः २५ वितथे व्यर्थे सति तदर्थं मरुत्स्तोमेन यागेन यजतस्तस्य प्रसन्ना सन्तो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामास

२४

२८

मरुत्सु तं भरद्वाजं गर्भमप्रकारं दर्शयन्नाह अन्तर्वत्न्यामिति चतुर्भिः अन्तर्वत्न्यां गर्भिण्यां भ्रातृपत्न्या
स्य पत्न्यां ममतायां वीर्यपाते मैथुनाय कदाचित्प्रवृत्तः बृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावादाक्रोश
पूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पतिरंधो भवेति तं गर्भं शप्त्वा बलाद्वीर्यमसिंचत् ततो बृहस्पतेः
शापाद्गर्भस्थो दीर्घतमा अंधो बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं
सद्य एव कुमारोऽभवत् तं च परवीर्यजं भर्तृत्यागाद्विशंकिता सती त्यक्तुकामां ममतां प्रति सुराः प्र
बृहस्पतेर्ममतायाश्च विवादे तं पं श्लोकं जगुः किं मूढे जगुः अत आह तस्य नाम निरुच्यते येन तं

अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ३६ तं
त्यक्तुकामां ममतां भर्तृत्यागविशंकिताम् नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ३७ मू
ढे भर द्वाजमिमं भर द्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं ३८

तन्नामनिर्वचनेनैव भर्त्रा त्यागशंका मा भूत् कर्तव्येत्यर्थः तत्र पुत्रे त्यक्तायां नीं ममतां बृहस्पतिरा
ह हे मूढे इमं पुत्रं भर पुष्णाण भर्तुर्विभेमीति चेत्तत्राह भरद्वाजं एकस्य क्षेत्रे अन्यस्य बीजाद्द्वि
भ्यां जातं अतस्त्वं स्वामि पयं ज्ञाति न तस्माद्भयशंकेत्यर्थः एवमुक्ता सती तं प्रत्याह हे बृहस्पते त्वं
मिमं भर द्वाभ्यां मातापितृभ्यां ममत्वाय तो जातं अतो नाहमेकाकिनी भरामीत्यर्थः यद्यस्मादेवमुक्त्वा पित
रौ ममताबृहस्पती पुत्रं परित्यज्य यातौ ततो नीतिवयं भरद्वाज इति पाठान्तरे यस्य पुत्रस्य मातागतः त्व
त्पितरौ यातौ विसर्थः ३८ ३९ ॥

श्री. भाग. नटी. ५५

वितथस्य व्यभिचारसंभवात् मा भून्नं वितथेति निरूर्थ कुंभ मनन्युसुरजनतनादृ पाठांतरे आदिजं प्रथम
जे भर्तवी यां जानमेव सुत्मानमज भवहुहस्पते नां तत्तमा जेमथः एवं तयामक्तमरुतो विभ्रतुम
भिभरुः तदेवमरुद्भिः आनीय भरतस्यानये वितथ समर्पितः २१ इति नवमे विंशः २० एकविंशे
तदेशप्यतेः सतस्यान्वयउच्यते रंतिदेवाजमीढादयो यत्र कीर्तिः प्रतन्यते १ भरतस्यानयेवितथेसम
र्पितेऽतताहितथस्तेशो भरद्वाज इत्यवनामयोरपि भरतस्पदनपुत्रोजान इति तदेशोनुक्रम्यते वि

वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः ।
महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः १
गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन ।
रन्तिदेवस्य हि यशः इहामुत्र च गीयते २
वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ।
निष्किंचनस्य धीरस्य सकुटुम्बस्य सीदतः ३
व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ।
घृतपायससंयावं तोयं प्रातरुपस्थितम् ४

तथस्य मन्योः सुताः तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः पंचपुत्रा बभूवुः १ वियद्वित्तस्य वियतो गगना दिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य यद्वा वियद्व्ययं प्राप्नुवद्वित्तं यस्य तदेवाह बु
भुक्षतोऽपि सतो लब्धं लब्धं ददतः तत्सपत्नयति निः किंचनस्य अन्यादिसादैः पंचदशभिः ३ अपि
बतो जलपानमप्यकुर्वतः वनादिविधया गोदेहे कदाचिच ४

१८ अथान्यो वृषलोऽतिथिरागमत् विभक्तस्यान्नस्य शेषमन्नादिकं विभक्तवतः ॰ सगणाय श्रम
दित्सय ८१ उभौ सुभुक्तौ जितेष्वेकमेव तद्वियुक्तौ तया ९ पयःदुःखान्सहितस्तत्तया सर्वेषां दुःखं स्वयं भो
क्तुमाशास्ते नेति अणिमाद्यष्टसिद्धियुक्तां गतिमपि मोक्षमपि वाहं न कामये तर्हि किं कामं
यसे तदाह अखिलदेहभाजामार्तिं दुःखं तन्मोक्षरूपेणान्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामिति

कृच्छ्रप्राप्तमन्नं वृषलान्नदानं जानन्नेव प्रथीः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य वागमत्
तस्मै संव्यभजत्सोऽन्नमादरेण श्रद्धयान्वितः हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ८।
अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ॰ या
ते शूद्रे तु अन्यो गादतिथिः श्वभिर्वृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ८ स आ
दृत्यावमानितान्वृषतः युद्धमानपुरस्कृत तत्ददतान नमश्चक्रे श्वभ्यः श्वपतये विभुः ९ पानीय
मात्रमुच्छेषं तच्चैकपरितर्पणम् यास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे १० तस्य तां
करुणां वाचं निशम्य विपुलश्रमां कृपया भृशसंतप्त इदमाहामृतं वचः ११ न कामये
हं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन
भवंत्यदुःखाः १२ क्षुत्तृट्श्रमो गात्रपरिभ्रमश्च दैन्यं क्लमः शोकवि

वं कामये येन तदुःख
भोक्तामया देवभूतेन ते सर्वे अदुःखा भवंति १२ ननु दुःखं किमिति प्रार्थयसे परदुःखनिवृत्तये
व मम सर्वदुःखनिवृत्तिरित्याह क्षुत्तृडिति कृपणस्य जंतोर्जीवनदेनाः जलस्यार्पणान्मे सर्वे

श्री॰
भाग॰
नटी॰

एवमिति एवं प्रभाष्य १५ त्रिभुवनाधीशाः ब्रह्मादयः मायया तत्रापि ये धर्मपरीक्षार्थं प्रथमं मायया वृ
षलादिरूपेण प्रतीताः ते एव समर्थाः परं केवलं वासुदेवे भक्त्या मनश्चक्रे न तु तान् किमपि या
चितवान् १७ अनन्यराधसः अनन्यसाधनस्य स्वप्नवत् प्रत्यलीयत आत्मन्येव लीनाभूत्
१८ १९ मन्युसुतनरवंशमुक्त्वा तत्सुतगर्गवंशमाह गर्गादिति महावीर्यस्य वंशः।

एवं प्रभाष्य पानीयं म्रियमाणः पिपासया पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः १५
तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छतां आत्मानं दर्शयाञ्चक्रुर्माया विष्णुविनिर्मिता
१६ स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परं १७
ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः माया गुणमयी राजन्स्वप्नवत्प्रत्यलीयत १८ त
त्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः १९ गर्गा
च्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः २० पु
ष्कराारुणिरित्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धास्तिनापुरं २१ अज
मीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः २२॥

माह दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः ये अत्र क्षत्र
वंशे ब्राह्मणगतिं ब्राह्मणरूपतां गताः ते मन्युपुत्राणां पञ्चानां मध्ये बृहत्क्षत्रस्य वंशमाह बृहत्क्षत्रा
दस्येति यत येन हस्तिना पुरं कृतमित्यर्थः २१ २२ अजमीढादयस्त्रयो हस्तिनः पुत्राः २२

1000

अजमीढाद्देवात्मनःपुत्रोबृहदिषुर्नामाभवत् २२ पारस्यतनयोनीपःनीपस्यपुत्रशतंसएवकृत्वासं
त्वायांशुककन्यायांब्रह्मदत्तंजनयामास तदुक्तंहरिवंशादिषु पराशरकुलोत्पन्नःशुकोनाममहा
यशाः व्यासादरण्यांसंभूतोविधूमोऽग्निरिवज्वलन् सतस्यांपितृकन्यायांवीरिण्यांजनयिष्यति २३।
कृष्णांगौरांप्रभांशुभ्रांतथाभूरिश्रुतंजयं कन्यांकीर्तिमतींषष्ठींयोगिनींयोगमातरं ब्रह्मदत्तस्यज

अजमीढाद्बृहदिषुस्तस्यपुत्रोबृहद्धनुः बृहत्कायस्ततस्तस्यपुत्रआसीज्जयद्रथः २२ तत्सु
तोविशदस्तस्यश्येनजित्समजायत रुचिराश्वोदृढहनुःकाश्योवत्सश्चतत्सुताः २३ रुचि
राश्वसुतःपारःपृथुसेनस्तदात्मजः पारस्यतनयोनीपस्तस्यपुत्रशतंत्वभूत् २४ सकृ
त्व्यांशुककन्यायांब्रह्मदत्तमजीजनत् योगीसगविभार्यायांविष्वक्सेनमधात्सुतं २५
जैगीषव्योपदेशेनयोगतंत्रंचकारह उदक्सेनस्ततस्तस्माद्भल्लाटोबार्हदीषवाः २६ य
वीनरोद्विमीढस्यकृतिमांस्तत्सुतःस्मृतः नाम्नासत्यधृतिस्तस्यदृढनेमिःसुपार्श्वकृत २७
सुपार्श्वात्सुमतिस्तस्यपुत्रःसंनतिमांस्ततः कृतीहिरण्यनाभाद्योयोगंप्राप्यजगौस्मषट्
२८

ननींमहिषीमणुहस्यचेति २४ यद्यपिशुकःउत्पन्नमात्रएवविरक्तःसंगान्निर्गतःतथापिविरहातुरं
व्यासमनुयान्तंदृष्ट्वाकृपयाशुकंनिर्मायागतवान् तदभिप्रायेणैवायंगार्हस्थ्यादिव्यवहारइति
विरोधः सचब्रह्मदत्तोयोगीगविवाग्विसरस्वत्यां २५ सएवयोगतंत्रंचकार बार्हदीषवाःबृ
हदिषोर्वंश्याइमेदीर्घत्वमार्षं २६ सुपार्श्वकृत्सुपार्श्वस्यपिता २७

प्राच्यसाम्नां षट् संहिता जगौ विभज्याध्यापितवान् २९ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्रा
ह्मणा बभूवुः बृहदिषुप्रभृतयः [illegible] तस्यैव वंशांतरमाह नलिन्यामिति द्वा

संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २९ त
तो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् नलिन्यामजमीढस्य नीलः शांतिः सुतस्ततः ३०
शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ३१
यवीनरो बृहदिषुः कांपिल्यः संजयः सुताः भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ३२
विषयाणामलमिमे इति पंचालसंज्ञिताः मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३३ मु
द्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् अह
ल्या कन्यका यस्यां शतानंदस्तु गौतमात् तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ३५ शरद्वां
स्तत्सुतो यस्मादुर्वशीदर्शनात्किल शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभं ३६ तद्दृष्ट्वा कृपयाग्र
हीच्छंतनुर्मृगयां चरन् कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ३७ इति श्रीभागवते
नवमस्कंधे एकविंशोऽध्यायः २१

ब्रह्मभाजि ३०.३१ मुद्गलपुत्रः यवीनरादयस्तु नाशः इत्येवं पंच ३२ ३४
भार्म्याश्वस्याभूत् मिथुनं तत्र दिवोदासः पुमान् अहल्या च कन्या इति ३५।३७ इति नव

द्वाविंशे तु दिवोदासवंशमुक्त्वाथ वर्णितः । सहदेवं शोजरासंधपार्थद्वैधीधनादयः १ तस्य सोमक
स्य पुत्राणां शतं च भूव तेषां जंतुर्ज्येष्ठः यवीयान्पृषदः २ अजमीढवंशेवृष्णान्तं वमाह यइति ततः स
वरणात्कुरु ३४ तस्य कृतिनः उपरिचरो वसुः ततो वसोः बृहद्रथो मुख्यो आदिर्येषां २ तानेवा

हु कस्य. मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतान्नृप सुदासः सहदेवोऽथ सोमको जंतुजन
न्मकृत् १ तस्य पुत्रशतं तेषां यवीयान्पृषदः सुतः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सु
ताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पांचालका इमे योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्त
तः ३ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः
सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ५ कु
शांबमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ६ ।
जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः अन्यस्यामपि भार्यायां शकले द्वे बृहद्रथात् ७
ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते जीव जीवेति क्रीडन्त्या जरासंधोऽभवत्सुतः ततः
श्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः ९ त
तो विदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् जयसेनस्तत्तनयो राधिकोऽतोऽयुतोऽस्यभूत् १०

द ऊशांवेति तत्क्रान्तः पुष्पवान् जन्तेतस्यापत्यं सत्यहितः इति योज्यं ७ जरयाराक्षस्या ८ तस्या
त्सोमापेः श्रुतश्रवाः ऊरोः पुत्रः परीक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः ९ अतो राधिकादयुतो
भूदित्यर्थः १० ॥

श्री॰
भाग॰
टी॰
५८

तस्य प्रतीपस्य देवापि शंतनु बाह्लीकाः ॥ १२ प्राक् पूर्वं शंतनोर्महाभिष इति संज्ञा यस्य सः ॥ १३ यदा देवो न ववर्ष तदा शंतनुस्तत्कारणं ब्राह्मणान् पप्रच्छ तैरुक्तमयं हे राजन् त्वमग्रजे स्थिते परिवेत्ता परिविन्नः परिवित्तिः ... अग्रभुक् अग्रजे ... परिवेत्ता भवति अतस्त्वं ... राज्यं देहि ॥ १५ तेनाग्रजेऽभिषिच्यमाने ... शंतनु ।

ततस्त्वृक्षोऽथ तस्माच्च देवातिथिरमुष्य च ऋक्षस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥ ११ देवापिः शंतनुस्तस्य बाह्लीक इति चात्मजाः पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥ १२ अभवच्छंतनू राजा प्राङ्महाभिषसंज्ञितः यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ १३ शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शंतनुः समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ १४ शंतनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १५ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ १६ वेदवादातिवादान्वै तदा देवो ववर्ष ह देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ १७

वै ज्येष्ठं छंदयामास राज्यं प्रजापालनादिधर्मः ... राज्यमंगीकुरु इति प्रार्थितवान् ततः पूर्वमेव तस्य मन्त्रिणा अश्मरावसंज्ञेन देवापिं पाषण्डीकर्तुं राज्यानर्हं कर्तुं प्रहिता विप्रास्तैः पाषण्डमार्गगिरा वेदाद्विभ्रंशितः सन् वेदवादस्य निवादं ... वचनानि सोऽब्रवीत् ततस्तस्य पातित्येन राज्यानर्हे जाते शंतनोर्दोषाभावाद्देवो ववर्ष ... ॥ १७

५८

भविष्यानाह तस्य पुत्र इति यावत्समाप्ति याज्ञवल्क्यात्क्रियाज्ञानं परं वात्मज्ञानं शौनकात्प्राप्स्यति
अस्त्रज्ञानं तु कृपाचार्यादिति क्रमः याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वैष्णवोक्तेः क्वचि
त् अस्त्रज्ञानं कृपाचार्यादित्येव पाठः ३८ ३९ यत्सुतात्सुखीनलः पुत्रः तस्मात्परिप्लवात्सुनयः य

तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति।
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३९
गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्माच्छुचिरथः सुतः ४० त
स्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ४१।
परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ४२
तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः शतानीकाद्दुर्दमनस्तस्यापत्यं महीनरः ४३
दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ४४ ब्रह्मक्षत्रस्य वै योनिर्वंशो देवर्षिसत्कृतः क्षे
मकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४५ अथ मागधराजानो भवितारो वदामि ते भवि
ता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४६ ततो युतायुस्तस्यापि निरमित्रोऽथ तत्सुतः सुन
क्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ४७

स्यात्मजो मेधावीत्यर्थः तस्मात्सुदासः ततः शतानीक इत्यर्थः ४३ बृहद्रथस्य जरासंधः तस्य सह
देवः तस्य मार्जारिः तस्मान्मार्जारेः श्रुतश्रवाः ४६

1006

सहस्रसंवत्सरमेते भोक्ष्यन्ति भूपालाः ततः परं भाव्यान् द्वादशस्कंधे वक्ष्यति ४९ इति श्रीभावार्थे
नवमे द्वाविंशः २२ अथ त्रयोविंशेऽनुर्द्रुह्योस्तुर्वसोर्यदोरन्वयः क्रमात् यदोश्च वंशोऽनुक्रांतो योयावमाम

ततः सुतंजयाद्विप्रः शुचिस्तस्य भविष्यति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ४७
द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः सुनीथः सत्यजिदथो विश्वजिद्यद्रिपुंजयः ४८
बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ४९ इति श्रीभागवते नवमे द्वाविंशः श्रीशुक
उ० अनोः सभानरश्चक्षुः परोक्षश्च त्रयः सुताः सभानरात्कालनरः सृंजयस्तत्सुतस्ततः १
जनमेजयस्तस्य पुत्रो महाशालो महामनाः उशीनरस्तितिक्षुश्च महामनस आत्मजौ २
शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः वृषादर्भः सुवीरश्च मद्रः केकय आत्मजाः शि
वेश्चत्वार एवासंस्तितिक्षोश्च रुषद्रथः ३ ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् अं
गवंगकलिंगाद्याः सुह्मपुंड्रोड्रसंज्ञिताः ४ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीपतेः च
क्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते खनपानोऽङ्गतो जज्ञे तस्माद्दिविरथस्ततः
सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः रोमपाद इति ख्यातस्तस्मै दशरथः सखा शां
तां स्वकन्यां प्रायच्छदृष्यशृंग उवाह तां ७ देवे वर्षति यं रामा आनिन्युर्हरिणीसुतं नाट्यसं

तु संभवः तदेवं ययातेः पुत्राणां पंचमस्य पुरोर्वंशोऽनुक्रांतः इदानीं चतुर्थस्य वंशमनुक्रामति
अनोरिति कर्णस्य जगतीपतेरित्यंतेन १ तस्य जनमेजयस्य महाशालः तस्य महामनाः च

किं चानया भगवन्नियुक्तेनाखलानामेव दंडः कार्यः साधवस्त्वत्र तूष्णीयाः अतो विप्रवत्तेणेना स्मानत्र एद्दाणेमाह सत्वमिति हे जगन्नाणस्य पवं भूत्वं खलानामेव प्रहरणार्थं निरूपितो।

सत्वं जगन्नाणात्खलप्रहाणाय येनिरूपितः सर्वं सहो गदाभृता विप्रस्य वास्मत्कालेदेव हेनवे विधेहि भद्रं तदनुग्रहो हिनः ५ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः ६ यद्येको भगवान्प्रीत एकः सर्वगुणाश्रयः स र्वभूतात्मभावेन द्विजो भवतु विज्वरः ७ शुक उवाच इति संस्तुवतो राज्ञो विष्णुच क्रं सुदर्शनं अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाच्ञया ८ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ९ दुर्वासा उवा च अहो अनंतदासानां महत्त्वं दृष्टमद्य मे कृतागसोपि यद्राजन्मंगलानि समीहसे १०॥

निपुणः अतोस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि तेदेवनोऽनुग्रह ५ सर्वस्य हन्तापर्णेन विप्रवत्तार्थ्य प्रार्थयतो यद्यसीति द्वाभ्यां विप्रो देवदेवताय स्मिन्नतत ६ ७ राजस

श्री॰
भाग॰
नवी॰
५

१५ १६ राजेत्यादि श्लोकद्वयं स्पष्टार्थाः कोक्तिः १७ १८ प्रीतोस्मीति श्लोकद्वयं व्यक्तिर्नोक्तिः आत्मनि
मेधाये नातिथ्येन २० भूरियं तव यशो जनः कीर्तयिष्यति २१ २२ तस्यैवेयांति शापमाह ग

उक्रमः कौत्र साधूनां दुस्त्यजो वा महात्मनां यैः संगृहीतो भगवान्सात्वतामृषभो ह
रिः १४ यन्नाम श्रुतिमात्रेण पुमान्भवति निर्मलः तस्य तीर्थपदः किं वा दासाना
मवशिष्यते १५ राजन्ननुगृहीतोहं त्वयातिकरुणात्मना मदघं पृष्ठतः कृत्वा प्राणा
यन्मेभिरक्षिताः राजा तमकृताहारः प्रत्यागमनकांक्षया चरणावुपसंगृह्य प्र
साद्य समभोजयत् सोशित्वादृतमानीतमातिथ्यं सार्वकामिकं तृप्तात्मा नृपतिं प्रा
ह भुज्यतामिति सादरम् प्रीतोस्म्यनुगृहीतोस्मि तव भागवतस्य वै दर्शनस्पर्शना
लापैरातिथ्येनात्ममेधसा २० कर्मावदातमेतत्ते गायंति स्वःस्त्रियो मुहुः कीर्तिं
परमपुण्यां च कीर्तयिष्यति भूरियं २१ श्रीशुक उ॰ एवं संकीर्त्य राजानं दुर्वासाः परि
तोषितः ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं २२ संवत्सरोत्यगात्तावद्यावता
नागतो गतः मुनिस्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह २२ गतेथ दुर्वाससि सोंबरी
षो द्विजोपयोगातिपवित्रमाहरत् ऋषे

तो मुनिर्यावता नागतः तावत्संवत्सरोतिक्रां
तइति २२ द्विजस्योपयोगेन अतिपवित्रमाहरत् बुभुजे स्ववीर्यं वधेयादिलक्षणं परा

र्विमोक्षं व्यसनं च वीक्ष्य मेने स्ववीर्यं च परानुभावं २४

नृणां भगवतःप्रभावात् २४

परिक्लिश्यमानविप्रकर्माहरणात्क्रुद्धस्य गुरोः पितुः शापात्कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेण ८ तेनैव कौशिकेन १ पक्षिणोः आडीबकयोः विश्वामित्रो राजसूयदक्षिणाछलेन हरिश्चन्द्रं सर्वस्वमपहृत्य पातयामास तत्कृताज्ञो वसिष्ठो विश्वामित्रं त्वमाडिर्भवेति शशाप सोपि त्वं बको भवेति शशाप तयोश्च युद्धमभूदिति प्रसिद्धं हरिश्चन्द्रो हवैधस ऐक्ष्वाको राजपुत्र आ

धामश्चण्डालतां शापाद्गुरोः कौशिकतेजसा सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ८ पातितो वाकिरादेवैस्तेनैव स्तम्भितो बलात् १ येषां कथा हरिश्चन्द्रे विश्वामित्रवसिष्ठयोः १ यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकं ८ सोनपत्यो विषण्णात्मा नारदस्योपदेशतः वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ९ यदि वीरो महाराज तेनैव त्वां यजे इति तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः १० जातः सुतो ह्ययं तेन मां यजेति सोब्रवीत् यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ११॥

स एते स्यादिति प्रसिद्धं ८ हरिश्चन्द्रस्य चरितमाह सोनपत्य इति यावत्समाप्तिकं ऐश्वरण्यो तत्प्रसादात् पुत्रो मे जायताम् ९ यदि मे पुत्रो जायेत तर्हि तेनैव पशुरूपेण त्वां यजेयमिति ष याते तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः १० जाते पुत्रे सर्वं वरुणेन तः सुतेनो मामनेन यजस्वेति अब्रवीत् यदा पशुर्निर्दशः निर्गतदशदिवसः स्यादनन्तरमस्याब्रवी

1010

श्री॰ भाग॰ नव॰ २१

राजन्नेवकत्ता राजन्यः पशुर्यदा सान्नाहिकः कवचबन्धं आर्हः संग्रामसमर्थः ११ अथ तदा शुचिरितिवेवं तं कालं वञ्चयता राज्ञा उक्तः प्रार्थितो देवो वरुणः तं तं कालं प्रतीक्षितवानित्यर्थः १२ चिकीर्षितं आत्मना पशुत्वावकरणाय जनने १३ ततश्च अर्पितेन वरुणेन यस्त्यं अनतस्य वन्तं म

निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति १२ जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति १३। पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः १४ पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् सान्नाहिको यदा राजन्राजन्योऽथ पशुः शुचिः १५ इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा कालं वञ्चयता तं तमुक्तो देवस्तमैक्षत। १६ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत १७ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत १८ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत्समा। १९ एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाऽऽह वृत्रहा २०

इन्द्रदेवेयसतं तातं नरेशश्रुत्वा १८ समाः वत्सरमेकं १९ द्वितीये वर्षे तत्र अभ्येत्याभ्येत्य। तथैव तं प्रत्यषेधत किं किं विदाह २०॥

२१

एवं विधाऽनेकगुणान्यस्य सः विरिंचसदः सदितान् भोगान्निरयवद्यायान पश्युपदिसर्थः २४
इति श्रीभावार्थे नवमे पंचमोध्यायः ५ षष्ठारंभे मनुरीषस्य वंशमुक्त्वा ततःपरं षष्ठाध्यायष्टभि
रध्यायैः इक्ष्वाकोर्वंशउच्यते तत्र षष्ठे शशादादीनां वंशो निरूप्यते प्रसंगात्सौभरेराख्या

एवंविधानेकगुणः सराजपरात्मनि ब्रह्मणि वासुदेवे क्रियाकलापैः समवाहभ
क्तिं ययाविरिंच्यान्निरयांश्चकार २५ श्रीशुकउ० अथाम्बरीषस्तनयेषु राज्यं समानशी
लेषु विसृज्य धीरः वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः २६ इत्ये
तत्पुण्यमाख्यानमंबरीषस्य भूपतेः संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत् २७
इति श्रीभागवते नवमस्कंधे पंचमोध्यायः ५ श्रीशुकउ० विरूपः केतुमान् शंभुरंब
रीषसुतास्त्रयः विरूपात्पृषदश्वोभूत्तत्पुत्रस्तु रथीतरः १ रथीतरस्याप्रजस्य भा
र्यायां तंतवे र्थितः अंगिराजनयामास ब्रह्मवर्चस्विनः सुतान् २॥

मांधातृतनयोपते १ तंतवे सन्तानार्थं अंगिरसा जनिताः एते रथीतरस्य क्षेत्रप्रसूततत्वेन र
थीतरगोत्राः सन्तः अंगिरसा वीर्येणोत्पन्नत्वादांगिरसाश्च २

श्री०
भाग०
नवी०
१९

पुनरपि तथां तरयणाममेषां जातानां प्रवराः सुताः स्मृताः यतः तद्वीपेताः आम्रणाः स
र्थ्यः ३ तदेवं मनोर्देशास्तु पुत्रेषु पष्ठमध्यकनिष्ठ विरक्तानां वंशप्रवर्तको कद्रमादीनां च स
मानां वंशान्तासु तस्मात् मेणीकाः इदानीमति विततमित्वा कोर्देशमाह जवतस्तिमादि
नायावतो मवंशप्रस्तावः द्वतऊर्द्धं केमनो आणातानत्त स्कंडायां जनयामास दशपुत्रा
नितिपूर्वोक्तवाङ्गलाभिप्रायेणेति द्रष्टव्यां पुत्राणां शतेज्येष्ठः ४ आर्यावर्तः पुण्यभूमि

एतेत्वन्वप्रवृत्तातेपुनस्तांगिरसाः स्मृताः वर्णोत्तराणां प्रवराः तेत्रापेताद्विजातयः
३ तदेवं सतमनोर्नेजेश्वाकूर्णोण्तःसुतः तस्यपुत्रशतज्येष्ठो विकुक्षिर्निमिदंडकः ५
तेषांपरस्तादभवन्नार्यावर्तेन्नृपान्तृप पंचविंशतिः पश्चाच्चत्रयोमध्येऽपरेन्यतः २
सएकदाष्टकाश्राद्धइक्ष्वाकुः सुतमादिशत् मांसमानीयतां मेध्यं विकुक्षेगच्छ
मा चिरं तथेतिसवनंगत्वा स्रगान्हत्वाक्रियार्हणान् श्रांतोबुभुक्षितोवीरःशशंचा
दद्पस्मृतिः ७

मध्ये हिमवद्विन्ध्ययोः तस्मिन्नुत्तरस्यां समुद्रपर्यंतं ... विभागेन पंच
विंशतिर्न्नृपाअभवन् हेन्नृपतथाअपश्चाच्चद्वविंशतिः मध्येतज्येष्ठास्त्रयः अपरेत अन्य
त्रदक्षिणोत्तरादिषु ९ विकुक्षिर्नवंशशाद्दंश निर्दिश्य उच्यते तदेवमाह सएकदे
तित्रिभिः ८ क्रियार्हणान् श्राद्धार्हान् आदयत्अभक्षयत् २॥

नकुरुर्वसिष्ठः प्रोक्तपायसमादौ वितसंस्कारोय ८ तत्कोविधिः सदाचारोयेनतं ९ सत्यव्रतस्त्वाऽरुण्या
जकेन वसिष्ठेन चंडालयोगे विरक्तां योगी सन् तेन योगेन कलेवरं स्वकायमरतनतेनवाप ९ सा
सतपालयनृपविमोजे ९ देवपुरस्थजपान पुरंजयोऽद्रोवाहोसेतिरक्षवादः ककुदिस्थितन्नात

शोर्बभिवंद्यामासपिवेनेन च तत्कृतः चैदिनंसोवतुगायादद्वष्टमेतदकर्मकं ८ ता
नाग्रज्ञसूनतत्कर्मशूलणाभिहितंनरः देवानिःसार्वपाशानस्तनत्तक्कविधिकृषा ९ सत्य
विप्रणसवादंयान्जकेनसमावरतं स्वकाकलेवरं योगीसतेनावापयनपरे ९ पितरंपुप
रतेभ्येत्पाविकृतिःपृथिवीमिमां शासदीनेदरियतैः शशादइतिविश्रुतः ९ पुरंजय
स्तस्यसुतःइन्द्रवाहइतीरितः ककुत्स्थइतिवाप्युक्तःश्रृणुनामानिकर्मभिः ९ कृतां
तस्त्रासीत्समरोदेवानां सहदानवैः पार्ष्णिग्राहोहतोवी
रोदैवैर्दैत्यपराजितैः १२ ॥

ककुत्स्थइतिवश्राशादसनस्यजीर्णानामानितत्कर्मनिमित्तानि १२ नानिवव्याचख्यानग्राद।
कृतांतइतिसमर्थभिः कृतविस्मयनेयतीनितथा पार्ष्णिग्राहः सदायः १२

इंद्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हंतुमिच्छामीति न वाहनत्वे वृतः संनिश्चेलत्वायानदनं
गौ ऋर्षति स्तो देवतान स्ववाहनत्वाय ममस्तुतो धोचमूत्रेत्यर्थः १४ १९ येभिसुर्वयपुस्तान्यमं
दृशांचितं सदेहानेव भल्लैर्वनयदित्यर्थः १७ तस्येषुपातेमेडकुत्वः स्वमालयं पाताले १९ इति

वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः १४ स
सन्नद्धो धनुर्दिव्यमादाय विशिखान् शितान् स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः १५
तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः प्रतीच्यां दिशि दैत्यानां न्यरुणत् त्रिदशैः पु
रं तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणं यमाय भल्लैरनयद्दैत्यानभिययुर्मृधे १७ त
स्येषुपाताभिमुखं युगांताग्निमिवोल्बणं विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं १८
जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः १९
पुरंजयस्तस्य सुतोऽनेनास्तत्सुतः पृथुः विश्वगंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः २०
श्रावस्तस्तत्सुतो येन श्रावस्ती निर्ममे पुरी बृहदश्वस्तु श्रावस्तिस्ततः कुवलयाश्व
कः २१ ॥

नैः कर्मभिः पुरंजयादिनामभिराहृतः पाठांतरे आहूत इत्यर्थः १९ २० श्रावस्तिः श्रावस्त
स्सुतः कुवलयाश्वएव धुंधुमार इति ख्यातः २१ ॥

1015

तत्र कारणमाह सुता नामैकविंशत्या सह सैर्हृतः सनन्दनवानुं पुत्रमायस्तिवेति चकारस्नानयः
२२ २५ अश्रुतस्मानि [illegible] भात्कुशाश्च: २३ भार्याणां शतेन सह सप्तशुद्धार्थ्य सिद्धदेवमामिषिं वर्तया।
मास्त स्नेत्यास्त्रयाः २६ तर्षितः तर्षितः सनज्जलाश्रेय प्रदिष्टः मे त्रामि मेवितेजलं पत्येदेयं स्वयं ययौ २८

यः स्त्रियाश्च हतं कस्य पुंपुत्रामास्वं वली सुता नाम्नैकविंशत्या सह सैव हृतः २९ पुं
पुत्रमायस्ति। आतस्तत्सुता स्नेवजनः पुत्रो मुगो वाप्निना सर्वे त्र्ययपवावशोषिताः ३२ ह
तास्वः कपिलास्य महा स्वस्ति मारत हत्वा स्व पुत्रोद पुत्रो निकुंभस्तत्सुतः स्मृतः ३४ व
हुणा [illegible] स्यकृशा यो या स्व [illegible] नजित [illegible] भवतस्य सेनपमोवने गताः मा
र्या शातेन निर्विलस्य [illegible] योस्य कृपालवः इति स्वयं [illegible] याचक्रे [illegible] समाहिताः ३६ ता
जानयतस्य सदनं [illegible] निशितशितः हत्वा [illegible] याना निप्रोक्ता [illegible] योमं त्रजलं स्वयं ३७ उत्ति
तास्तेनिशाम्याय सुदकं कलशं प्रभो प्रभक्तः कस्यक मे दपीतं पुत्रस्य वने जलं ३८ राज्ञापि
तं विदितार्थ ईश्वरप्रदितेन तत् ईश्वरायनमस्कृत्य हो देव बलं बलं ३९ ततः काल।
उपाहृते [illegible] निर्भिय ददिताणां पुत्रं [illegible] स्यतनयस्य [illegible] वतीज जानह ४०

मुदकं निरुदकं पुत्रस्य वनं प्रत्तो सति कारणं ४० अहो देवबलं श्रुत्वा बलं नक दितिवदंत ईश्वरा
यन नमस्कारं चक्रुः ४१ ३१ ॥

स्तन्येकंधास्यतिधास्यतीतिकिंतु विप्रैरुक्तेरतिनस्याभिप्रायामारखितेंद्रः मांधाताहेवत्समारो
दीरितितुवदन्देशिनींतर्जनींमुखेददाविति शेषः ३१ तस्यपितायुवनाश्वोभिन्नकुक्षिरपिनम
मारकिंतुकालांतरेतपसासिद्धिमन्वगात् ३२ मांधातुर्महिमानमाह त्रसद्दस्युरितिषड्भिःयं

कंधास्यतिकुमारोयंस्तन्येरोरूयतेभृशं मांधातावत्समारोदीरितींद्रोदेशिनीमुखे ३१
नममारपितातस्यविप्रदेवप्रसादतः युवनाश्वोथतत्रैवतपसासिद्धिमन्वगात् ३२
त्रसद्दस्युरितींद्रोंगविदधेनामतस्यवै यस्मात्त्रसंतिह्युद्विग्नादस्यवोरावणादयः ३३
यौवनाश्वोथमांधाताचक्रवर्त्यवनिंप्रभुः सप्तद्वीपवतीमेकःशशासाच्युततेजसा
ईजेचयज्ञंक्रतुभिरात्मविद्भूरिदक्षिणैः सर्वदेवमयंदेवंसर्वात्मकमतींद्रियं ३४
द्रव्यंमंत्रोविधिर्यज्ञोयजमानस्तथर्त्विजः धर्मोदेशश्चकालश्चसर्वमेतद्यदात्मकं ३५
यावत्सूर्यउदेतिस्मयावच्चप्रतितिष्ठति सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते ३६

गर्भेजातस्तस्मान्मांधातर्हेरुग्राः कंपिबासितस्मादितिप्रतंइंद्रोयस्यत्रसद्दस्युरिति
नामविदधेतंमांधाताअवनीमेकःप्राशासदच्युततेजसानयः ३३ अच्युतस्यतेजसाप्रभु
तेननतेजस्विनो ३४ आत्मविद्भिः यज्ञैर्विष्णुमीजेतमेवविशिनष्टिसर्वदेवमयमि
तिसार्द्धेन ३५ प्रतितिष्ठतिअस्तंगच्छति ३६

४२ ४५ वसुदेवस्य पत्नीः पुत्रांश्चाह ४६ पौरवीत्येकादशभिः ४७ कौसल्या भद्रा ४८ ॥ अष्टम
स्तमिज्ञार्तेनपालादीशमीकात्सुदामिनी कंकस्य कर्णिकायां वै ऋतधामजयावपि ५२
पौरवी रोहिणी भद्रा मदिरा रोचना इला देवकीप्रमुखाश्चासन्पत्न्य आनकदुन्दुभेः ४५ बल
गदसारणदुर्मदविपुलध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४६ सुभद्रो
भद्रबाहुर्दुर्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ४७ नन्दोपन
न्दकृतक शूराद्या मदिरात्मजाः कौशल्या केशिनं त्वेकमसूत कुलनन्दनं ४८ रोचना
याः हस्तहेमाङ्गदादयः इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ विपृ
ष्ठो धृतदेवायामेक आनकदुन्दुभेः शान्तिदेवात्मजा राजन् प्रशमप्रसितादयः राजा
नः कल्पवर्षाद्या उपदेवासुता दश वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ५१
देवरक्षितया लब्धा नव चात्र गदादयः वसुदेवः सुतानष्टावादधे सहदेवया पुरुवि
श्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ५३ की
र्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं अष्टमस्तु त
योरासीत्स्वयमेव हरिः किल सुभद्रा च महाभागा तव राजन् पितामही यदा यदा हि ध
र्मस्य क्षयो वृद्धिश्च पाप्मनः तदा तु भगवानीश आत्मानं सृजते ह
रिः स्वयमेवासीत् नव
कर्मादिनाहं तेनानाभ्यां जनितो वा यतो सोहरि ५५ तदेवायमपाद्यति [illegible] तित्रिभिः ५६

श्री॰
भाग॰
नव॰
९५

ईशस्य मायया नियंतुः परस्यास्य द्रष्टुः साक्षिण आत्मनः सर्वगतस्य । नह्येभूतस्य मा ।
याविनोदं विनाजन्मनः कर्मणो वा हेतुः संभवतीत्यर्थः ५६ किंच यस्य मायाचेष्टितं पुंसो जी ।
वस्यानुग्रहकस्य जनः कर्मादि यावत्तेषां जन्मनादिसंभवः अनुग्रहमेवाह हि यस्मात्तद्व ।
स्थित्याद्यर्थं पते प्रलयेनी नीपायेजीवस्य धर्माद्युत्सभवान्तइत्यादिसृष्ट्यादिनाधर्मादिसंपादने
नानुग्रहः तथात्मलाभाय मोक्षाय चेष्यतेतन्निवृत्तेःतेनैव रूपमाणानन्तसामियमादेनिवृत्तेः

नह्यस्य जन्मनो हेतुः कर्मणो वा महीपते आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ५७
यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ५८
अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः भुव आक्रम्यमाणाया अभाराय कृतोद्यमः
५९ कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः सहसंकर्षणश्चक्रे भगवान्मधुसूदनः
६० कलौ जनिष्यमाणानां दुःखशोकतमोनुदं अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः
६१

५७ तस्य विहितं भूमेरनुग्रहमाह अक्षौहिणीनां [illegible] पां अभाराय भारपरिहाराय ५८
सुरेश्वरैरपि मनसाप्यपरिमेयानि अचिंत्यानि कर्माणि संकर्षणसहितश्चक्रे ६० संकल्पमात्रे ।
ण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह क
लाविति जनिष्यमाणानां दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत् ६१

1019

1020

1021

श्री॰
भाग॰
नवी॰
९

ॐ नमो भगवते वासुदेवाय नमः ॐ गुणानां गुणिनां वाप्यैशानां वैकल्पनिधिं नमहंशरणं
यामि परमानंदमाधवं त्रिगुणात्रिभिरध्यायैर्वैवस्वतसुतान्वयः नव मेकूलसस्कीर्तिर
क्ष्वाकुपवित्रनृपे २ एवमुक्तोध्ययस्कंधे सूर्यः सनशोधकः कार्तपालकवक्रादिमना
ष्टीनो निरूपणोः ३ स्कंधेमस्कंधसमानामंततरंगेशमनकथा सूर्यसोमान्वयाख्यानैरथ

परीक्षिदुवाच ॐ म नेतराणि सर्वाणि नयो
न्वनिश्रुतानि मे वीर्या एपनंतवीर्यस्य हरेस्तत्र
णि कृतानि च १ योसौ सत्यव्रतो नाम राजर्षिर्द्रवि
डेश्वरः ज्ञानं योतीतक ल्पांते लेभे पुरुषसेवया
ल्पे वै विवस्वतःपुत्रो म नुरासीदिति श्रुतं त्वत्तः
नुस्तस्यापोक्ता ंद्रा स्तस्य सुतान्पाः ३ तेषां
वंशं पृथक्ब्रह्मन्वंशा नुचरितानि च कीर्तय
नुस्तमहाभाग नित्यं शुश्रूषतां हि नः ४ ये भूता ये
भविष्याश्च भवंत्यद्यतनाश्च ये तेषांनः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् सूत
नासंगतोस्मि ५ तत्र चात्रयोद ३॰ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनत ६
शाभिरध्यायैः सूर्यवंशानुवर्णने एकादशभिरध्यायैः सोमवंशस्ततः परैः २ तत्र
प्रथमेध्याये वैवस्वतान्वये सोमवंशप्रवेशोक्तो सुद्युम्नसोमसद्व्याने ५ उक्तानुवादस्तु

दशैतां पत्नीसहस्राणां भार्यासुतस्य प्रत्येकं दशलक्षमिति एवं तासु पुत्राणां दशलक्षसहस्राणि
जनयामास पृथुश्रवाः पृथुकीर्तिः पृथुश्रवाः पृथ्वादयः षट् प्रधानाः श्रेष्ठा येषां तेषां मध्ये पंच आत्म
जा आसन् शृणु इत्युक्त्वा एवाह पुरुजिदिति भार्याभयादेवैकभार्यः सन् यथा पतेः शैब्यामेव स्नुषात्वस
तन्नयमेव वधूत्वप्रदर्शनं वदितिदर्शयन्नाह ज्यामघस्त्विति १४ यद्दि सपत्नी सा न तर्हि स्नुषेयं यु

दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः २१
धर्मो नामोशना तस्य हयमेधशतस्य याट् तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु पु
रुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः २२ ज्यामघस्त्वप्रजोप्यन्यां भार्यां शैब्यापतिर्भया
त् नाविन्दच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् २३ रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षि
ता केयं कुहक मत्स्थानं रथमारोपितेति वै २४ स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवी
त् अहं बन्ध्यासपत्नी च स्नुषा मे युज्यते कथं जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते अ
न्वमोदन्त तद्विश्वेदेवाः पितर एव च २५

येनापि न तेन दत्ता नाह २१ अहं सपत्नी चेति २६ प्रतिभयव्याकुलाप्याह जनयिष्यसीति भा
र्याभयप्रकंपमानहृदि न सर्वांगस्य राज्ञः प्राणसंकटमालोक्यानुकंपिता स्तेन पूर्वं बहुका
लमाराधिता विश्वेदेवाः पितरश्च तथास्त्विति अन्वमोदन् ततश्च देवतानां प्रसादेन जनयिष्या

श्री.
भाग.
टी.
९

प्रतिवचनमुद्दिष्टेन गुणेन च निवृत्तं रजः स्नुषा शैब्यागर्भं धात्. तस्य च सहस्रिशापवशादिभिः स्कं
यथोक्तं भार्यां सुप्रजास्तथैकविंशतिविंशत्या नाः तेषां मध्ये ज्येष्ठः शैब्यापतिरभूत्पश्च
ति २८ इति नवमे त्रयोविंशः २३ चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवः वंशानां नामसंख्याः प्रोक्ता

शैब्यागर्भमधात्काले कुमारं सुषुवे शुभं स विदर्भ इति प्रोक्त उपयेमे स्नुषां सती ३८ इ
ति श्रीभागवते नवमस्कंधे यदुवंशानुकथने त्रयोविंशोऽध्यायः २३ शुक उवाच तस्यां
तं भूतेदद्यद्वैदेवानांभूतयज्ञमचलते सदानान्सर्वतत्वज्ञान्ब्राह्मणान्वेदपारगान् सदेषामेव

भूतानांवलिदानंविधानतः श्रणम्यतेभ्योयद्दत्तमन्नमानुष्यमुच्यते पितृनुद्दिश्ययद्दत्तं पितृय

ज्ञश्च वर्तते एवं पंचमहायज्ञान्कुर्यात्सर्वार्थसिद्धये सर्वेषामेवयज्ञानांब्रह्मयज्ञो वरः स्मृतः ब्रह्म

यज्ञरतो मर्त्यो व्रह्मलोकेमहीयते ब्रह्मयज्ञेनतुष्यंति सर्वे देवा सनातना: ब्रह्माचभगवान्विष्णु:

शंकरो नीललोहितः वेदाश्चपितरः सर्वेवनात्रकार्याविचारणा ग्रामाद्बहिर्गतोभूत्वा ब्राह्मणो ब्रह्मय

ज्ञवित् प्राचव्रजेदथः सम्भवेद्दष्टजानांतटंनरः प्राच्यांवाप्युदीच्यांवाअशुद्धेचाम्यथापिवा प्रणम्य मो

वमनकं यो ह्मयज्ञार्थमेवतु शीतमर्थंतत्कृतवाथपीठगतावपादएवच यज्ञोपवीतंपरिमृश्यवर्हिः

प्रक्षाल्यचवाणिना शीतमर्थसामवेदानामुपस्थश्यतमस्थानि स्पृशेदथर्ववेदानां नेत्रवांगिरसांत

लिं·
ग·पू·
५५

1158

घ्रा नासिके ब्रह्मणोंगानां त्वाल्या वाल्यचवारिणा अष्टादशपुराणानां ब्रह्माद्यानां तथैव च तथाचोपपुरा
णानां सौरम्मानां तथाक्रमं शृण्वानामितिहासानां सैवन्नानेन तथैव च श्रोत्रे स्पर्शेंद्रिये तु शर्व स्कंदे तत्व तन:
स्पर्शेन कलादीनां तु सर्वं संकल्पविकल्पविवर्जिता: एवं माह ममचात्मीयं द भीणां शुंजमात्मन:
हस्तौ पाणितले धीमानात्मनोदक्षिणेन वै हेमा शुली यमध्यकाव स्वं ब्रह्मतीर्थेन वा पिबा विधिवद्ब्रह्म
यज्ञं च कुर्यात्म चौ समाहित: अकृत्वा तु मुने: पंचयज्ञान्वै च द्विजोत्तम: भुक्त्वैव सूकरा
णां तु योनौ वै जायते नर: एवं स्नात्वा नियमेन तत्वं तथा हावमिच्छुता: पंचयज्ञादय: स्ना
नं कृत्वादौ सर्वयात्मन: तीर्थं संगृह्य विधिवत्स्य विशुद्धि विरच्य न: वाहिरे वग्रहात्मादौ ह
स्तौ प्रक्षाल्य पाणिना अर्थी तु भस्म नास्नानं विधिपिवहं हमदृय शोध्य भस्मयथान्यायं प्रा
णवेनाग्निहोत्रजं ज्योति: सूर्य इति प्रातस्तु जुहुयादु दिते न तु ज्योतिरग्निस्तत: सायं समप्युगा
नु दिनेमृषा तस्मादु दितहोमस्य भस्म तत्पावनं स्मृतं नास्ति सत्य समं यस्मात्सत्यपातकं
चयत् ईशानेन शिखादेश मुखंतत्पुरुषेण च अघोरेण हृदेशं मध्ये वामेन सद्वता: सद्य
नपादौ सर्वांगं प्रणवेनाभिवादयेत् तत: प्रक्षाल्य पादौ हस्तौ ब्रह्मविदां वर: अपो ह्य वस्त्र
मादाय देवदेवमनुस्मरन् मंत्रस्नानं तत: कुर्यादापोहिष्ठादिभि: क्रमात् अमैस्त्रैव तथा
ऋग्यजुसामसंभवै: द्विजानां तु हितायैव कथितं स्नानमद्यते संक्षिप्य य: सकृत्कु
र्यात्स याति परमं पदं इति महापुराणे लैंगे जलभस्ममंत्रनिर्णये षट्विंशोध्याय:

वदान्यतानुशासनात्तस्य कार्यार्थदर्शिनः १४ लब्धप्रशमनस्वस्थमथैनं समुपस्थिता

पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा १५ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुस्सहः

प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १६ वपुर्जयमातुधं कर्तुं समये पार्थिवं रघोः

स्वधनुः प्रं किं केतनं वसंजह्रुस्त्तमनुना १७ वार्षिकं संजहारेंद्रो रघुर्जैत्रं धनुर्दधौ प्रजार्थ

साधने तौ हि पर्यायोद्यतकार्मुकौ १८ पुंडरीकातपत्रस्तं विकसत्काशचामरः ऋतुर्विडं

बयामास न पुनः प्राप तच्छ्रियं १९ प्रसादसुमुखे तस्मिंश्चंद्रे च विशदप्रभे तदा चक्षुष्मतां प्री

२ तिरासीत्समरसा द्वयोः २० हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां प

र्यस्ता यशसामिव २१ वसंतेक्षुच्छायरक्षणकारणात् स्वलनिपातिनां सस्यसंवादिभिः कैः श्या

लिजागोप्योजगुर्यशः २१ ~~प्रससा~~ इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयं आकुमारकथोद्घा

तं शालिगोप्यो जगुर्यशः २२ प्रससादोदयादंभः कुंभयोनेर्महौजसः रघोरभिभवाशंकि चुक्षु

भे द्विषतां मनः २३ मदोदग्राः ककुद्मंतः सरितां कूलमुद्रुजः लीलाखेलमनुप्रापुर्महोक्षा

२०
२१

सस्यविक्रमं २४ प्रसवैः सप्तपर्णानां मदगंधिभिराहताः असूययेव तन्नागाः सप्तधैव प्रसु
स्रुवुः २५ सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् यात्रायै चोदयामास तं शक्तेः प्रथमं
शरत् २६ तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ
२७ स गुप्तमूलपर्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया २८
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं २९ स ययौ
प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा अहितान् अनिलोद्धूतैस्तर्जयन्निव केतुभिः ३० रजो
भिः स्यंदनोद्धूतैर्गजैश्च घनसन्निभैः भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ३१ प्रता
पोग्रे ततः शब्दः परागस्तदनंतरं ययौ पश्चाद्रथादीति चतुःस्कंधेव सा चमूः ३२ म
रुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ३३
पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः कृशाः पश्चात्[illegible]
३४ स सेनां महतीं कर्षन्पूर्वसागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३५

२१

1160

त्याजितैः धनं
त्याझितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः ३६
पौरस्त्यानेवमाक्रामंस्तांस्तान्जनपदान्जयी प्रापतालीवनश्याममुपकंठंमहोदधेः ३७ अन
म्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसी ३८ वंगा
नुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तंभान् गंगास्रोतोंतरेषु सः ३९ आपा
दपद्मप्रणताः कलमा इव ते रघुं फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ४० स तीर्त्वा क
पिशां सैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिंगाभिमुखो ययौ ४१ स प्रतापं म
हेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् अंकुशं द्विरदस्येव यंता गंभीरवेदिनः ४२ प्रतिजग्राह
कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ४३ द्विषां विष
ह्य काकुत्स्थस्तत्र नाराचदुर्दिनं सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ४४ भ्रमभूयं तवाकृतानौ
वरतांशात्रसिंजैतौः मर्मरः पवनोद्धूतराजतालीवनध्वनिः ४५ चापव्यासु [illegible] निर्धातासदवि
द्धां महोदधेः गजानीकारसकालिंगं नादः सर्पैरुवा मिवादधे ४६ तांबूलीनां दलै

ताम्बूलवल्लीपरिणद्धपूगः नालकेरासवं योधाः शात्रवं च पपुर्यशः ४७ गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः श्रियं महेंद्रनाथस्य जहार न तु मेदिनीं ४८ ततो वेलातटेनैव फलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयो ययौ ४९ स सैन्यपरिभोगेन गजदानसुगंधिना कावेरीं सरितां पत्युः शंकनीयामिवाकरोत् ५० भयोत्सृष्टविभूषाणां तेन केरलयोषितां अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ५१ स्पृष्टाजानेयखुरत्वक्सं पक्वैलानां [illegible] सं भवं [illegible] नसिसपादिया मकारकोशविलं रजः ५२ बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः हरितोद्भ्रष्टमारीचा मलयाद्रेरुपत्यकाः ५३ ससंजुरश्वक्षुण्णानां एलानामुत्पतिष्णवः तुल्यगंधिषु मत्तेभकटेषु फलरेणवः ५४ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं नास्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ५५ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि तस्यामेव रघोः पांड्याः प्रतापं न विषेहिरे ५६ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ५७ स निर्विश्य यथाकामं तटेष्वालीनचंदनौ स्तनाविव

ली

वंदिशास्तस्याःशैलौमलयदुर्दुरौ ५८ असह्यविक्रमः सह्यंदूरमुक्तमुदन्वता नितंबमिव मेदि

न्याः स्रस्तांशुकमलंघयत् ५९ तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सारितो

प्यासीत्सह्यलग्नइवार्णवः ६० मुरलामारुतोद्धूतमगमत्कैतकंरजः तद्योधवारबाणाना

मयत्नपटवासतां ६१ खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु कटेषु करिणां पेतुः पुंनागेभ्यः

शिलीमुखाः ६२ अवकाशंकिलोदन्वान्रामायाभ्यर्थितोददौ अपरांतमहीपालव्याजेनर

घवेकरं ६३ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमेवतत्रोच्चैर्जयस्तंभंचकारसः

६४ पारसीकांस्ततोजेतुं प्रतस्थेस्थलवर्त्मना इंद्रियाख्यानिवरिपूंस्तत्त्वज्ञानेनसंयमी ६५

यवनीमुखपद्मानांसेहेमधुमदंनसः बालातपमिवाब्जानामकालजलदोदयः ६६ संग्रा

मस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः शार्ङ्गकूजितविज्ञेयप्रतियोधेरजस्यभूत् ६७ भल्ला

पवर्जितैस्तेषां शिरोभिःश्मश्रुलैर्महीं तस्तारसरघाव्याप्तैः सक्षौद्रपटलैरिव ६८ अपनी

तशिरस्त्राणाःशेषास्तंशरणंययुः प्रणिपातप्रतीकारः संरंभोहिमहात्मनां ६९ विनयंतेस्म

तद्योधामधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ७० ततःप्रतस्थेकौबेरींस

रघु०
१९

भासानिवरघुर्दिहंपारेरसेतुरिवोदीच्यानुद्धरिष्यन्नरसैरिव ७१ जिताननजयस्तस्य तेजेवकु
नाराथपुरंः सरानं मेहोलीन सिवोवीजिः प्रववेप्रोत्तरापथं ७२ विनीताध्वश्रमास्तस्यं वं
कूतीरविवेष्टनैः दुधुवीजिनः स्कंधान् लग्नकुंकुमकेसरान् ७३ तत्र हूणावरोधानां भर्तृषु
व्यक्तविक्रमं कपोलपाटलादेशिवभूव रघुचेष्टितं ७४ कांबोजाः समरे सोढुं तस्य वीर्यमनी
श्वराः गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ७५ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः
[illegible] नत्वावपन्न ७६ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः वर्धयन्निव
तत्कूटानुद्धूतैर्धातुरेणुभिः ७७ शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमं दरीगृहगतानां सिंहानां परिवृत्त्य
[illegible] प्रांशुभिर्वासिते [illegible] ध्वनितः तत्र [illegible] भोगीमरुत्तस्त्र सेविरे
७९ विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्संगा निषण्णमृगनाभिभिः ८० सर
लासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ८१ तत्र जन्यं
रघोर्घोरं पार्वतीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ८२ शरैरुत्सवसंकेतान्
सकृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ८३

राम०
१९

1164

संकेतात्सहकत्वाविरतोस्वान्जवादाहामगांवाहूर्गोपयामासंक्षिनयान्त ८४ पत्स्यरेत्तां
विज्ञातत्सिबुपायनयाधीगाबुराज्ञाहिमवंतापमरोराजहरागिमाद्रिगां ८५ तत्राद्रोभ्येयरे
राशिनिवेपा[illegible]सेवाहसः राज्ञापैलस्मानुदेसासादेसदद्रानउखिरये ८६ चकंपेत्तिर्गी
लोहिसेनक्षि[illegible]ज्ञालिषपवरं[illegible]दुज्ञा[illegible]नतोपुरि[illegible]कालागरुदुमैः ८७ नपुंसेदे
सुहाकं[illegible]वदु[illegible]नंरथवर्तमैरजोस्यकुतरावंयताकिनो ८८ नमीगः कामसूत्रासां
मन्याखडलाव[illegible]सभे[illegible]कैटैर्गोगैरूप्यतुपस्तोधयैः ८९ कामरूपेश्वरस्सहेम
पीकाधिरेवतां रत्नपुष्पोपहारयांबभौयामासंवृपादयोः ९० तिजित्वाद्विषोजिष्णुर्व
र्तंत्तरयोस[illegible]ज्ञेविश्रामयनेसजांछ[illegible]नेपुमौलिषु ९१ सविश्वजित्तमारेभेपत्रं
सर्वस्वदक्षिणांउदानंहिविसर्गायसतांवारिमुचामिव ९२ सत्रांतेसचिवसखः पुरस्क्रिया
भिर्गुर्वीभिर्मितंवरायवल्लीकानंकाकुत्स्थस्थिरहोसुकावरोधान्राजन्यानखपुरनिर
लयेनुमेनेनेरेखाधनेकुलिशानपत्रचिह्नसमूजंगूरुसापुगंप्रसादलभ्यंप्रस्थानगुरुरणानि

रंगुलीषु चक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं ८७ यज्ञं तेन मघवभ्याभिषेकपूतं सत्रान्ते रैः श
मितपराजयव्यलीकाः आमंत्र्य स्वकदंतिनानि निवृत्य ज्ञाः स्वानि स्वामेव निभुजः पुनर्जग्मुः ८८
इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ दिग्विजयो नाम चतुर्थः सर्गः ४ तमध्वरे विश्व
जिति क्षितीशं निःशेषविश्राणितकोशजातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतंतु
शिष्यः १ स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः श्रुतप्रकाशं यशसा प्रकाशः प्रत्यु
ज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्युवाच ३ अप्यग्रणीर्मंत्रकृ
तामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः
४ कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि आपाद्यते न व्ययमंतरायैः
कच्चिन्महर्षेस्त्रिविधं तपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः संवर्धितानां सु
तनिर्विशेषं कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानां

२० रा०

जंकांतिरात्राववदितो वदन्यं संचरेतोगतानो निर्हृतं तुयहुतिरनं जगाद भूयो जगदेकना
थः २३ गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामं गतो वदान्यांत
रमित्ययं मे मा भूत्परीवादनवावतारः २४ स त्वं प्रशस्ते महिते मदीये वसंश्चतु
र्थोऽग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थं
२५ तथेति तस्यावितथं प्रतीतः प्रत्यगृहीत्संगरमग्रजन्मा गामात्तसारां
रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् २६ वसिष्ठमंत्रोक्षणजात्प्रभावा
दुदन्वदाकाशमहीधरेषु मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य
२७ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामंतसंभावनयैव
धीरः कैलासनाथं तरसा जिगीषुः २८ प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः
कोषगृहे नियुक्ताः हिरण्मयीं कोषगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः २९ तं

1167

रघुः

र॰वं॰

२२

तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नं ३० जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यस
त्त्वौ गुरुप्रदेयाधिकनिस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवामीशतवाहितार्थं प्रजेश्व
रं प्रीतमना महर्षिः स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२॥
किमत्र चित्रं यदि कामसूर्भूः वृत्ते स्थितस्याधिपतेः प्रजानां अचिंत्यनीयस्तु तव प्रभावो म
नीषितं द्यौरपि येन दुग्धा ३३ आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुष
स्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पितेव ३४ इत्थं प्रयुज्याशिषमग्र
जन्मा राज्ञे प्रतीयाय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जी
वलोकः ३५ ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारं अतः पिता ब्रह्मणए
व नाम्ना तमात्मजन्मानमजं चकार ३६ रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्न
तत्वं न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ३७ उपात्तविद्यं

२२

क्रियां नमिते स्वर्पितत्सललाटं भगरकामा मुमिकुशेषु तदेक प्राप्याप्युत नाभिना

लाकचिन्म गीलाम नवापुसतिः ७ निवर्त्तितेयैर्दियम अभिषेकोयेमो निवापा

लयः [illegible] लांता न्युत्कुषष्ठ ट्ठुनः रैकनानिति [illegible] निवसीर्थजलानि कचित् ८

[illegible] रवां [illegible] कड्डरीये राम पूर्व तेजानयदैर्नकके तकालोपपन्नानिष्ठि कल्म

मारिवनर्य [illegible] साधनं वः ९ उपुषियुसन्नेनमहर्षिणा लंसमग्गिनीयानुम

नोगहायकालोहर्ष [illegible] मितुष्ठितायं सर्गीयकारहूम मासमंते १० तयाहतो ना

भिजमेनत्नदम नोनियोगक्रियया तसकं मेउपुयागया शाहि तुरत्न नावाप्रासो सिसं

भावयितुं [illegible] ११ इत्यह्रियाऋानुमिनं यस रघोरुदा मपि जोनिशाम्य स्वार्थोपतिं

पुति द्वलोणः [illegible] पुत्रमवोचहूरतं तुष्टाश्च: १२ सर्वत्र नः शांतिमवेहि राजन्नाथ कुतस्त्वय्य

प्रभूपुजानासूर्यनयप्तावरणाय दृष्टेः कलेनलोकेसकर्यं तमिन्वं १३ भक्तिः प्रतीत्सषक

लोवित्तालपूर्वां यदा भागतयानिशेषं व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति

र.वं.
२२

मे विषादः १४ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः आरण्यकोपा
त्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः १५ स्थाने भवानेकनराधिपः सन्नकिंच
नत्वं मखजं व्यनक्ति पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः १६
तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये स्वस्त्यस्तु ते निर्गलितांबुगर्भं श
रद्घनं नार्दति चातकोपि १७ एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषि
ध्य किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त ततो यथावद्विहिताध्वराय त
स्मै स्मयावेशविवर्जिताय वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे १९
समाप्तविद्येन मया महर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै स मे चिरायास्खलितोपचारां तां भ
क्तिमेवागणयत्पुरस्तात् २० निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः वित्तस्य
विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति २१ सोहं सपर्याविधिभाजनेन मत्वा भवंतं
प्रभुशब्दशेषं अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२ इत्थं द्विजेन द्विजरा

राम
२२

1170

धिजद्रुमस्यलंयौवनेद्धे दविशेषकान्तं श्रीर्गन्तुकामापि गुरोरनुज्ञां धीरेव कन्या पितुराचकां
क्षे ॥३८॥ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः आप्तः कुमारानयनोत्सु
केन भोजेन दूतो रघवे विसृष्टः ॥३९॥ तं श्लाघ्यसंबंधमसौ विचिंत्य दारक्रियायोग्यदशं च पुत्रं
प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीं ॥४०॥ तस्योपकार्यारचितोपचारा
वन्येतरा जानपदोपदाभिः मार्गेनिवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ॥४१॥
स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशयामास विलंघिताध्वा क्लान्तं र
जोधूसरकेतु सैन्यं ॥४२॥ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः निर्धौ
तदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ॥४३॥ निःशेषविक्षालितधातुनापि वप्रक्रि
यामृक्षवतस्तटेषु नीलोर्ध्वरेखाशबलेन शंसन् दन्तद्वयेनाश्मविकुंठितेन ॥४४॥ संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दं बभौ स भिंदन्बृहतस्तरंगा
न्वार्यर्गलाभंग इव प्रवृत्तः ॥४५॥ शैलोपमः शैवलमंजरीणां जालानि कर्षन्नुरसा स पश्चात्
पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ॥४६॥

वार्यर्गलाभंग इव प्रवृत्तः ॥४६॥ कारंडवोत्सृष्टमदुपुतानाः पुलिंदयोषांबुविहारकांचीः क

र्षन्नसौ बाललतानदीमः प्रवाहलग्नास्तटमुत्ससर्प ४७ तस्यैकनागस्य कपोलभित्त्योर्जला

वगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ४८ सप्तच्छदक्षीरक

टुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा विमुखा बभूवुः

४९ सच्छिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्राणविहस्तयोधं से

नानिवेशं तुमुलं चकार ५० तमापतंतं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः निवर्त

यिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टशार्ङ्गः ५१ स विद्धमात्रः किल नागरूपमुत्सृज्य

तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्ति कांतं वपुर्व्योमचरं प्रपेदे ॥५२॥ अथ प्रभा

वोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोर

स्थलतारहारः ॥५३॥ मतंगशापादवलेपमूलादवाप्तवानस्मि मतंगजत्वं अवेहि

रा.मं.
२३

1172

1173

गंधर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ५५ स चानुनीतः प्रणतेन पश्चान्मया मह
र्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ५६ इक्ष्वाकु
वंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनि
धिर्मां ५६ संमोचितः सत्त्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे
स्यात्स्वपदोपलब्धिः ५७ संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रं गांधर्वमादत्स्व यतः
प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ५८ अलं ह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि
त्वं तस्मादुपच्छंदयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ५९ तथेत्युपस्पृश्य पयः पवित्रं सो
मोद्भवायाः सरितो नृसोमः उदङ्मुखः सोऽस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ६०
एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिंत्यहेतु एको ययौ चैत्ररथप्रदेशान् सौराज्यर
म्यानपरो विदर्भान् ६१ तं तस्थिवांसं नगरोपकंठे तदागमारूढगुरुप्रहर्षः प्रत्युज्जगाम क्रथकैशि
केंद्रश्चंद्रं प्रवृद्धोर्मिरिवोर्मिमाली ६२ प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः मेने
यथा तत्र जनः समेतो वैदर्भमागंतुकमजं गृहेशं ६३ तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वार

1174

रघु०

२४

वदिर्विशितपूर्वां कुंभां रम्यां रघुप्रतिनिधिः स नवोपकार्यां वाल्यात्परामिव दशां मदनोऽध्युवास ॥६४॥
तत्र स्वयंवरसमाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः भावावबोधकलुषा दयितेव
रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ॥६५॥ तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्द
कृशांगरागं वैतालिकाललितबंधमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥६६॥ रात्रि
र्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता तामेकतस्तव बिभर्ति गुरुर्विनिद्र
स्तस्या भवानपरधुर्यपदावलंबी ॥६७॥ निद्रावशेन भवताप्यनवेक्षमाणा पर्युत्सुकत्वमबला
निशि खंडितेव लक्ष्मीर्विनोदयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः ॥६८॥
तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे प्रस्पंदमानपरुषेतरतारमंत
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मं ॥६९॥ वृंतच्छ्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररु
णांशुभिन्नैः स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥७०॥ ताम्रोद
रेषु पतितं तरुपल्लवेषु निर्धौतहारगुलिकाविशदं हिमांभः संलसते दशनार्चिरिव [illegible] तेष्विहुवि
वौष्ठलब्धं लब्धपरभागमिव स्मितं ते ॥७१॥ यावत्प्रतापनिधिराक्रमते न भानुरह्नाय तावदरु

रघु०

२४

णेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ७२
शय्यां जहत्युभयपक्षविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते येषां विभांति तरुणा
रुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दंतकोशाः ७३ दीर्घेष्वमी नियमिताः पटमंडपेषु नि
द्रां विहाय वनजाक्ष वनायुदेश्याः वक्त्रोष्मणा मलिनयंति पुरोगतानि लेह्यानि सैंधवशिला
शकलानि वाहाः ७४ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्
याः प्रदीपाः अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मंजुवाक्पंजरस्थः
७५ इति विरचितवाग्भिर्बंदिपुत्रैः कुमारः सपदि विगतनिद्रस्तल्पमुज्झांचकार मदपटुनि
नदद्भिर्बोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ७६ अथ विधिमवसाय्य शास्त्रदृष्टं
दिवसमुखोचितमंचिताक्षिपक्ष्मा कुशलविरचितानुकूलवेषः क्षितिपसमाजमगात्स्वयंवरस्थं ७७
मुखमर्द्धशरीरस्य सर्वं वा मुखमुच्यते तत्रापि नासिका श्रेष्ठा नासिकायाश्च लोचने ७८ इति श्री
रघुवंशे महाकाव्ये कालिदासकृतौ स्वयंवराभिगमनो नाम पंचमः सर्गः ५

सूत०
१०

प्रभु भ्रष्टप्रतिज्ञामालोक्य प्रसापंत स्मैप्रदत्तवान् १३ दारुणकठीनं
चास्य महादुःखमभिघासि एस्मिन्दीवसे राज्ञो धनमादापतस्करः १४
तेनैवगत्वा ततो चौरे पत्र साधुसमुस्थितो ततपश्चावका दुतानूहग भीते
नचेतस्वसा १५ धनसस्या तत्रैवसगत सीघ्रमलक्षतः ततो दुतासमा
याता पश्चासे सज्जनो वनिक् १६ हृष्ट्वानृपधनतत्रबध्वा दुतावाणिकस्तु
तो हर्षेणधावमानाश्च ऊचूर्नृपसमिपतः १७ तस्करौ द्वौ समानीतौ वि
लोक्याज्ञापयप्रभो तेज्ञप्तास्ततः सीघ्रं दृढबध्वातु मावुभौ १८ स्थापितौ
द्वौ महादुर्गे कारागारे विचारतः मायायातत्पदे वस्यनश्रुतं कैस्तुर्यो वच १९
भूतः तयोर्धनं डराज्ञा गृहित चंद्रकेतुना ततत्रापाच्च तयोर्गृहे भार्याचे

१०

श्रीराम १८

श्चदुत्तोसौकांचनंनगरंययौ तस्माद्देकंवणिक्पुत्रसमाद्दायागतो हि
तः ६७ दृष्ट्वातुसुंदरंलावणिकपुत्रंगुणान्वितं ज्ञातभिबधुभिसार्धंवे
रितुस्तेनचेतसा ६८ दत्तवान्साधुपुत्रायकन्यांविधिधानतः ततो
भाग्यवसेतेनविस्मृतंव्रतम ६९ विवाहसमयेप्यस्यतेनरुष्टाभ
वत्तप्रभु ततःकालेननियतोनिजकर्मविसारद ७० वाणिज्यार्थं
गतःसीघ्रंमाजात्रासहित्तोवाणिक् रत्नसारपुरेरम्येगत्वासिंधुसमिप
तः ७१ वाणिज्यांमकरोसाधुजामात्राश्रीमतासह तौगत्तोनगनेरे
रम्येयत्प्राचंद्रकेत्तोनृपसच ७२ एत्तस्मिन्नेवकालेतुसततनारायण

१६

1178

सत्य०
७९

मे संततिर्भवेत् ६० किंचितदिवसेतस्यभार्यालिलावतिसति मर्तिपुत्रा
नदचिंत्ताभगवद्धर्मपरायणा ६१ गर्भीणिसाबभवतस्यभार्य्यासत्य
प्रसादतः दशामासेगतेतस्यापुत्रीचैकाबभुवह ६२ दिनेदिनेवर्धते
साशुक्लपक्षेयथासशि नाम्नाकलावितिचैतितुनामकर्णकृतं ६३ त
तोलिलावतिप्राहस्वामिनमधुमधुरंवच नकरोसिकिमर्थंवापुरासंकल
त्पीतव्रतं ६४ विवाहसमयेय्यसाः करिष्यामिव्रतं प्रिपे. इतिभार्य्यास
मास्वास्यजगामननगरंप्रति ६५ मंत्रपिरत्वापित्वा दुतदुतप्रेषयामास
धर्मवित विवाहार्थेकन्यापावरंश्रेष्ठंविचारयन् ६६ तेनाज्ञप

श्रीराम
७९

१६

1179

तं वानिज्यार्थं एव धनेरनेकैः परिपूरितैः ५४ नावं संस्थाप्य तत्तीरे जगाम त
तटप्रति दृष्ट्वा व्रतं कर सम्यक प्रपृच्छ विनयान्वितः ५५ साधुरुवाच
किमिदं कुरुसे राजन भक्तियुक्तेन चेतसा प्रकाशं कुरु तत्सर्वं श्रोतुमिच्छा
मि सांप्रतं राजोवाच पूजनं क्रियते साधो विष्णोरतुलतेजसः व्रतं च
स्वजनैः सार्धं पुत्राद्यावाप्तिकाम्यया ५७ साधुरुवाच ततो नत्वा तु राजानं
साधुश्च मधुरं वचः सर्वं कथय मे राजन व्रतमेतं मे तत्करोम्यहं ५८ ममा
पि संततिर्नास्ति सततमे तत् प्रजायते ततो निवृत्य वाणिज्यात् सानंदो गृहमाग
त ५९ भार्यायै कथितं सर्वं व्रतं च संततिप्रदं तदा व्रतं करिष्यामि यदा

1180

करिष्यामिव्रतमनसिचिंतितं ३० इतिसंचिंत्यविप्रोसौरात्रौनिद्रानल
ब्धवान् ततःप्रातसमुत्थायसत्यनारायणव्रतम् ३१ करिष्येहंचसंक
ल्पभिक्षार्थंगमनंद्विजः तस्मिन्नेवदिनेविप्र प्रचुरंद्रव्यमाप्नुयात् ३२
तेनैवबंधुभिसार्धंसत्यस्यव्रतमाचरेत् सर्वदुःखविनिर्मुक्तसर्वसंपत्समान्वि
तः ३३ बभूवसद्विजःश्रेष्ठः व्रतस्यास्यप्रभावतः ततप्रवृत्तिकालंचमा
सिव्रतंचरेत् ३४ एवंनारायणंदेवंव्रतंकृत्वाद्विजोत्तम सर्वपापविनि
र्मुक्तोदुर्लभंमोक्षमाप्नुयात् ३५ व्रतमस्यतदाविप्रपृथिव्यांसकरिष्यति
तस्यवसर्वदुःखंचनराणांचविनश्यति ३६ एवंनारायणेनोक्तंनारदाय

१६

सत्य०
०७

महात्मने मयातत्कथितंतविप्राकिमन्यत्कथयामिते कश्यपउवाच ३७
इतिश्रीदभ्रपुराणेसत्यनारायणव्रतहरिविप्रसंवादेप्रथमोध्यायः तस्माद्विप्रात्
व्रतकेनपृथिव्यांचरितंमुने तत्सर्वंश्रोतुमिच्छामः श्रद्धास्माकंप्रजायते
३८ श्रीसूतउवाच शृणुध्वंमुनयःसर्वेव्रतंयेनकृतंभुवि एकदास
द्विजवरोयथाविभवविस्तरैः ३९ बंधुभिःस्वजनैःसार्धंव्रतंकर्तुंसमुद्यतः
एतस्मिन्नंतरेकालेकाष्ठक्रेतासमागतः ४० बहिःकाष्ठंचसंस्था
प्यविप्रस्यगृहमायया तृष्णयापरिपीडात्माविप्रंदृष्ट्वाकृतंव्रतं ४१ प्रणि
पत्यद्विजंप्राहकिमिदंक्रियतेत्वयाकृते किंफलमाप्नोतिविस्तराद्वदमेप्र

राम
०७

प्रभो ४२ विप्रउवाच सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदं तस्य प्रसादान्मे
सर्वं धनधान्यादिकमहत् ततस्तु तद्व्रतं ज्ञात्वा काष्ठक्रेतातिहर्षित प
पोजलंप्रसादं च भुक्त्वा तं नगरं ययौ ४४ सत्यनारायणं देवं चिंतयन स्थिर
मानसः काष्ठविक्रयतो ग्रामे प्राप्यते चाद्य यद्धनं ४५ तेनैव सत्यदेवस्य क
रिष्ये व्रतमुत्तमं इति संचिंत्य मनसा काष्ठं कृत्वा तु मस्तके ४६ जगा
म नगरे रम्ये धनिनां यत्र संस्थिति तद्दिने काष्ठमूल्यं च द्विगुणं प्राप्तवान
सौ ४७ ततः प्रसन्नहृदयः सुपक्वं कदलीफलं सर्करा घृत दुग्धं च गो
धूमस्य च चूर्णकं ४८ कृत्वैकत्र सपादं च गृहीत्वा स्वगृहं ययौ तत

1183

सत्य०
०८

तद्वृत्तस्य प्रसादेन धनपुत्रान्वितो
तावधुनृसमाहृय चकारव्रतमुत्तमं ४९ तद्वृत्तस्य प्रसादेन धनपुत्रान्वितो
भवत् इहलोके सुखं भुक्त्वा चांते सत्यपुरं ययौ ५० इति श्रीस्कंदपुराणे
सत्यनारायणव्रतं ब्राह्मणकाष्टकेत्रि संवादे नाम द्वितीयाध्याय ०२
श्रीसूत उवाच पुनरग्रे प्रवक्षामि श्रृणुध्वं मुनिसत्तमा तत्र चोल्कामुखो
नाम नृपश्चासीन्महामति ५१ जितेंद्रियः सत्यवादी ययौ देवालयप्रति
दिने धनं दत्वा द्विजान् संतोषयत्सुधी ५२ भार्या तस्य प्रमुग्धा च सरो
जवदना सति भद्रशीला सत्यव्रतासं धुतिरोत्तुसा ५३ एतस्मिन्
न्तरे तत्र साधुरेक समागता: लक्षपतिरिति ख्यातो भुवि लोकेषु विश्रु राम
०८

[illegible] १६

1185

२७	२८	२९	३०	३१	३२	३३	३४	३५	३६	३७	३८	३९
५	५	६	६	७	७	७	८	८	८	८	८	८
१५	२९	६	२१	३	१५	२५	५	१९	१५	१३	७	३
३८	२१	१५	२८	२५	१२	५६	१२	४२	५	१३	४१	३८
५४	२६	२०	४६	५३	४४	२८	१५	३६	३५	१४	५६	४४
५१	१	१	१	१	१	०	०	०	१	३	३	२
१६	२८	३३	३४	२८	१६	५६	३६	१९	४५	०	७	८
३७	१५	२३	२४	०	४७	४८	८ व	१० ×	४७	५१	१०	२६
८८	१०३	१०५	१०५	१०३	९९	८८	७४	६७	८	३७	५२	११
४१	१०	५०	४३	४२	१	२८	२६	२६	१२	३३ व	८ व	८ व
१	१	०	०	०	२	१	७	२	३	२	२	१२
१०	०	२२	१८	५२	५	३३	९	३७	५	३२	३८	५०
४		व	×						×	व	×	×

४०	४१	४२	४३	४४	४५	४६	४७	४८	४९	५०	५१	५२
८	८	८	८	९	९	१०	१०	१०	११	११	०	०
४	८	१७	२७	२	२१	४	१६	२८	१९	२१	[illegible]	६
१३	२८	३६	५१	२०	३४	१३	४८	२१	१२	४९	५५	४९
३५	५८	२३	३१	०	२८	१४	३८	४२	०	४०	१४	३६
०	०	०	१	१	१	१	१	१	१	[illegible]	०	०
४४	[illegible]	५१	१३	२७	३४	३५	३२	२३	८	[illegible]	०	८
४७ ×	२३ २४	४३	२८	४४	३५	३४	४०	५८	५०	४६ २६	३६ ×	९
२७	६३	३३	६१	९०	१०९	१०६	१०८	१०५	८८	८९	[illegible]	३८
५४ मा	१	६	४५	३५	३९	२३	२६	६	१८	२४	२४	३
०	५	४	२	०	०	०	१	२	३	४	८	११
४०	१८	३५	१२	११	४५	५६	४२	२	३५	६	५५	४२
व				व	×							

[illegible] ३।२७ ११।४७

[illegible] २।२० ११।४३

वक्र ११८ ११५२ [illegible] ३१५४

मार्ग २।२८ २१५

[illegible] ८।४० ११५५

[illegible] ११५४ २।२

१

बुधस्पष्ट

२३

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६
०	०	०	०	०	०	०	०	१	१	२	२	२	३	३	४	४	४	४	४	४	४	४	४	४	५
१६	२६	२७	२५	२०	२६	१८	२४	३	१४	२६	८	२२	५	१८	०	११	२०	२७	[illegible]	२६	२१	१८	२०	२६	५
१८	५२	१८	३८	२८	४०	८	११	२३	४६	३८	२८	३६	४४	३०	३८	३८	४४	१२	२८	३३	८	६	११	१०	५
१६	३३	५१	४३	२१	४८	३६	५८	५	४१	२	१२	३९	३४	४४	२	४७	२४	४९	३६ ३७	४४	२५	४४		४४	४०
०	०	२	३	३	२	०	०	०	१	१	१	१	१	१	१	१	०	०	२	३	३	१	०	४	१
१८	४०	३	२५	३३	१४	४७	१३	४१	१५	२८	३५	४०	३६	२८	१४	५०	१२	४७	११	४७	८	५१	३१	२४	०
५८	५२	२०	२६	६	३०	३२	१६	२२	१७	२४	४७	२३	५५	७	४५	३६	१७	२४	३०	४२	७	८	३८	११	१
ध	×					×	ध										ध	×					×		ध
७८	५३	९५	२५	३८	१	३८	६८	५८	१००	१०६	११०	११२	११२	१०७	१००	८०	७१	४२	२	४०	६२	० २८	७१	६८	८७
३४	३१	७	५७ व	१० व	४२ व	२४ मा	३४ मा	३३	१५	५८	४७	११	५३	१३	२१	८	११	३८	३० व	व	२ व	व	१३ मा	१०	४५
२८	२८	१२	८	७	१०	१०	१०	५	४	२	०	४	०	१	२	२५	१	१०	८	२८	८	११४	८	७	२५
१०	४२	५३	३६	४८	०	०	०	४८	४७	१४	५५	२२	२१	३८	४	२६	४७	३३	८		३२	७	३८	३	४८
×		×	ध	×	ध	ध						ध	×												

वक्र
०१३४
२१०

स्तं मार्गी
५१४८ ०१५४
२१४७
२१०

स्तंभ
५१५४
०११४५

स्तं
मार्ग
०११४६

वक्र वक्र
११२८ ११३६
०११४० ०११४६

केतु मार्गी
०१४१
०१३१ १२१०
११२५

प्रतिष्ठितं पूर्वं प्रधूमितो राज्ञां हृदये ऽग्निरिवोत्थितः ३ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः

नवाभ्युत्थानदर्शिन्यो ननंदुः सप्रजाः प्रजाः ४ छायामंडललक्ष्येण तमदृश्या किल स्व-

यं पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितं ५ परिकल्पितसान्निध्या काले काले च बंदि-

षु स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः

तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ७ सममेव समाक्रांतं द्वयं द्विरदगामिना ते-

न सिंहासनं पित्र्यमखिलं चारिमंडलम् ८ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं

पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ९ मंदोत्कंठाः कृतास्तेन गुणाधिकतया गुरोः

फलेन सहकारस्य पुष्पोद्गम इव प्रजाः १० स हि सर्वस्य लोकस्य युक्तदंडतया मनः आददे

नातिशीतोष्णो नभस्वानिव दक्षिणः ११ पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः नवे त-

स्मिन्महीपाले सर्वं नवमिवाभवत् १२ यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा तथैव सो-

ऽभूदन्वर्थो राजा प्रकृतिरंजनात् १३ कामं कर्णांतविश्रांते विशाले तस्य लोचने ॥०॥

मिमे सदोगतः सुखं लोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति लोकेश

तथा विधीयतां ६६ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ नृप

स्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ६७ तमभ्यनंदत्प्रथमं प्रबोधितः प्रजे

श्वरः शासनहारिणा हरेः परामृशन्हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकितं

६८ इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः समारुरुक्षुर्दिवमायु

षः क्षये ततान सोपाननपरंपरामिव ६९ अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपति

ककुदं दत्वा यूने सितातपवारणं मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितव

यसामिक्ष्वाकूणामिदं हि कुलव्रतं ७० इति श्री रघुवंशे महाकाव्ये कविकालिदा

सकृतौ रघुराज्याभिषेको नाम तृतीयः सर्गः ३ स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं

बभौ दिनांते निहितं तेजः सवित्रेव हुताशनः १ न्यस्तं रघुं दिलीपेन तं निशम्य व्यथा

पूर्वं राज्ञां समुद्दतन्मनः? रागेह दिग्ध्वमिवाग्निरिव मे २ दिलीपानंतरं राज्ये तं निशम्य

रघु

२५

रुत्प्रुताशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ६१
अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः शशाक निर्वापयितुं न वास
वः स्वतश्च्युतं वह्निमिवाद्भिरंबुदः ६२ ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवधी
रनादिनीं रघुः शशांकार्द्धमुखेन पत्रिणा शरासनज्यामलुनाद्बिडौजसः ६३ स चाप
मुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः महीध्रपक्षव्यपरोपणोचितं स्फु
रत्प्रभामंडलमस्त्रमाददे ६४ रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ६५ तथापि शस्त्रव्यवहार
निष्ठुरे विपक्षभावे चिरमस्य तस्थुषः तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्नि
धीयते असंगमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधं अवेहि मां प्रीतम
ऋते तुरंगमाद्वृणीष्व किं इच्छसीति स्फुटमाह वासवः ६७ ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युति
रंजितांगुलिं नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६८ अमोच्यमश्वं यदि मन्य
से प्रभो ततः समाप्ते विधिनैव कर्मणि अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यतां

२५

सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरं ५१ यदात्थ राजन्यकुमार तत्तथा यशस्तु र
क्ष्यं परतो यशोधनैः जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लंघयितुं ममोद्यतः ५२
हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः तथा विदुर्मां मुनयः शतक्र
तुं द्वितीयगामी न हि शब्द एष नः ५३ अतोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयाप
हारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ५४ ततः प्रहस्यापभयः
पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ५५
स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशेषशोभिना वपुः
प्रकर्षेण विडंबितेश्वरः ५६ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवांबुदानी
कमुहूर्तलांछने धनुष्यमोघं समधत्त सायकं ५७ दिलीपसूनोः स बृहद्भुजांतरं प्रविश्य भीमा
सुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५८ हरेः कु
मारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशांगुलौ भुजे शचीपत्रविशेषकांकिते स्वनामचि
ह्नं निचखान सायकं ५९ जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप
तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ६० तयोरुपांतस्थितसिद्धसैनिकं ग

रघु०

१४

वनेमयैवंविधिनेहतुरंगमीक्षसेयेन्वानिशम्येतिवचःसमीरितंमुदंपरामापदिलीप
नंदनः ४४ तदंगनिस्यंदजलेनलोचनेप्रमृज्यपुण्येनपुरस्कृतःसतां अतीन्द्रि
येष्वप्युपपन्नदर्शनोबभूवभावेषुदिलीपनंदनः ४५ सपूर्वतःपर्वतपक्षशात
नंददर्शदेवंनरदेवसंभवः पुनःपुनःसूतनिषिद्धचापलंहरंतमश्वंरथरश्मि
संयुतं ४६ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिंविदित्वाहरिभिश्चवाजिभिःअवो
चदेनंगगनस्पृशारघुःस्वरेणधीरेणनिवर्तयन्निव ४७ मखांशभाजांप्रथमोमनी
षिभिस्त्वमेवदेवेंद्रसदानिगद्यसे अजस्रदीक्षाप्रयतस्यमद्गुरोःक्रियाविघातायक
थंप्रवर्तसे त्रिलोकनाथेनसदामखद्विषःस्त्वयानियम्याननुदिव्यचक्षुषासचेत्स्व

१५

यंकर्मसुधर्मचारिणांत्वमंतरायोभवसिच्युतोविधिः ४८ तदंगमग्र्यंमघवन्म
हाक्रतोरमुंतुरंगंप्रतिमोक्तुमर्हसिपथःश्रुतेर्दर्शयितारईश्वरामलीमसामाद
दतेनपद्धतिं ४९ इतिप्रगल्भंरघुणासमीरितंवचोनिशम्याधिपतिर्दिवौकसामाविवर्तयामासमपं

तमोपहं दर्शनसूतात्वाश्वा वसुः ३६ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः
वपुप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३७ ततः प्रजानां चिरमात्मना
धृतां नितांतगुर्वीं लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवरा-
जशब्दभाक् ३८ नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशेन
गुणाभिलाषिणी नवावतारं कमलादिवोत्पलं ३९ विभावसुः सारथिनेव वायुना घनव्य-
पायेन गभस्तिमानिव बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ४० नियुज्य
तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्न-
मास सः ४१ ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः ४२ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत्
वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेथ नंदिनी ४३ तदंगनिष्यंदजलेन लोचने प्रमार्ज्य पुण्येन

1193

रघु°

१२

यदीयामवलंब्य चांगुलीं अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोर्भकः २८
तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलितलोचनो नृ
पश्चिरात्सुतस्पर्शरसज्ञतां ययौ २९ अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमंतम
न्वयम् स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः ३० स वृत्तचूडश्चलका
कपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्र
माविशत् ३१ अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियं अबंध्ययत्ना
श्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ३२ धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरिता
मिवेश्वरः ३३ त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केव
लं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोपि सः ३४ महोक्षतां वत्सतरः स्पृशन्निव द्वि
पेंद्रभावं कलभः श्रयन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३५
अथास्य गोदानविधेरनंतरं विवाहदीक्षां निरवर्तयद्गुरुः नरेंद्रकन्यास्तमवाप्य सत्पतिं

राम°

१३

भूवं चात्मनि २० स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनु
र्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ २१ सुखश्रवा मंगलतूर्यनिस्वनाः
प्रमोदनृत्तैः सह वारयोषितां न केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसामपि २२
न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ऋणाभिधानात्स्वयमेव केवलं
तदा पितॄणां मुमुचे स बंधनात् २३ श्रुतस्य यायादयमंतमर्भकस्तथा परेषां युधि चेति पार्थि
वः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवं २४ पितुः प्रयत्नात्स सम
ग्रसंपदः शुभैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्र
माः २५ उमावृषांकौ शरजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा नृपः सा च सुतेन मा
गधी ननंदतुस्तत्सदृशेन तत्समौ २६ रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयं वि
भक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत २७ उवाच धात्र्या प्रथमोदितं वचो ययौ

1195

सदृशीं व्यधत्त सः ॥ २२ ॥ दृष्ट्वा [illegible] अभूत् [illegible] शोयशमन [illegible] सनयोग हा गतः तपोपवासं

०र पु० जलि [illegible] सतां तनं रक्षास्य पुत्र [illegible] वांछया ॥ २३ ॥ कुमारसंभवात् कुशासैं [illegible] [illegible]

रयण गर्भ [illegible] [illegible] तितः पुत्र [illegible] यां ददर्शी का [illegible] मणि [illegible] ॥ २४ ॥ [illegible]

२२ ततः पंचमे [illegible] सम्यक् [illegible] भागप संपदं [illegible] तपुत्रं [illegible] मयो [illegible] सम [illegible]

॥ २५ ॥ [illegible] ततः पुत्रं [illegible] सुखापुदति [illegible] समर्थ [illegible]

[illegible] भुवो [illegible] लोकाभ्युदयाय तत्र ॥ २६ ॥ [illegible] शय्यां [illegible]

विसाक्षिरेणा [illegible] जन्म [illegible] तेजसा [illegible] दीपाः सहसा [illegible] बभुः सा

[illegible] तार ॥ २७ ॥ जनायं भवंतं च ततः पंसंशि [illegible] कुमारजन्मा [illegible] संमि [illegible] राम

[illegible] यमासी [illegible] ततः शास्त्रपुनं [illegible] ॥ २८ ॥ [illegible] २२

[illegible] ततः सुतानन [illegible] महोदयं पुर [illegible] ददर्श [illegible] तत्र गुरु ॥ पू० हर्षः पु०

श्री 1196

विधे मनो बबंधान्यरसान्विलंघ्य सा न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तु-
षु केषु मागधी इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ७ उपेत्य
सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं न हीष्टमस्य त्रिदिवेपि भूपतेरभू-
दनासाद्यमधिज्यधन्वनः ८ क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा र-
राज सा पुराणपत्रापगमादनंतरं लतेव संनद्धमनोज्ञपल्लवा ९ निधानगर्भामि-
व सागरांबरां शमीमिवाभ्यंतरलीनपावकां नदीमिवांतःसलिलां सरस्वतीं नृपः स-
सत्त्वां महिषीममन्यत १० दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयं तिर-
श्चकार भ्रमराभिलीनयोः सुजातयोः पंकजकोशयोः श्रियं ११ प्रियानुरागस्य मनःसमुन्नतेः
भुजार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः

२०४०

१२

...जो वह्निनिष्ठ्यूतमैशं नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोक
पालानुभावैः ७५ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ नंदिनीवरप्रदानो नाम
द्वितीयः सर्गः २ अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौर्हृदलक्षणं दधौ १ शरीरसादादसमग्रभू
षणा मुखेन सालक्ष्यत लोध्रपांडुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा श
शिनेव शर्वरी २ मुखेन सा केतकपत्रपांडुना कृशांगयष्टिः परिमेयभूषणा स्थि
ताल्पतारां करुणेन्दुमंडलां विभातकल्पां रजनीं व्यडंबयत् ३ ततो विशांपत्यु
रनन्यसंततेर्मनोरथं किंचिदिवोदयोन्मुखं पुनर्महोदार्दृसमस्यं दोहदं प्रियां
पूर्वदंपुकर्तिप्रियं वदन् ४ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ५
दिवं मरुत्वानिव भोक्ष्यते भुवं दिगंतविश्रांतरथो हि तत्सुतः अतोऽभिलाषे प्रथमं तथा

०रामः०

१२

राघ्रांसर्वाचापुनं रुक्मपैवं ६९ सर्नदीनीसन्यमानैर्दितान्मासह्वसलेभ्यत्सनिपीत
कोषं पंपोवसिष्ठेनंकृतानुसंगः अहं पशोमूर्त्तमिवासितिसः ६९ पुत्रं तर्पयथो रुक्मवृत्त
पारण्णोत्ते पुस्थानि वंसमप नं वपुजीतीरं पत्नीसांपुत्तिराजधानीपुस्थापपमास
नपीवसिष्ठः ७० पुत्रहित्त्मीकृत्तं हत्तं हताशंत्त लंसुलित्ताग्मकंधत्तीचधनुस
वत्सांचिन्त्यः पुत्रस्य सन्मंगलोद्यम तरपुभावः ७१ ओजाभिरामध्वनितारथे
नसधर्मपहीसहितसहिसुः पपापादनुघातसुखेनमार्गंख्वेनवत्तीन
माहि मनोरथेन ७२ त्तहीत्त्मकवमदर्शनपूजापुजार्थवृत्तकर्णितांगनितैः पवुस्त
पिंमवापुवर्षेनंबोदपंनापमिश्रैः कृतीनां ७३ पुरं दत्तकीः पुरभृत्यसंकंपु
त्रिपूर्वपक्षस्पनंघमानः भुजेभुजैश्चैसमानसीरभूयः सम मेधुरमासेअ
७४ दृष्टामुनंजलगास्तुनापंक्तेपंपत्ताबेअवगाह्यावेत्तंसत्त्वस्थितिरामजना
दिलाघ्यामादायराज्ञः क्रियत्तेषामिं ७५ जयं नयमंजनातिरमेश्रीसुरसप्रदिवसे

रघु
१०

मयोद्भाव्य परीक्षितोसि ऋषिप्रभावान्मयि नांतकोपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ६२
भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूति
मवेहि मां कामदुघां प्रसन्नां ६३ ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवी
रशब्दः वंशस्य कर्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे ६४ संतानकामाय तथे
ति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति त
मादिदेश ६५ वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ऊधस्यमि
च्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ६६ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञा
पिता प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ६७
तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै

१०

1199

1200

कथं नु शक्यो नुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ५४ भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ५५ किमप्यहिंस्यस्तव चेन्मतोहं यशःशरीरे भव मे दयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५६ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते तद्भूतनाथानुग नार्हसि त्वं संबंधिनो मे प्रणयं विहंतुं ५७ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ५८ तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ६० उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ६१ तं विस्मितं धेनुरुवाच साधो मायां

रघु

९

ग्युल्य सं हि त्वां वेदु हता तु ग्म छ नं विवा र युदं मुति भासि मिते ४७ मृता नु कंपा तवैव
दिवं गौरि कुभवे स्वस्ति मतीन्वं तं गीवन तु नेः प्रा स्यु दुव पूर्व म्यः पूजा कुसा नाय पिते
व पालि ४८ पूर्वे कथे नो र य रा ध कं डा कु ः त्वगा नु प्र मा हि मे वि वाक्यो स्य म तु भव
तां विमे तु गाः दे हि पूः स्वी प्त ता घे र घो ः ४९ ल दु हे के त्वा स्ता प ह क ह तां भि ता र मू र्जा स्त्व
ल मा त्व हे ह म ही सत्र्य शं न मा त्र भि म हूं हि राज्यं प द मे दु मा रु ः ५० ए त्ता व दु नु वि
र ते मे गे पु त्वि स्व नै ना स्मा गु स्ता गं न ना प्रा ल्ले सु यो पि दि ति पा ल्ल सुधैः प्री त्या तमेवा
र्थ म मा ष तैन पूर निशा म्य दवा तु च र स्य वा चं म नु ष्य दे वः पुन र पु वा चे घे न्वा त द स्या मि
त्व का त रा वा मा त्वाः सु त रां द वा त्तु ५२ द ता न्कि ल चा य त इ सु दु गः द न स्य श द्यां मु व ने सु
ङ्कः राज्ये न किं त द्वि प रि त वृ ते प्रा णै ः र प क्रो श म ली म सैर्वा ५३ से व्य स्य दे ह वर्ग नि क
व रा न्या य्या म पां मे वषि त्तु भ न्न ः न पा र णा स्या दि रु तां त वे वं भ चे दल प्र मु नि क्रियैः ५४

शि ५०

९

परमेश्वरेणोउपस्थितो भोगिनपाररणमेंसुरद्विषेऔदुमसोसुधेनु ३९ संवांनिवर्तसोवि
हायलज्जांगुरोर्भवान्दर्शितोशिष्यभक्तिः शास्त्रेसारतंपदेशवक्तादोनंतत्त्वशः शासुभक्तो
वियोगोत्ति ४० इतिपुजलंपुरुलाधिराजोमगाधिराजस्यवंशोनिशम्यपुत्स्यारलासोगि
रिप्रोपमावांदेतन्यवञ्जोशिथिलीचकार ४१ पुत्रसवृत्तीच्छेनमिगुपुयोगेनसूर्वसंजेविलघु
पुपत्त्वः जहीहन्तस्यकेवीदितेनेवजंमृत्युन्निर्ववरजुपालिः ४२ संरुद्वेवरत्नभजं
दुक्तामंहासंवपुंसायुद्वंविवदुः ग्धुतगंतेपुत्रलाभत्तोहिवेदसर्वंभवान्मावमनोमि
धासे ४३ मान्यःसमेव्यावरजोजमानांसर्गस्थितिप्रत्यवहारहेतुः गुरोरपीदंधनं
माहिताजनेशरसुरसाने ऽनुयेहरणीयं ४४ सत्वंमदीयेनशरीरवृत्तिंदेहेनंनि
र्वर्पितुंप्रसीदचिनावसानोलंकवालवसोविमुच्यतांधेनुरियंमहर्षेः ४५
अथोधकोरंगिरिगहुरयांकंपुःमहाशः कलानिकुर्वनभयः समन्तात्स्मर पार्श्व
वंतीकिंचिद्विहस्यार्थपतिंवभाषे ४६ हस्तालेपत्नंजगतःपुत्रतंनवंधपकोतगिदेवसु

व

रघुवं

८

सक्तांगुलिः सायकपुंखएवचित्रार्पितारंभइवावतस्थे ३१ बाहुप्रतिष्टंभविवृद्धमन्युरभ्य
र्णमागस्कृतमस्पृशद्भिः राजास्वतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः ३२ त
मार्यगृह्यंनिगृहीतधेनुर्मनुष्यवाचामनुवंशकेतुं विस्माययन्विस्मितमात्मवृत्तौ हेभूपा सिंह
लसिंहोन्निजगादसिंहः ३३ अलंमहीपालतवश्रमेणप्रयुक्तमप्यस्त्रमितोवृथास्या
न्नपादपोन्मूलनशक्तिरंहःशिलोच्चयेमूर्छतिमारुतस्य ३४ कैलासगौरंवृषमारु
रुक्षोःपादार्पणानुग्रहपूतपृष्ठं अवेहिमांकिंकरमष्टमूर्तेःकुंभोदरंनामनिकुंभमि
त्रं ३५ अमुंपुरःपश्यसिदेवदारुंपुत्रीकृतोयंवृषभध्वजेनयोहेमकुंभस्तननिःसृता
नांस्कंदस्यमातुःपयसांरसज्ञः ३६ कंडूयमानेनकटंकदाचिद्वन्यद्विपेनोन्म
थितात्वगस्यअथैनमद्रेस्तनयाशुशोचसेनान्यमालीढमिवासुरास्त्रैः ३७ त
दाप्रभृत्येववनद्विपानांत्रासार्थमस्मिन्नहमद्रिकुक्षौव्यापारितःशूलभृताविधाय रा म०
सिंहत्वमंकागतसत्ववृत्तिः ३८ तस्यालमेषाक्षुधितस्यतृप्त्यैप्रदिष्टकालो

८

नु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् २५ इत्थं व्रतं पालयतः प्रजार्थं समं महि

ष्या महनीयकीर्तेः सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य २५ अ

न्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गंगाप्रपातांतविरूढशष्पं

गौरीगुरोर्गह्वरमाविवेश २६ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन

अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष २७ तदीयमा

क्रंदितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादाय नगेंद्रसक्तां निवर्तया

मास नृपस्य दृष्टिं २८ स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श

अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९ ततो मृगेंद्रस्य

मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः जाताभिषंगो नृपतिर्निषंगादुद्धर्तु

मैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे

०रघु० ७

१७ स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासि
तशाद्वलानि श्यामायमानानि वनानि पश्यन् १८ आपीनभारोद्वहनप्रयत्नाद्गृष्टि
र्गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां १९
वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् पपौ निमेषालसपक्ष्म
पंक्तिरुपोषिताभ्यामिव लोचनाभ्यां १९ पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवध
र्मपत्न्या तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य पयस्वि
नीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसि
द्धेः २१ वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ भक्त्योपपन्नेषु हि त
द्विधानां प्रसादचिह्नानि पुरःफलानि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सा
न्ध्यं च विधिं दिलीपः दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां
२३ तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः क्रमेण सुप्तामनु

शि व० ७

1206

क्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ८ विसृष्टपार्श्वानुचरस्य
तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरा
वैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः प्र
सूनैराचारलाजैरिव पौरकन्याः १० धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणै
र्विशंकैः विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मारुत
पूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वन
देवताभिः १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांत
मनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना दवाग्निरासीद्वि
शेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने
१४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लव
रागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रतिथिक्रियार्थामन्व
ग्ययौ मध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना

रघु० ०५

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां वनायपीतप्रतिबद्धवत्सां यशोधने
धेनुमृषेर्मुमोच १ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया मार्गं मनुष्ये
श्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् २ निवर्त्य राजा दयितां दयालुस्तां सौ
रभेयीं सुरभिर्यशोभिः पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीं ३
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायिवर्गः न चान्यतस्तस्य शरी
ररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४ आस्वादवद्भिः कवलैस्तृणानां कं
डूयनैर्दंशनिवारणैश्च अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्प
रोभूत् ५ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ६ स न्यस्तचिह्नामपि
राजलक्ष्मीं तेजोविशेषानुमितां दधानः आसीदनाविष्कृतदानराजिरंतर्मदा
वस्थ इव द्विपेंद्रः ७ लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं

सनृपाधि वाङ्पीठ

१२०८

२

स्थितां तां यां स्यानं माचरेः नियमस्थां निषीदास्यां पीतां म/सिद्धिवेरपः ९० वधूर्भक्ति
मतीचैनामर्चितां मातयोर्वनात् पुयातां पुत्रान्तरन्वेतु सायं यं पुसुत्कुजेद वि॥९१॥ इत्याप्रस
दादस्यास्त्वं परिचर्यापरो भव ज्ञाविघ्नमस्तु ते भूयाः पितेव धुरं पुत्रियाणां ९२ तथेति
प्रतिजग्राह प्रीतिमान्सपरिग्रहः ज्ञादेशं देशकालज्ञः शिष्यः शासितुरानतः ९
ग्युपर्यं दुष्टिदोषज्ञः संवेशाय विशांपतिं सूनुः सूनृतवाक्स्रष्टुः विससर्जो
जितश्रियं ९३ सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः कल्पवित्कल्पयामा
सवन्यामस्यामस्य संविधां ९४ निर्दिष्टां कुलपतिना स पर्णशालामध्यास्य
प्रयतपरिग्रहद्वितीयः तच्छिष्याध्ययननिवेदितावसानां संविष्टः कु
शशयने निशां निनाय ९५ इति श्रीरघुवंशे महाकाव्ये श्रीकाल
कृतौ वसिष्ठाश्रमगमनो नाम प्रथमः सर्गः लिखितं शिवनंदीपालो

२५० ०५

विषेदीर्घसत्रस्य संचिरं नीप्रचेतसः भुजंगपिहितद्वारं पातालमधितिष्ठति ८० सन्त

मेकांतरं तस्य मद्रीयो वत्समातरं। आराधय सपत्नीकः सा वो कामं विधास्यति ८१ इति

वादिन एवास्य होतुराहुतिसाधनं अनिंद्यानंदिनी नाम धेनुराववृते वनात् ८२ लला

टोदयमाभुग्नं पल्लवस्निग्धपाटला। बिभ्रती श्वेतरोमांकं संध्येव शशिनं नवं ८३ ता

मुल्लालादजां राजी बिभ्रती साक्षिलेन तरां संध्याक्रांतिपदेनैव व्यक्तिमिन्ना हि कोष्णुना ८४

भुव कोष्णेन कुंडोध्नी मेध्येनावभृतादपि प्रस्रवेनाभिवर्षंती वत्सालोकप्रवर्ति

ना ८५ रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमंतिकात् तीर्थाभिषेकजां शुद्धिमाद

धाना महीक्षितेः ८६ तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञः तपोनिधिः याज्यमाशंसितावं

ध्यप्रार्थनं पुनरब्रवीत् ८७ अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः उपस्थिते

यं कल्याणी नाम्नि कीर्तिते नराव यत् ८८ वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गां

विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ८९ प्रस्थितायां प्रतिष्ठेथाः ९०००

५

याहीनं विधातर्मां कथं पश्यन्न दूयसे सिक्तं स्वयमिव स्नेहाद्वंध्यमाश्रमवृक्षकं ७१ असह्य
पीडं भगवन्नृणमंत्यमवेहि मे अरुंतुदमिवालानमनिर्वाणस्य दंतिनः ७२ तस्माद्यथा
विमुच्येहं संविधातुं तथार्हसि इक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः ७३ इति विज्ञा
पितो राज्ञा ध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ७४ सोपश्यत्प्र
णिधानेन संततेः स्तंभकारणं भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ७५ पुरा श
क्रमुपस्थाय तवोर्वीं प्रतियास्यतः आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ७६
इमां हृदि ऋतुस्नातां स्मरन्नासपदि स त्वं प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनः ७७
अवजानासि मां यस्माद् अतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ७८
स शापो न त्वया राजन्न च सारथिना श्रुतः नदत्याकाशगंगायाः स्रोतस्युद्दामदिग्गजे ७९
ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ८० ह

रघु

४

क्रियाशांतरथक्षोभपरिश्रमं पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८ ॥ अथाथर्व-
निधेस्तस्य विजितारिपुरः पुरः अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ ५९ ॥ उपपन्नं ननु शि-
वं सप्तस्वंगेषु यस्य मे दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदां ॥ ६० ॥ तव मंत्रकृतो मं-
त्रैर्दूरात्संशमितारिभिः प्रत्यादिश्यंत इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१ ॥ हविरावर्जितं
जीविन्यो निरातंका निरीतयः यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं ॥ ६३ ॥ पुरुषायुष
मानस्य गुरुणा ब्रह्मयोनिना सानुबंधाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥ होतस्त्वया
विधिवदग्निषु वृष्टिर्भवति सस्यानामवग्रहविशोषिणां ॥ ६२ ॥ त्वयैवं चिंत्यमानस्य किंतु व-
ध्वां तवैतस्यामदृष्टसदृशप्रजं न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥ मत्परं
दुर्लभं मत्वा नूनमावर्जितं मया पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥ नूनं मत्तः पर-
वंश्याः पिंडविच्छेददर्शिनः न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥ सो ऽहमिज्या-
विशुद्धात्मा प्रजालोपनिमीलितः प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥ ६८ ॥ लोकां-
तरसुखं पुण्यं तपोदानसमुद्भवं संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ ७० ॥ न

४

द्वाक्षमर्मरं नतं वाहनं: सावैयमिनं स्तमा मदृष्टेमरूषीस स्वनैः ४९ वनान्तरादुपावृत्तैः संस्थापङ्क
समित्कुशैः ज्युगिन्यस्तुदुजस्मात्प्रैतैः पूर्यमाणमदृश्याग्निप्रत्युद्यानैस्तपस्विभिः ५० सेकान्ते मुनिकन्याभिस्तत्
क्षणोज्झितवृक्षकं विश्वासाय विहङ्गानामालवालाम्बुपायिनां ५१ आतपात्ययसंक्षिप्तनी
वारासु निषादिभिः मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ५२ आकीर्णमृषिपत्नीना
मुटजद्वाररोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५३ अभ्युत्थिताग्निपि
शुनैरतिथीनाश्रमोन्मुखान् पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ५४ कुलकं
अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः तामवारोहयत्पत्नीं रथादवततार च ५५ तस्मै
सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ५६ विधेः सायं
तनस्यान्ते स ददर्श तपोनिधिं अन्वासीनमरुन्धत्या स्वाहयेव हविर्भुजं ५७ तयोर्जगृहतुः
पादान्राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ५८ तमातिथ्य

रघु ३

भिः शालनिर्जासुगंधिभिः पुष्परेणूत्करैर्वातैराधूतवनराजिभिः ३९ मनोभिरामाः शृण्वंतौ र
थनेमिस्वनोन्मुखैः षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः ४० परस्परा
क्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४१ श्रेणी
बंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिता
ननौ ४२ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्की
र्णैरस्पृष्टालकवेष्टनौ ४३ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः
प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४४ हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेयानि
पृच्छंतौ वन्यानां मार्गशाखिनां ४५ सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमो
दमुपजिघ्रंतौ स्वनिःश्वासानुकारिणं ४६ कुलकं काप्यभिख्या तयोरासीद्व्रजतोः शुद्ध
वेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७ तत्तद्भूमिपतिः पत्न्यै दर्शयन्
प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४८ स दुष्प्रापयशाः प्राप

३

बेलैव वप्रं दुर्गं वलयं यस्याः [illegible] नन्यशासनां [illegible]

कफलाशुकः॥२९॥ स वेलावप्रवलयां परिखीकृतसागरां अनन्यशासनामुर्वीं शशा
सैकपुरीमिव॥३०॥ तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासी
दध्वरस्येव दक्षिणा॥३१॥ कलत्रवंतमात्मानमवरोधे महत्यपि तया मेने मनस्वि
न्या लक्ष्म्या च वसुधाधिपः॥३२॥ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः विलं
बितफलैः कालं स निनाय मनोरथैः॥३३॥ संतानार्थाय विधये स्वभुजादवतारिता
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे॥३४॥ गंगा भगीरथेनेव पूर्वेषां पा
वनक्षमा॥ धृता संततिः तेन न्यस्ता मंत्रिषु केपालाः॥३५॥ अथाभ्यर्च्य विधातारं प्रयतौ पु
त्रकाम्यया तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमं॥३६॥ स्निग्धगंभीरनिर्घोष
मेकं स्यंदनमास्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥३७॥ माभूदाश्रमपीडे
ति परिमेयपुरस्सरौ अनुभावविशेषात्तु सेनापरिगताविव॥३८॥ सेव्यमानौ सुखस्प

[illegible marginal notes]

स्य गुहाकारं इंगितस्य च । फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगोपात्मानमत्र
स्तौ भेजे धर्ममनातुरः । अगृध्नुराददे सोर्थमसक्तः सुखमन्वभूत् २१ ज्ञाने मौ
नं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव २२ अ
नाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरस्तासां केवलं जन्महेतवः २४
स्थित्यै दंडयतो दंड्यान्परिणेतुः प्रसूतये । अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः २५
दुदोह गां स यज्ञाय सस्याय मघवा दिवं । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं २६
न किलानुययुस्तस्य राजानो रक्षितुर्यशः । व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता
ता २७ द्वेष्योपि संमतः शिष्टस्तस्यार्तस्य यथौषधं । त्याज्यो दुष्टः प्रियोप्यासीदंगुलीवोरगक्ष
ता २८ तं वेधा विदधे नूनं महाभूतसमाधिना । तथा हि सर्वे तस्यासन्परार्थै

वैवस्वतो मनुर्नाम माननीयो मनीषिणां आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव ११
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः दिलीप इति राजेंदुरिंदुः क्षीरनिधाविव १२ व्यूढो-
रस्को वृषस्कंधः शालप्रांशुर्महाभुजः आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः
१३ सर्वातिरिक्तसारेण सर्वतेजोभिभाविना स्थितः सर्वोन्नतेनोर्वीं क्रांत्वा मेरु-
रिवात्मना १४ आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारंभ आरंभ-
सदृशोदयः १५ भीमकांतैर्नृपगुणैः स बभूवोपजीविनां अधृष्य-
श्चाभिगम्यश्च यादोरत्नैरिवार्णवः १६ रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः प-
च्छेदेनेत्यस्यावच्छेदकतासंबंधेन तदभावाधिकरणीभूत देशस्यावच्छेद्यतासंबंधेनाभाववत्त्वेनेत्यर्थः तथा
चतादृशिरूपावादिविशेषाभाववत्त्वमुपाधिरित्याह तच्चिंत्यं चिंताबीजं तु तादृशदेशस्यावच्छेद्यतासंबंधेनाभावो
नाव्याप्यवृत्तिर्मानाभावात् ततो तादृशिरूपादिविशेषाभावरूपोपाध्यप्रसिद्धिरिदमपि ध्येयं पत्वेकावच्छेदेने
त्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाह तन्न व्याप्यवृत्तिरूपादीनां विशेषाभावस्याव
च्छेदकाप्रसिध्या तदनवच्छेदकस्याप्यसंभवेन तत्रैव साध्याव्यापकत्वतादवस्थ्यादिति भावः पत्तद्वयं विना
कृतमनुगतानुमानमाशंक्य निषेधति एतेनेति वक्ष्यमाणदोषेणेत्यर्थः व्यर्थेति संयोगसामान्याभावस्यत्व
न्मते केवलान्वयितया तत्साध्यतायाम भाववत्त्वादित्यस्यैव सम्यक्त्वादिति भावः अप्यात्त्वभाववत्त्वादिक
मेव हेतुरत आह अप्रयोजकत्वादिति अनुकूलतर्करहितत्वादित्यर्थः ननु निरुपाधित्वमेव प्रयोजकम
त आह निर्गुणत्वादिति आदिना द्रव्यभिन्नत्वादेरुपग्रहः अत्रयपि निर्गुणत्वोपाधेर्न त्वाभावेन साध्या
भावोन्नापकतया दोषत्वं संयोगस्यैव साध्याभावतया वृत्तौ तस्येवृत्त्वात् नापि व्यभिचारोन्नापकतयात त
एवं तथापि स्वव्याप्यत्वे न साध्यस्य पदवृत्तित्वाभावोन्नापकतया दूषकत्वं बोध्यम संयोगसामान्याभावो
न वृत्तवृत्तिर्निर्गुणत्वादिव्याप्यत्वादित्यनुमानेनापि वृत्तेः संयोगसामान्याभावानित्यनुमितेः प्रतिरोधादि

अवच्छेदकतासंबं
धस्य वृत्त्यनिया
मकत्वात् २

दो

1406

तिध्येयम् ननु योग्यधर्मस्यानवच्छेदकः स न तदभावानवच्छेदक इति व्याप्येव्यवस्थितत्वादेः संयोगसामान्याभावावच्छेदक
त्वं सेत्स्यतीत्याशंक्य निराचष्टे न चेति तथा च व्यभिचारो नेति भावः ननु द्रव्यत्वं संयोगसामान्याभावाव
च्छेदकं संयोगसामान्यानवच्छेदकत्वादिति चेत्तथापि व्याप्यतावच्छेदकीभूतप्रमेयत्वसत्त्वादेः पर्याप्तत्वादतः त्वह व्या
प्ति स्थिमाह यथा चेति आतिदेशिमीति लिंगत्वे धीति परेणान्वयः ननु व्यवहितपूर्ववृत्तितायावच्छेदकं नदं
त्वमतिप्रसंगात् किं त्वव्यवहितपूर्ववृत्तित्वमित्याशंक्याह तन्न धर्मताभिन्नेत्यतः संयोगस्य स्वत्वेनानुरूपं दृष्टान्तमा
ह वन्हीति न तु सामान्यापाति यत्र पूर्ववृत्तित्वसामान्यस्य वान्हिसामानाधिकरण्यसामान्यस्य वेत्यर्थः केचित्तु क
त्वीन व्याभाव्यप्रयोजकत्वमन्यथा तदभावानवच्छेदकत्वे हेतुना न तदवच्छेदकत्वमेव कुतो न स्यादित्यादेः साध्य
ते द्रव्यत्वात्यवच्छेदेन न संयोगव्यक्तीनामसत्वेपि संयोगसामान्यस्य सत्त्वादित्यभिप्रायकोपं ग्रंथ इत्याहुः उत्प
त्त्येति सामान्याभाव इति परेणान्वयः नन्वाद्यक्षणेवच्छेदे गुणो नास्तीति प्रत्यक्षं महासंभविसंतानिकघटाद्यभावात् प्र
थम क्षणे घटादौ गुणो नास्तीत्यादिव्यवहारादेकं चैतदित्यसामान्याभाव एव कथं न तस्यानंतरमाह प्रलयाद्यवच्छेदेनेति तदानीं न
न्यभावत्वसत्वे प्रलय एव व्याहन्येतेति भावः ननु न तत्र प्रलये सामान्याभावात्तदवच्छेदेनापि युक्तमत आह तथेति ननूक्तप्रती
तिः पर्वतन्यहति हुताशनानवच्छेदकत्वाभावं रसीधरे रसीधरावच्छिन्नपर्वतवृत्तित्वाभावं वा हुताशनेऽवगाहते न तु

त

प

1407

पर्वतएव हुताशनाभाववानित्यादिबुद्ध्यात्तदाप्याह वृत्तेरिति वृत्तेः संबंधस्य वृत्तिमतः संबंधवतः तथा चयोपदवच्छे
देनयदीयत्वसंबंधाभाववान्सत्तदवच्छेदेन तस्य तत्संबंधावच्छिन्नाभाववानिति व्याख्यायां पीशीरवरावच्छेदेनसंयोगसं
बंधावच्छिन्नवह्न्यभावसिद्धिरिति भावः ननूक्तव्याप्तावप्रयोजकत्वमन्यथापि तुल्यन्यायेन योपदीयपत्संबन्धवान्सत
त्संबन्धेन तत्वानिति व्याख्यायामपि कुंडादिसंयोगिनो वदरादेः संयोगेन कुंडादिमत्वापत्तेरित्युक्तावाह एवमिति भेदो विशेषः
यथा घटवत्यपि काले इदानींतनो न घट इति प्रतीत्या तत्तदवच्छेदेनैतत्कालेयो घटाभावस्तथा घटवत्यपि कपाले घटनाश
दशायामिदानीमिह कपालेन घट इत्यनुभवादेतत्कालावच्छेदेन कपाले घटस्य [illegible] सामान्याभावः
सिद्ध्यति न चेदानींतनतंतुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छिन्नतंतुष्वेव घटाभावो विषयो न तु तंतुत्वावच्छेदेनैतत्काले
तथेति वाच्यम् तंतुषु घटाभावस्याव्याप्यवृत्तितयैतत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातात्
न च तथाप्येतत्कालवृत्तिघटस्याभाव एव तंतुषु भासतां तत्रेति वाच्यम् कालस्य प्रतियोगिकुक्षावग्रहेपि तादृशप्र
तीतेस्तंतुत्वावच्छेदेन समये घटाभावावगाहित्वस्यानुभविकत्वादिति भावः तथा चेति गुणवत्संयोगवद्धा

1408

द्रव्यत्वाद्यवच्छिन्नाभावस्य मात्समवायेऽपरत्वाभेतत्कालत्वात्कपालं घटवद्रूपध्वंसादित्यादावव्याप्तिवारणायेत्यर्थः तादिति अ
समानाधिकरणं तदलाभमित्यर्थः नोपादेयमिति येन रूपेण येन संबंधेन व्याप्यवृत्तितेन रूपेण तेन संबंधेन तस्य सा
ध्यतायां नोपादेयमित्यर्थः तेन द्रव्ये संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां कालिकतयाऽव्या
प्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां च न प्रतियोग्यधिकरणमिति परं तु समवायेनाव्याप्यवृत्तेरपि द्रव्य
त्वोऽऽस्मत्वादेः कालिकेन साध्यतायां तदुपादेयमेव अव्याप्यवृत्तिसाध्यके संयोगाभाववान्गुणत्वादित्यादौ
घटादिदेवनदेयं व्याप्यवृत्तिसाध्यके तु प्रयोजनविरहात्सर्वत्रैव नदेयमित्यावेदयितुं सर्वथैवेत्युक्तं साध्यभेदेने
तिसाध्यताघटकसंबंधादेरप्युपलक्षणम् यद्यपि व्याप्यवृत्तिसाध्यकस्थले तदप्रवेशे सत्ताजातेरित्यादाव
व्याप्तिस्थापनवातिप्रदादौ समवायेन सत्ताभावस्यापि कालिकादिसंबंधेन वृत्तेः न चाभावे हेत्वधिकरण
वृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोष तथापि सत्यापि द्रव्यत्वशून्यसत्त्वादित्यत्रातिव्याप्तेर्द्रव्य
त्वरूपसाध्याभावस्याविशेषणतावृत्तित्वविरहादुक्तभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्य
त्वानतिरिक्तत्वात् न चाभावत्वप्रतीतेः प्रमात्वस्तोपर्यमिभावस्यातिरिक्ततयोक्तातिव्याप्तिवारणमिति वाच्यम्

व

अभावत्वं वेत्याद्यग्रिमग्रंथेन भावाभावसाधारणस्याभावत्वस्यानिर्वचनाद्विरोधापत्तेः घटत्वाद्यभावस्य कालिकादिसं
बंधावच्छिन्नाभावेत्यस्वरूपादिसंबंधेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुक्ताच्च विशेषणं तदा गगनानिष्ठस्य
घटत्वाभावस्यैव तादृशघटत्वाभावाभावाभाववत्त्वकल्पनात्तावतैवाभाववत्त्वप्रतीतेः प्रमात्वसंभवात् अतएव सा
ध्यताघटकसंबंधेन साध्यवत्त्वबुद्धेर्विषयविधया प्रतिबंधकतावच्छेदको यः संबंधस्तेन संबंधेन हेतुसमानाधि
करणस्य अभावस्य अप्रसिद्धिरित्युक्तावपि न निस्तारः तथाविधसंबंधेन हेतुसमानाधिकरणप्रसिद्ध्या प्रागुक्तगगनत्वा
दिहेतौ द्रव्यत्वाभाववज्जातित्वादिसाध्यदोषाव्याप्तेः तथापि साध्यतावच्छेदकसंबंधेन प्रतियोगिमत्त्वबुद्धेर्विषय
तयाप्रतिबंधकतावच्छेदको यस्संबंधस्तेन संबंधेन हेत्वधिकरणवृत्तित्वमभावस्यादिवाहितामित्यदोषः तथाव
द्रव्यत्वाभाववज्जातित्वादित्यादौ विशेषणताविशेषणजातित्वाभाववत्त्वबुद्धेर्विषयविधया प्रतिबंधकताव
च्छेदको यः स्वरूपसंबंधस्तेन जातित्वरूपाभावस्याप्रसिद्धेरितिभावः वस्तुतु व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसंबंधेन
पत्त्वाधिकरणान्तद्वृत्त्यभावस्य तादृशसंबंधावच्छिन्नप्रतियोगित्वाभावरूपं ग्रंथकृतोऽभिप्रेतं तादृशसाध्यकं च गगु
समवायादिनाऽऽत्मत्वादेस्साध्यत्वे ज्ञानवत्त्वादिकं समवायेनाऽऽत्मत्ववृत्ति समवायावच्छिन्नात्मत्वाभावस्य

यत्किंचित्प्रतियोगि
ताश्रय २

यद्यपि रूपवति निर्वह्नेतु नाशो न वह्निर्वा इत्यादिप्रतीत्या वह्निसामान्याभावोपि केवलपर्वते महानसीयव
ह्निरूपप्रतियोगिव्यधिकरणो भवति तथापि एकधर्मावच्छिन्नप्रतियोगिता एकव्यक्तिउपहिता प्रतियोगिवृत्तियोरव
च्छेदकभेदकभावः वह्न्यभावप्राप्ति

केनापि संबंधेनावृत्तेस्तथा च तादृशसाध्यकत्वं नोपादेयं सत्ता वा जातेरित्यादौ गुणत्वरूपादेयमेव समवायेन सत्त्ववति स्पंदादौ
समवायावच्छिन्नसत्ताया भावस्यापि कालिकादिसंबंधेन वर्त्तमानतया सत्त्वादेर्निरुक्तव्याप्यवृत्तित्वाभावात् व्याप्यवृ
त्तिताघटकस्य त्वापि कारणात् ...नित्वस्य संबंधसामान्येन प्रविष्टत्वादेः तत्त्वाभावार्थमेव स र्वथैव व्याप्यवृत्तीत्युक्तं त
त्स्वसंबंधविशेषानियंत्रितत्वात् व्यभिचारादेस्तु संबंधेन वृत्तिनियामकत्वेनात्मत्वादेरपि व्याप्यवृत्तित्वहानिरिति ध्येयं
सर्वथैव व्याप्यवृत्तिसाध्यकप्रतियोगिवैयधिकरण्याघटितव्याप्तिविशिष्टहेतुमत्तानिश्चयोत्तरानुमितौ नोपादेयं
प्रतियोग्यसमानाधिकरणत्वं तज्जनकतावच्छेदककोटौ नोपादेयं साध्यसाधनभेदेन कार्यकारणभेदेन व्या
प्तेः कारणतावच्छेदकव्याप्तेः भेदाच्छिन्नत्वादित्यपि वदन्ति एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां
भेदेपि ऐक्यमिति नव्यमतेन वह्निमान्धूमादित्यादौ वह्न्यादिसामान्याभावमादाय व्याप्त्यसंभवादतिव्याप्तिवारणप्र
योजनमाह तेनेति नव्यविशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यकप्रतियोगित्वे व्यधिकरणप्रवेशादिदमयुक्तमिति वा
च्यम् जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशायामपि विशिष्टसत्त्वधर्मिकजातिमत्त्वनिष्ठप्रतियोगिव्यधिकरणाभावाप्रति
योगित्वज्ञानाद्विशिष्टसत्त्वसाध्यकानुमित्यापत्तिप्रसंगस्यैव प्रकृतेति प्रसंगपदार्थत्वाद्विशिष्टसत्त्वस्याप्युक्तरीत्या

१४११

अत्र व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य व्याप्यवृत्तिसाध्यके सत्ता वा जातेरित्यादौ वत्तिव्याप्तिवारणाय प्रतियोगिव्य
धिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यसमानाधिकरण्यं तदभावप्रतियोगितााव
च्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरेवं च उभयपरिष्कारेणापि विशिष्टस
त्ता वा जातेरित्यत्र नातिव्याप्तिरतो भ. न त्वेति

व्याप्यवृत्तित्वविरहाच्च विशिष्टस्यातिरिक्तत्वमतेन नातिव्याप्त्यसंभवादाह भ. न त्वेति प्रांचस्तु विशिष्टसत्वस्य व्याप्यवृ
त्तितया तत्साध्यके प्रतियोगिवैय्यधिकरण्याप्रवेशाद्भूतत्वेत्यादिसाध्यांतरं तत्र च भ. तत्वमात्मान्यत्वे सति विशेषगु
णवत्वं म. तत्त्वमवच्छिन्नपरिमाणवत्वं तदुभयं वा व्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेनैतदुभयाभावसत्वादि
त्याहुः न चेति वाच्यमित्यन्वयि तदभावः भ. तत्वम. तत्वोभयाभावः सहजनतः इति प्रतियोगितावच्छेदकावच्छिन्न
त्वाप्रवेशेपीत्यर्थः नन्वभयत्वस्याविशिष्टत्वातिरिक्तत्वेपि सहजनतः प्रतियोगिव्यधिकरणस्याविशिष्टत्वावच्छिन्नाभाव
स्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टत्वावच्छिन्नाभावस्योभयत्वावच्छिन्नाभावानतिरेकाद
त आह न चेति तदवच्छिन्नाभावः उभयत्वावच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् लिं
गव्यत्ययेनानातिरिक्तमित्यनुषज्यते तथा चातिरिक्त एवेति भावः न चान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वे
पि प्रकृते भ. तत्वाविशिष्टम. तत्वाभावस्यैव तदुभयत्वावच्छिन्नप्रतियोगिताकत्वं समनियताभावयोरैक्यमेवेनैकत्वा
दिति वाच्यम् तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य भ. तत्व

मूर्तत्वोभयत्वेऽनवयायादति व्याप्तितादवस्थ्यादिति भावः उभयत्वस्येति प्रत्यक्षासिद्धत्वादित्ति परेणान्वयः तथा चाविरुद्ध
योरिव समानाधिकरणयोरप्युभयत्वमतिरिक्तमेव विरुद्धाविरुद्धस्थलीयोभयत्वप्रतीत्योः समानाकारत्वात् मूर्तत्वमू
र्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वस्य प्रत्ययाच्चेति भावः नवेति वाच्यमिति परेणान्वितम् तत्र मूर्तत्वमूर्त्तत्वो
भयवानित्यत्र व्याप्तिरेवेति तथा च तत्र तत्र तथा न कारणप्रयासोऽनुचित इति भावः तथात्वेपीति उभयत्वाश्रयस्य
मूर्तत्वसमनियतत्वेपीत्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नव
त्तात्पर्य एव व्याप्तिरतो न तत्र तत्रामिति भावः वृत्तिमत्वे व्याप्यभावस्य व्यभिचारनियतत्वात् व्यभिचारं ग्राहयति ने नै
ति अत एव मूर्तत्वाश्रयमनादौ ननु वह्न्यादिभेदमादाय व्याप्तिः प्रतियोग्यसमानाधिकरणपदेनैव वारणाद
त्यंतपदं व्यर्थमत आह अत्यंतपदं चेति अत्यंताभावत्वानिरूपकं यत्प्रतियोगित्वं तदाश्रयवैय्यधिकरणपदवि
वक्षायाः फलमाह अन्यथेति तद्भेदस्य तत्समानाधिकरणात्यंताभावांतरभेदस्य स्वस्वरूपातिरिक्ततयेत्यस्य न
अनवस्थाभयेनेत्यादेः दुर्लभत्वापत्तेरिति हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगिपदभा
वांतरं तत्समानाधिकरणत्वादिति भावः अग्रेविवक्षणीयस्य साध्यतावच्छेदकसंबंधेन प्रतियोग्यसामाना राम १

धिकरणपस्य वह्निमान् धूमादित्यादौ घटाद्यभावे सत्त्वान्न सर्वत्राप्रसिद्धिः किंतु स्वरूपसंबंधेन साध्यतायामेवेति सूच
यितुमप्रसिद्धिमपहाय दुर्लभत्वमुक्तं अत्यंताभावत्वानिरूपकप्रतियोगितानवच्छेदकत्वविवक्षायाः फलमाह
सर्वेषामिति भावभेदस्यातिरिक्तत्वास्वीकारादाह अभावसाध्यकेति तथा च घटभिन्नं पटत्वादित्यादौ पटत्वसमानाधि
करणनिरुक्तप्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदाभिन्नत्वात्तादृशभेदस्य च गोत्वाभावरूपं तत्प्रतियोगि
तावच्छेदकमेवमेदत्वाभिलप्य व्याप्तिरिति भावः संप्रदायरत्पस्वरसस्तु बीजं तदुक्तविवक्षायामपि सर्वेषां हेतुसमानाधि
करणात्यंताभावानामत्यंताभावत्वानिरूपकेण पूर्वक्षणादिवृत्तित्वविशिष्टत्वाभावात्मकेन प्रतियोगिनासं
मं समानाधिकरणाद्भावसाध्यकाव्याप्तितादवस्थ्यात्तादृशप्रतियोगिताविशिष्टस्यानधिकरणं हेत्वधिकरणं
तादृशप्रतियोगितानवच्छेदकत्वप्रवेशे तु व्यर्थमेवात्यंतपदमिति ध्येयम् गोध्वंसवत्त्वेनेति गवात्यंताभावस्य
गोध्वंसाविरोधित्वादित्याशयः नच दैशिकविशेषणतया यत्र गोध्वंसस्याधिकरणं तत्रैव गवात्यंताभावस्याविरोधात्
कालिकसंबंधेन गोध्वंसवत्यपि प्रलये तदत्यंताभावसत्त्वे बाधकाभावान्नातिव्याप्तिरिति वाच्यम् प्राचां मते
भूतलादिदेशस्येव कालस्यापि दैशिकविशेषणतया ध्वंसवत्त्वात् अत एव त्वक्संयुक्तकाले दैशिकवि

त्वा

यदि तत्त्वात्तस्यैवाव्याप्तिर्व्याप्तिर्दोषः न च कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य ७

1414

नित्ये वर्तमानत्व

शेषणात्तया वायुनाशाधीन वायुस्पर्शनाशस्य सादीत्याकारः शब्दानित्यतापामिष्ठेरुक्तः यद्यप्येवमपि नातिव्याप्ति
संभवः कालिकसंबंधावच्छिन्न [illegible] गवात्यंताभावस्यैव प्रलये कालिकसंबंधेन वर्तमानत्वात् ध्वंसादिमति दैशिक
संबंधेनैवात्यंताभावस्यानभ्युपगमात् तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्यवृत्तिसाध्यकस्यलीय
लक्षणस्या [illegible] व दूर्यं दैशिकविशेषणतयाऽभावे हेतुसामानाधिकरण्यं दैशिकसंबंधेन हेतुमान्निष्ठात्यंताभाव
कालस्याप्रतियोगित्यात्तथापि नातिव्याप्तिरिति वाच्यम् ह [illegible] इति तत्त्वादिविशिष्टगोत्वाभावस्यैवतादृशस्याप्रसिद्धत्वा
दितिभावः एमित्यमततांनिराचष्टे माह संसर्गाभावेति अत्यंताभावपदेनेत्यादिः तथा च प्रलये गोत्वावच्छिन्न
ध्वंससत्त्वादेव नातिव्याप्तिरिति भावः न च गोध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वं स्वीकारेऽपि साध्यता
वच्छेदकसंबंधीभूतकालिकाविशेषणतावच्छिन्नप्रतियोगिताकत्वाविरहात्कुतस्तमादायातिव्याप्तिर्यु
दासइति वाच्यम् साध्यतावच्छेदकसंबंधाव्यसंबंधानवच्छिन्नस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्व
स्य लक्षणे प्रवेशनीयत्वात्तस्य च ध्वंसप्रतियोगितायां आरण्यादितिभावः यदा ध्वंस [illegible]
[illegible] इति ध्वंसवादे तिर्खंड प्रलये संगीतरीय व्यापक

रा॰
१९

तथा च प्रथमतः परमाणुक्रिया ततो घ्यणुकावयवविभागस्तदुत्तरं पूर्वदेशसंयोगनाशस्तदुत्तरं प्रसरेणदात्मककार्यरूपे उत्तरदेशसंयोगस्तत्रैव घ्यणुकना
शस्तदुत्तरं अवयवनाशाधीनस्य स्पर्शेणोनाशः स्पंदनाशश्च तदुत्तरमुत्तरदेशसंयोगनाशस्स एव महाप्रलयः १

1415

त्वावच्छिन्नध्वंसाविरहादतिव्याप्तिः ननु महाप्रलयस्य वृत्तितया तत्र घ्यणुकत्वावच्छिन्नध्वंससत्वान्नातिव्याप्तिस्तदानी
मपि चरमघ्यणुकनाशानुगुणस्य परमाणुस्पंदस्य सत्वात् तत्कालोत्पन्नपरमाण्वन्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चा
त्तस्य विनाशयत्वात् तादृशपरमाण्वन्तरसंयोगस्य कार्य्यद्रव्येण सह द्वित्वस्वीकारात् नित्यत्वमाश्रयनाशादेव तन्नाशसंभ
वादित्यत आह यदादृष्टमिति केचित्तु त्वन्मते घ्यणुकस्याभावात्स्पंदस्य चरवेद्प्रलये वृत्तौ बलवत्तरप्रमाण
भावाद्यदादृष्टमित्याद्युक्तमित्याहुस्तच्चिंत्यम् नित्यज्ञानमादाय सद्धेतुत्ववारणाय न त्यामिति नित्यसुखाभिव्य
क्तेर्नित्यत्वमते सद्धेतुत्वमाशंक्य साध्यांतरमाह दुःखं वेति ननु कार्य्यमात्रं प्रति अदृष्टस्य हेतुत्वात् प्रलये प्राक्क्षणेपि
तस्य सत्वं तथा च तदानीमेव दुःखत्वावच्छिन्नध्वंससत्वान्नातिव्याप्तिः दुःखादेः स्वसामानाधिकारनाश्यतया तदानीमसंभवा
दुत्तरक्षणे सामानाधिकरण्यासंभवाद् वादविदितेप्रमाणाभावाच्च किं च यावद्वस्त्वीनां युगपत्प्रलयानभ्युपगमे ब्रह्मांडांतरवर्तिदुः
खमादाय सद्धेतुरेवायमत आह यदा तदीति अत्र तदीयसुखाद्यादिसमवेतदीत्तानाविरहाद्व्यभिचारः स्फुट एव
ध्वंसादिप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वेभावाभावः गोर्नष्ट इत्यादिप्रतीते गोप्रतियोगिकध्वंसाद्यवगा
हितया व्युपपत्तेर्बाधानिश्चयादिप्रतिबंधकत्वाद्यनुरोधेनैवभेदात्यंताभावयोर्गोत्वावच्छिन्नप्रतियोगिताक

घ्यणुकत्वादेरिति खंडप्रलये केषांचिद्ध्वंसस्य केषांचित्प्रागभावस्य सत्वेन घ्यणुकत्वस्य प्रतियोगितारिक्त वृत्तित्वेनानवच्छेदकत्वात् इत्यर्थः ननु घ्यणु
कत्वावच्छिन्नानधिकरणवृत्तित्वविशिष्टस्यैव तद्ध्वंसस्य प्रतियोगितावच्छेदकं घ्यणुकत्वमेवेहान्यूनवृत्तित्वामित्यत आह नहीति ॥

गा॰सि॰

तद्गोमद्भूतलमित्याकारक तद्गोत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालि बुद्धिं प्रति तद्गोत्वावच्छिन्नप्रतियोगित्वसंबंधाव
च्छिन्न तद्गोत्वावच्छिन्नप्रकारतानिरूपितअभावत्वावच्छिन्नविशेष्यतावच्छिन्न अभावत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रकारतानिरूपित
भूतलत्वावच्छिन्नविशेष्यताशालिज्ञानं प्रतिबंधकम् २

१२॰ 1416

त्वोपगमात् न चैवं तद्गोत्वावच्छिन्नवत्ताबुद्धिं प्रति तद्गोत्वावच्छिन्नाभाववत्तानिश्चयत्वेनाविरोधितया तद्गो
वात्यंताभावस्यैव तद्गोध्वंसस्यापि तद्गोत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमिति वाच्यम् एकसंबंधे
न तद्गोवात्यंताभावस्य ग्रहे धर्मिसंबंधांतरेण तद्गोत्वावच्छिन्नवत्ताबुद्धेर्दुर्वारत्वात् संबंधविशेषमंतर्भाव्यैवात्यं
ताभाव ग्रहस्य प्रतिबंधकतया ध्वंसवत्ताग्रहस्याधारतया संबंधाद्भूतत्वस्याभावत्वाघटितत्वेन तदवगा
हिबुद्धेरत्यंताभावसाधारण्याप्रयोगात्ध्वंसत्वाप्रवेशेनाह मतेऽपीति ननु प्रतियोगिमत्त्वेऽप्यसिद्धं तत्राप्यत्यं
ताभावानुपगमात् तत्राह अन्यस्येति तस्येति गोत्वादेर्गगनात्यंताभावस्येत्यर्थः तेन गगनाद्यभा

स

वत्वे गोविशिष्टगोत्वाद्यभावस्य वा प्रलयपदत्तिलोपि न क्षतिः कालमात्रेति अत्रगवात्यंताभावस्य दै
शिकविशेषणतया कालमात्रावृत्तित्वं प्राचीनैरुच्यते एवं सदा तु न तत्र व्यवहारस्य कालिकविशेषणत
यैव संभवादिति तु विभावनीयम् ननु प्रतियोगिविशिष्टेऽपि काले तदत्यंताभावसत्त्वे गवाद्यवच्छेदेने
दानीं गोत्वं नास्तीत्यपि प्रतीतिः कथं न स्यादत आह इयांस्तीति एकस्य प्रतियोगिमतः कालस्य देश
भेदः प्रतियोग्यनाधारदेशः तस्यात्वम् अत्यंताभावत्वम् अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः

राम॰

१२

स्वरूपावच्छिन्नमिति निरवच्छिन्नामित्यर्थः तथात्वमिति पूर्वेणान्वयः नन्वेवमिदानीमश्वेन गोत्वमित्यादिप्रती
तेः कालस्य वृत्तितया ऽश्ववृत्तितया च गोत्वाभावावगाहित्वेऽप्युपपत्तौ देशस्य कालवृत्तितावच्छेदकत्वे माना
भाव इत्यत आह देशस्येति इत्यर्थः सादृश्यं तच्चानुभूयमानत्वं तथा चानुभव एव देशस्य कालवृत्तितावच्छे
दकत्वे मानम् अन्यथा गृहे नेदानीं गौरिति प्रत्ययबलाद् गृहादिदेशस्य गवात्यन्ताभाववत्तायामपि कालेना
वच्छेदकः स्यात् तत्रापि गवाभावे गृहवृत्तित्वेन कालवृत्तित्वोभयावगाहिता मास्तु वचनं त्वादिति भावः नन्वे
वमपि प्रतियोगिवैयधिकरण्यघटितस्याव्याप्यवृत्तिसाधकस्य लक्षणस्य गोमान्गोत्वादित्यादाव
तिव्याप्तिरेव गवाद्यभावस्य ... कालेप्रतियोगिसमानाधिकरणतया लक्षणघटकत्वादाह तद्रूपस्येति
गवादिरूपस्येत्यर्थः तथा च यादृशविशिष्टत्वाधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्यपदग्रेवाव्यंतस्य गवा
द्यभावेऽपि सत्वान्नातिव्याप्तिरिति भावः न चेति वाच्यमित्यन्वयः संसर्गाभावविशेष इति सदातनसंसर्गाभा
व इत्यर्थः संसर्गेति स्वप्रतियोगितावच्छेदकसंसर्गेण यः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयो भावस्तत्व
मित्यर्थः संसर्गस्तु तादात्म्यभिन्नो ग्राह्यस्तेन भेदव्युदासः प्रागभावध्वंसयोरप्युत्तरकालपूर्वकालावेव प्र

तानिष्यान्यथामिव्यात्नित्यकत्वे सति ह्याव्यवहितशकृत्कालावच्छेदेन वर्तमानात्यन्ताभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरण्यं तत्त्वं तत्पदेन दंडादेर्ग्रहणम् ३

स्वजन्यध्वंसप्रतियोगिकपालघटसंबंधेन न हि दंडस्याभावः ६

1418

तियोगितावच्छेदकसंबंधाद्वेति ताभ्यामेव संबंधाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षे हेतुः तत्तयोर्नि
व्याप्तिरिति प्राचामाशयः घटितमिति तथा च चक्रकादिप्रसंग इति भावः तच्च मन्यान्तरेणानियमांतरस्य साध्यसंबंधि
तावच्छेदकरूपत्वादिस्वरूपस्येत्यर्थः इति केचित् वस्तुतो नियमान्तरस्य संसर्गत्वघटितनियमस्य संसर्गत्वविशि
ष्टधीजनकत्वं नियमघटितमिति क्रमेण संसर्गत्वमप्यत्र विशेषणीति भावः नन्वभावबुद्धौ प्रतियोग्यारोपस्य हे
तुत्वे मान्याभावादुक्तसंसर्गाभावत्वघटितव्याप्तेर्न लक्षणासंभवः कथं चेदभावलौकिकप्रत्यक्षं प्रत्यारोपस्य
हेतुतास्वीकारे प्रतीन्द्रियसाध्यके व्यभिचारित्वापत्तिश्च प्रमितिस्त्वहेतुसमानाधिकरणसाध्याभावस्यातींद्रिय
त्वान्निरुक्तसंसर्गाभावत्वविरहादत आह वक्ष्यते चेति भेदाभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्ववि
शिष्टं चतदेवान्योन्याभावत्वं भेदत्वं तु संसर्गाविधया तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिता
विशेषो वेत्याशयः यत्तु भेदत्वादिवत्संसर्गाभावत्वमप्यखंडोपाधिरिति तन्तुच्छम भेदत्वादिवदखंडस्य संस
र्गाभावत्वस्यानुभवेनाविषयीकरणात् त्रिकाव्यवहारस्य भेदाभिन्नाभावत्वादिनाप्युपपत्तेः वस्तुगति
मनुरुध्याह अनुपदामिति विवेचयिष्यत इति तदपि मिश्रोपादेयमित्यादिग्रंथे नातिशयः साध्यतावच्छेदक

मनस्त्ववद्गुणत्वात् स्यादौ ६

संबंधेन प्रतियोगिवैयधिकरण्यघटितलक्षणमभिप्रेत्याह प्रयोजनाविरहादिति धूमादिसमानाधिकरणस्य व
ह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेव तमादाय अव्याप्तिविरहादिति भावः व्याप्यवृत्तिसाध्यकस्थलीय
लक्षणस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितत्वात् तदभिप्रेत्याह अव्याप्तिश्चेति तादात्म्येन ग
वादेः साध्यतायां तत्संबंधावच्छिन्नात्यंताभावाप्रसिध्या साध्याभाववत्त्वादावव्याप्तिरित्यर्थः इदमप्यभाववृत्तिर
भावोनाधिकरणत्वरूपो न वा धर्म्यत्यंताभाव एव धर्मिणो भेद इति मतेन अन्यथा पटादिभेदरूपस्य घट
भेदत्वात्यंताभावस्य घटत्वात्यंताभावस्य वा घटनिष्ठप्रतियोगिताया एव तादात्म्यसंबंधावच्छिन्नत्वाद
व्याप्तिविरहादिति ध्येयम् नन्वविषयतायाः स्वानियामकत्वमते ज्ञानाभावस्य गगनादौ सहजत एव प्रति
योगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषगुणेति अत्र व्यभिचाररूपकः कालो दिक् च तत्र च
काले कालिकसंबंधेन दीशि च देशिकसंबंधेन विशेषगुणस्य सत्त्वात् तदभावो न प्रतियोगिव्यधिकर
ण इति भवत्यतिव्याप्तिः विशेषपदं व्यभिचारित्वरतापि इत्यत्वादित्युक्तौ संबंधसामान्येन विशेषगुण
स्य गगनस्य सत्त्वान्नातिव्याप्तिसंभवः कालोपाधित्ववाद्दिगुपाधित्वस्यापि गगनस्य सत्त्वाद व्यावर्तकत्वात्
महाप्रलये दिग्देशव्यवहाराजनकत्वात्

1420.

अन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोन्येति यत्तु मूर्तमात्रस्यादिगुपाधित्वं महादिग्वृत्तितायामवच्छे
दकत्वं न त्वधिकरणत्वमिति प्राचां मते संबंधसामान्येनैव तत्स्यादिशेषगुणानाधिकरणत्वान्मनोन्यपदमि
ति तन्मन्दम् एवमप्यवच्छेदकतासंबंधेनैव मनसोविशेषगुणवत्तायास्संभवेन मनोन्यपदवैयर्थ्यापत्तेः
ननु स्वमते दिक्कालयोरीश्वरात् नातिरिक्तत्वादग्निव्याप्तिरेवेत्यत आह ज्ञानीति न च ज्ञानेऽव्याप्यवृत्ति
तया तत्साध्यकेप्रतिवैयधिकरण्यप्रवेशादेव नातिव्याप्तिरिति वाच्यम् समवायेनाव्यापकत्वग्रह
दशायामपि संबंधसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वसत्त्वात् समवायेन ज्ञानानुमि
त्यापत्तेरेवमकृतेऽतिव्याप्तिप्रदर्शितत्वाज्ज्ञानत्वादेरपि अगुरुत्वव्याप्यवृत्तित्वविरहाच्च अतिव्याप्तिप्रयोज
याति साध्यकत्वेति विशेषणतादिकं तात्कालिकी च एकार्थेति समवायस्यापि स्वात्मकत्वसंब
न्धसंबंध इति तन्नापि ज्ञानत्वे कार्यसमवायोक्तौ तन्न्यायः भावत्वात्समवेतत्वादिसाध्यकेचित् प्रतियोगि
नोति नव्यास्तु नानाभावत्वस्य तादृशोनसमवायसंबंधेन घटादौ प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः
न च तादृशयात्किंचित्संबंधेन प्रतियोगितासामानाधिकरण्याप्रसिद्धौ कालिकादिसामानाधिकरण्याभावस्यापि

धूमवत्पर्वतावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वाद्वह्निमान् धूमादित्यादावव्या
प्तिः स्वप्रतियोगितावच्छेदकसंबंधसामान्येन तथात्वोक्तौ च जातिमान् जातित्वादित्यादावतिव्याप्तिः
समवायेन जात्यभावस्यैव तादात्म्येन जातिमद्भेदत्वात्तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन
यज्जातिसंबंधितद्व्यक्तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् स्वप्रतियोगित्वं यादृशसं
बंधावच्छिन्नं तादृशसंबंधेन यत्प्रतियोगिसंबंधितद्व्यक्तित्वाभावस्योक्तत्वात् संयोगसामान्यावच्छि
न्नवन्ह्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यत्वात् तथा वन्ह्यभावस्य पर्वता
दौ महानसीयसंयोगसंबंधेन प्रतियोगिसामानाधिकरण्यविरहेणाव्याप्त्यभावादित्याक्षेपम् ननु
समवायावच्छिन्नवन्ह्यभावमादाय धूमादावव्याप्तिवारणार्थमग्रे साध्यतावच्छेदकसंबंधावच्छि
न्नप्रतियोगित्वं निवेशनीयं तथा च कपिसंयोगवत्तत्तादात्म्येन साध्यतायामेतद्वृत्तत्वादावव्या
प्तिर्भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन प्रतियोग्यधिकरणाप्रसिद्धेरत आह
संबंधिवेति न च तादात्म्येन वस्तुमात्रस्यैवाव्याप्यवृत्तित्वात्तादृशसंबंधेन साध्यतायां प्रतियो

गिवैयधिकरण्याप्रवेशादिदमयुक्तमितीवाच्यम् मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृत्त्यादौ त्वयमंगीका
रात्तादात्म्येन कपिसंयोगवतोऽप्यव्याप्यवृत्तित्वात् न चैवं प्रतियोग्यनधिकरणहेत्वनुमान्निष्ठाभावेत्यागीम
निष्कर्षेऽप्यप्रतीकारः प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधिनस्तन्न घटितत्वावच्छिन्नभे
दकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तन्त्रत्वात् वृत्तित्वस्य तादात्म्यसंबंधेनापि न कस्यचित्त्वागु
क्तव्याप्यवृत्तित्वमतो यथाश्रुतं न मे वृत्तमत्यत्र केचित्तु प्रतियोग्यनधिकरणहेत्वनुमान्निष्ठाभावप्र
तियोगितायां यत्किंचिद्धर्मावच्छिन्नत्वपर्यवसन्नावच्छिन्नत्वोभयाभाव इत्यादिवक्ष्यमाणनिष्कर्षस्य तादा
त्म्येन साध्यतायां व्याप्तिचारित्वनिव्याप्तिरतः प्रतियोग्यनधिकरणत्वं परित्यज्य प्रतियोग्यसंबंधित्वं चावश्यं तत्रानिवेश्यमि
त्याशयेन संबंधित्वमुक्तमित्याहुः ननु कपिसंयोगाभावस्यापि गुणादौ प्रतियोग्यसमानाधिकरणत्वात्कपिसंयो
ग्यतत्त्वादित्यादाववव्याप्तिरत आह तद्विशिष्टस्येति प्रतियोगिसामानाधिकरण्याभावविशिष्टस्येत्यर्थः तथा च हे
तुमति वृत्त्यादौ संयोगवद्वृत्तित्वाभावविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः विशिष्टनिरूपिताधेयत्वमप्यतिरिक्त
मित्याशयेनेदमुपपादितं विशिष्टस्य तस्य हेत्वधिकरणेऽभावः तत्र च वक्ष्यमाणाधिकरणत्वं तेन प्रतियोगिसा

1423

मानाधिकरण्याभावविशिष्टस्याधिकरणं यद्धेत्वधिकरणं तद्वृत्तित्वमभावे वाच्यमित्यर्थः अत्र यद्यपि प्रतियोग्यसमाना
धिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभावस्य प्रतियोगितानवच्छेद
कत्वं वाच्यम् तावतैव संयोग्येतत्त्वादित्यादौ नाव्याप्तिसंभावना वृत्तस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरण
त्वाभावात् तथापि कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इत्यस्ति मम लाघवरसेन हेतुसमानाधिकरणाभावस्यै
वाविशेषणं प्रतियोग्यसमानाधिकरणत्वदलमनेन तावान्प्रयास इत्यवधेयम् ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमाना

भिन्न

धिकरणत्वोक्तौ च प्रागुक्ताव्याप्तिवारणासंभवे नाविशिष्टस्येत्यादिकं विफलमत आह तद्वृत्तीति प्रतियोगिमद्वृत्तिभिन्न
त्वमित्यर्थः अत्रेति अस्वरसादित्यन्वयः न तदभाववत्त्वमिति तथा च संयोगी सत्त्वादित्यादावव्याप्तिरिति भावः ननु सं
योगाभावे गुणेन संयोगसामानाधिकरण्यमिति प्रतीतिबलादेव गुणावच्छेदेन संयोगाभावे प्रतियोगिसामानाधिकरण्या
भावसत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतिस्तु संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यावच्छेदकत्वा

स्या

भावमेव गुणादौ संयोगानधिकरणाभिन्नगुणवृत्तित्वमेव वा संयोगाभावादाववगाहत इति भावः वद्यपीति मूलकारः
तच्च तदपि हेत्वधिकरण इति तेन कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणाद्यवच्छि

न्नत्वेपिकपिसंयोगेतत्त्वादित्यादौनाव्याप्तिरितिभावः नन्वु हेत्वधिकरणेप्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वंप्र
तियोगिसामानाधिकरण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तच्चव्याप्यवृत्तेरवच्छेदकत्वाविरहादप्रसिद्धं गुरु
तरंचेत्यतआह प्रतियोग्यनधिकरणेत्यादि वस्त्वादिति अनधिकरणमितिपरेणान्वयः नतुघन्यंतरेति प्रति
योगिव्यधिकरण्यंतरेत्यर्थः ध्वमतेसंयोगसामान्याभावस्यकेवलान्वयित्वात्तत्साध्यकं सत्त्वादिकं सद्धेतुरेवेत्यतस्साध्यां
तरमाह द्रव्यत्वाभावेति यद्यपिद्रव्यत्वाभावस्याव्याप्यवृत्तित्वात्तत्साध्यकेप्रतियोगिवैयधिकरण्याप्रवेशाद्
इमसंगतं नचात्रकालिकसंबंधावच्छिन्नद्रव्यत्वाभावस्साध्यस्सचगुणादावच्छेदेनकालएवाव्याप्यवृत्तिरिति
वाच्यम् तथासतितस्यकेवलान्वयित्वात्तत्साध्यकसत्त्वादेस्सद्धेतुत्वेनतत्रातिव्याप्तिरूपन्यासस्यानौचित्या
त्तथापिसत्त्वहेतौद्रव्यत्वाभावस्यव्यभिचारधीदशायामपिप्रतियोगिसामान्यानधिकरणसत्त्ववान्निष्ठाभावप्र
तियोगितानवच्छेदकंद्रव्यत्वाभावत्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तिरेवातिव्याप्तिशब्दार्थः व
स्तुतोद्रव्यत्वाभावस्यापिनप्रागुक्तव्याप्यवृत्तित्वमितिध्येयम् प्रथमसाध्येऽतिव्याप्तिंग्राहयति साध्याभाव
वत्त्वरति तत्प्रतियोगीति तस्यसंयोगात्मकसाध्याभावस्य यः प्रतियोगीसंयोगविशेषाभावस्तद्वत्त्वमित्यर्थः॥

प्रतियोगिव्यधिकरण
त्वंताभावप्रतियोगि
त्वकेवलान्वयित्व४

1425

द्वितीयेऽतिव्याप्तिं योजयति नित्यत्वादीति नित्यत्वादिविशिष्टं यद् द्रव्यत्वं तदभावात्मको यः साध्याभावस्य प्रतियोगी त
दधिकरणत्वात्साध्याभाववतोऽव्याप्त्येति पूर्वेणान्वयः ननु विशिष्टद्रव्यत्वाभावो न द्रव्यत्वत्वरूपस्य साध्याभा
वस्य प्रतियोगी किं तु विशिष्टद्रव्यत्वस्यैवेति द्रव्यत्वं प्रतियोगिव्यधिकरणमेवेत्यत आह त्वाभावेति त्वं नित्य
त्वविशिष्टद्रव्यत्वम् न चानित्यत्वविशिष्टद्रव्यत्वाभावस्याभावो नानित्यत्वविशिष्टद्रव्यत्वत्वरूपो विशिष्टस्यान
तिरिक्ततया जन्यद्रव्ये [illegible] ऽपि नित्यवृत्तित्वविशिष्टद्रव्यत्वाभावो नास्तीति प्रत्ययप्रसंगात्किं तु नित्यैकत्वादिकमेवे
ति नातिव्याप्तिरिति वाच्यम् विशिष्टाधिकरणतायाः प्रतीतिनियामकतया वातिप्रसंगभंगे द्रव्यत्वमपेक्ष्य नित्यानंत
संख्यापरिमाणादौ नाधिक्याभावत्व [illegible] कल्पनायां गौरवात्त्वाभावाभावस्यैव प्रतियोगित्वमिति सिद्धांतप्रवादाच्च
नन्वेवमपि नित्यवृत्त्यभावस्यैव त्वाश्रयतत्तद्व्यक्तिवृत्तित्वविशिष्टं यत्त्वं तदभावात्मकत्वप्रतियोगिना सह स

१ मानाधिकरण्यात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यैव नातिव्याप्तिरेकव्यक्तिमात्रवृत्तीनां गुणत्वाद्यात्मकाभा
वानामपि पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य यो भावस्तादृशप्रतियोगिना सार्द्धं सामानाधिकरण्यात् न चैवं रूपमा
णत्वं दशः प्रसिद्ध्या गगनाद्यभाव एव प्रतियोगिव्यधिकरणस्तस्यापि नित्यवृत्तित्वादिविशिष्टे यो गगनाभावस्त

स्वपदेन घटवृत्तित्वविशिष्टघटाभावः घटे घटो नास्तीति प्रतीतिसाक्षिकः तस्य योऽभावः स पर्वते नैव तेन तस्य योऽभावः स प्रथमाभावरूपः
एवं च विशिष्टशून्यताप्रसिद्धिरतोऽतिव्याप्तेन घटवृत्तित्वविशिष्टघटाभावः शुद्धघटाभाव एवैक एव तत्प्राचीनैस्तेन घटकी
नो घटाभावो यस्य घटवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिसमानाधिकरण एव एवमन्यत्रापि ४

जा॰सि

१७

दभावात्मकेन स्वप्रतियोगिना समं समानाधिकरणत्वाद्गगनाभावस्यैव संयोगादिसंबंधेनाभावत्वावच्छिन्नाभावतयाखंड
शः प्रसिद्धापितस्य प्रतियोगिव्यधिकरणत्वासंभवाच्च एतेन नित्यत्वादिविशिष्टगगनाद्यभावस्य यो भावस्तदभावत्वं न गग
नाद्यभावस्य तस्य केवलान्वयित्वापत्तेरन्योन्यपि नित्यत्वादिविशिष्टस्य गगनाद्यभावस्याभावो नास्तीति प्रत्ययप्रसंगात्किं
तु नित्यत्वादेरेव तथात्वमित्युक्तावपि न निस्तार इति चेदत्र नव्याः यथाकृते प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभाव
स्याप्रसिध्या वह्निमान्धूमादित्यादौ सर्वथासंभवः स्यादतः यत्किंचित्प्रतियोगित्वं यादृशसंबंधावच्छिन्नं तादृशसंबं
धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणं यत्साधनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणं तत्र निवेशनीयम् तथा च संदेहस्तु स्यलक्षण द्रव्यत्वाभाववान्सत्त्वा
दित्यत्रापि संयोगेन घटाभावः प्रतियोगिव्यधिकरणस्तदीयं हि घटनिष्ठप्रतियोगित्वं यादृशेन संयोगसंबंधेनावच्छि
न्नं तादृशेन संयोगसंबंधेन साधनवतो द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणत्व
मत्तत्तमेव न चैवमपि तदीयसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगित्वस्याप्रसिध्यानदोषसंग
तिः पूर्वं तत्र गगनत्वादिविशिष्टस्य घटाद्यभावस्याभावत्वेन तत्वासिद्धेरिति प्राहुः स्वावच्छेदकसंबंधावच्छिन्न

स्वप्रतियोगिता १

राम

१७

1427

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छि
न्नत्व यद्धर्मावच्छिन्नत्वोभयाभाववत्त्वमित्यलंक्षणाभिप्रायेणेदं संयोगेन घटाद्यभावस्यैव प्रतियोगिवैयधिकरण्यसौलभ्या
दित्यपि वदंति प्राचां मते संयोगसामान्याभावसाध्यकगुणात्मत्वहेतुर्दिह्नोऽतः कपिसंयोगसामान्याभावउक्तः वृक्षादावुत्पत्ति
कालावच्छेदेन गुणसामान्याभाववत्त्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगप्र
व
तियोगित्वसमवेतसामान्याभावस्य द्रव्यमात्र समवेताभावस्यचानधिकरणत्वात् वृक्षत्वादेरपि हेतुतायामव्याप्तिस्स
म्भवत्येव तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभाववत्त्वं लाघवान्न कपिसंयोगाद्यात्मकसम
वेतमात्रस्य तथात्वं गोरवादित्याशयः गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणानामित्युक्तं तत्प्रतियो
गितेति कपिसंयोगिप्रतियोगितावच्छेदकेत्यर्थः न च गुणसामान्याभावस्याभावो द्रव्यत्वमेव लाघवान्न तु गुणगौ
रवाद तत्संयोगप्रतियोगि त्वं न गुणसामान्याभावस्येति वाच्यम् घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैव सत्त्वेन द्र
व्यत्वस्य तदभाववत्त्वासंभवाद भावाभावस्य प्रतियोगित्वनियमाच्चेति भावः यादृशेति तथा च गुणसामान्याभाव
निष्ठप्रतियोगितावच्छेदकं यद्गुणसामान्याभावत्वं हेतुमतस्तदवच्छिन्नानधिकरणत्वेपि कपिसंयोगाभाववत्त्वस्य

तादृशप्रतियोगितानवच्छेदकत्वात् तादृशेण साध्यतायामात्माव हेतौ नाव्याप्तिः ईदृशत्वाभाववान्सत्वादित्यादौ तु
इदृशत्वाभावत्वावच्छिन्नाननधिकरणं च हेतुः करणं तादृशाभावस्य तादृशप्रतियोगितावच्छेदकमेव इदृशत्वा
भाववत्वमतो नातिव्याप्तिरिति भावः। न च वान्हिमान्सत्वदेतत्वादित्यादौ तत्र वान्हिसंयोगसंबंधेन साध्यतायामव्या
प्तिः तत्संबंधावच्छिन्नघटाद्यभावप्रतियोगिनसोनसंबंधेन प्रतियोग्यधिकरणप्रसिद्धेरिति तिवाच्यं यत्प्रतियो
गितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितसमवाय संबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधि
करणतासामान्याभाववत्वं हेतुमत्तत्वेन संबंधेन तादृशप्रतियोगितावच्छेदकत्वस्याविवक्षितत्वात् घटत्वावच्छि
न्नाधिकरणतासामान्यस्यैव तत्र वान्हिनिरूपितसंयोगसंबंधावच्छिन्नाधिकरणतानिरूपितस्वरूपसंबं
धेनाभावस्य हेतुमतिसत्वेन तादृशसंबंधेन घटाभावस्यैव प्रतियोगिव्यधिकरणत्वात् तादृशाभाववत्वं
चानिरवच्छिन्नाधिकरणतासंबंधावच्छिन्नः कोपि संयोगाधिकरणत्वाभावस्य परस्तत्रापि नाव्याप्तिः
अत्र च प्रतियोगितावच्छेदकधर्मेणावच्छिन्नत्वं साध्यतावच्छेदकता घटकसंबंधेन ग्राह्यम् तेना
पः पिंडस्यापि कालिकसंबंधेन यद्धूमत्वादिशिष्टधूमत्वादिनस्य संयोगेनाधिकरणत्वेपि धूमवा

न्वह्नेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकताघटकसंबंधेन तद्वदवच्छिन्नत्वनिवेशे तु प्रतियोगितानवच्छे
दकमित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यम् अन्यथा विषयतासंबंधेन रूपत्वाव
च्छिन्नस्य पृथिव्यादौ समवायेनाभाववत्सत्त्वाद्रूपवान् पृथिवीत्वादित्यादावव्याप्तिप्रसंगात् वस्तुतस्साध्यता
वच्छेदकताघटकसंबंधावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपितस्वरूपसंबंधेनैव निरुक्तप्रतियोगिताव
च्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे विवक्षणीयः तेन वह्निमान् धूमादित्यादौ यत्र वह्नित्वादिनिरूपितसम
वायादिसंबंधेन वह्नित्वादेस्साध्यतावच्छेदकत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोगिव्यधिकरणहेतुम
न्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्ध्यापि न क्षतिरिति ध्येयम् अत्र तादृशप्रतियोगितावच्छेदक
धर्मे तादृशप्रतियोगिताश्रयाधिकरणीभूतयावद्व्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणताव
च्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तत्तद्व्यक्तिभेदकूटवत्त्वमेव तादृशप्रतियोगितावच्छेदकावच्छिन्नानाधि
करणत्वमित्यस्यार्थो बोध्यः तेन धूमवानित्यादिप्रतीतेरवच्छेदकाभिः पर्वतत्वादितत्तद्धर्मविशिष्टधू ४५
मत्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वावच्छेदधर्मावच्छिन्नाधिकरणतायां मानाभा
न धूमादिसामान्याभावप्रतियोगितावच्छेदकं धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्ध्यापि

धर्मवान्वह्नेरित्यादौ नातिप्रसङ्गः धर्माधिकरणतत्तद्व्यक्तिभेदकूटवत्त्वमादायैव धूमसामान्याभावस्य प्रतियो
गितावच्छेदकावच्छिन्नवैयधिकरण्यसंभवादिति ध्येयम् प्रतियोगित्वं नातिरिक्तपदार्थः प्रतियो
गित्वादिकं तु स्वरूपसंबंधविशेषः नु तत्र ... विशेषात्किं तु स्वरूपसंबंधविशेषः घटपटादिप्रतियोगि
स्वरूपत्वात्तदवच्छिन्नाभावाभावादित्यादौ सर्वत्रासंभवः पटादिस्वरूपस्यैकस्यैव पटाद्यभावप्रतियोगित्वस्य
पटत्वसमवायेनत्वसंयोगाद्यवच्छिन्नतया नानारूपावच्छेदकीभूततत्तद्धर्मावच्छिन्नस्य हेतुमतिसत्त्वा
त्प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वमित्यदो
षः समवायेन वह्नेः स्याभावे धूमादावतिप्रसंगात् समवायावच्छिन्नवह्न्यभावस्य वह्नित्वस्वरूपं
यत्प्रतियोगित्वं समवायस्य संयोगस्यापि तदवच्छेदकसंबंधत्वापत्तेः वा वच्छेदकीभूततत्तादृशसंबंधेनसा
धनवतः प्रतियोग्यनधिकरणत्वाभावात् प्रतियोगितावच्छेदकीभूतयत्किंचित्संबंधेन प्रतियोग्य
नधिकरणत्वोक्तावपि तु संयोगेन वह्नेः साध्यके धूमादावव्याप्तिः समवायावच्छिन्नवह्न्यभा
व स्यैव समवायेन प्रतियोगिव्यधिकरणस्य वह्नित्व स्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगे
नावच्छिन्नत्वादिति चेत् प्रतियोगिस्वरूपमवच्छेदकस्वरूपं वा प्रतियोगित्वं तदापि

कस्यचिदभावस्य केनचिदेव धर्मेण संबंधेन वा वच्छिन्नं व्यवहाराद्बलान्न तु सर्वेणाधर्मेण संबंधे
न वा समवायावच्छिन्नवन्ह्यभावप्रतियोगित्वं संयोगसंबंधावच्छिन्नामित्यादिव्यवहाराभावात्
तथा च यदभावीयप्रतियोगितावच्छेदकसंबंधेन यदभावीयप्रतियोगित्वानिरूपिता
वच्छेदकीभूतधर्मावच्छिन्नासंबंधित्वं हेतुमत्तत्तदभावीयप्रतियोगित्वानिरूपितावच्छेद
कताशून्यत्वं साध्यतावच्छेदकेऽपि विवक्षितमित्यदोषः यत्प्रतियोगिनेत्यत्र यादृशप्रति
योगितेत्यभिधानादेव तादृशार्थलाभात् न च प्रतियोगितावच्छेदकत्वरूपं यादृशप्रतियोगि
त्वं तदा यदभावीययादृशप्रतियोगितावच्छेदकसंबंधेन तदभावीयतादृशप्रतियोगित्वा
वच्छिन्नस्यानधिकरणत्वं हेतुमत इत्येव सम्यक् प्रतियोगितावच्छेदकावच्छिन्नत्वप्रवेशो
व्यर्थ इति वाच्यम् वन्हिधूमोभयवान् वन्हेरित्यादावतिव्याप्त्यापत्तेर्हेतुमात्रस्यैव वन्हिधूमो
भयत्वावच्छिन्नाभावप्रतियोगित्वादित्यस्मद्गुरुचरणाः व्याप्यसामानाधिकरण्यघटिते परा
मर्शे व्याप्यसाध्यसामानाधिकरण्ये इत्यर्थः संबंधविशेषेणैव साध्यसाधनयोः सामानाधि

मतिकृन्मते साध्यासामानाधिकरण्यं विरोधः साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यं तत्तोऽसामानाधिकरण्यज्ञानप्रतिबंधकत्वम् १ प्रतिबंधकज्ञाने प्रकाशम् तोयाद्यः
यथा गौरश्वत्वात्
यथा वह्निमान् जलात्

एवं च मीनादि ज्ञान देशे अनुमितिः स्यात् तत्राप्येतेन नादेश वेधेन सामानाधिकरण्यसत्त्वात् २

करणज्ञानादनुमितिः तद्धीप्रतिबंधकत्वेनैव विरोधस्य हेत्वाभासत्वमिति मतेनेदम् यद्विषयेनकेनापि
संबंधेन साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिस्तद्व्यापकसाध्यसंबंधितामात्रं वा व्याप्तिर्व्या
पकत्वं च स्वे साध्यसाधनयोः संबंधविशेषप्रवेशादेवातिप्रसंगभंगादिति विभाव्यते तदामर्शे तत्सा पत्र
धनत्यानुमित्या च साध्यस्य ग्राह्ययत्तादवच्छेदकधर्मेण साईं सामानाधिकरण्यं तत्र प्रविष्टोपाद
यसंबंध इत्यर्थोऽयः धूमवान्वह्नेरित्यादौ महानसीयसंयोगेन सहेतौ संयोगमात्रेण हेतुमत्ता मा
दाया व्याप्तेरेव द्रव्यत्वसाध्यके घटानुयोगिकसमवायेन सत्त्वादिहेतौ समवायमात्रेण तद्धत्ता मादाया
वीत्यतोऽयसंबंधः यद्वा यदवच्छेदकसंबंधः श्रुतम् साध्यस्य वेति ग्राह्यसामानाधिकरण्ये प्रविष्टः
स्यन्वयः धूमादिकालीनसंयोगेन वह्निसामान्याभावसत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतोऽत्रा
पि ग्राह्यसंबंधः श्रुतम् तेन संबंधेन यो हेतुमान् तन्निष्ठफलमाह धूमसमवायीति प्रतियोगिता
याः शांति अवच्छेदकान्वेऽपि वह्नित्वसमनतानिरित्यन्वयः साध्यस्य च व्याप्तेः फलमाह धूमसंयोगीत्या
दे ननु तादात्म्येन गगनादेः साध्यतायां व्याप्तावव्याप्तिस्तत्र साधनवान्निरत्यन्योन्याभावप्रतियोगिता

साक्षात्त्वं च गवावयवसंयोगविशेषः तत्त्वसमवायिसमवेतत्वसंबंधेन गवि पक्ते हेतुः १ रम

ग्यनधिकरणहेत्वधिकरणाप्रसिद्धेः ननु संबंधविशेषेण साध्यसाधनयोस्सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसा
ध्याभावे ऽव्याप्तिस्तत्संबंधेन साध्यसाधनयोरधिकरणाप्रसिद्धेरत आह एवं चास्मिन्नितीति संबंधविशेषानिवेशोऽस्मिन्नित्यर्थः
सामानाधिकरण्याद्याविष्याद्पदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणत्वस्य परिग्रहः प्रयोजनमाह तथा
चेति धर्मिणोपीति तादात्म्येन व्याप्यत्वं व्यापकत्वं चानिर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोस्साध्यस्य चाधिकरणाप्र
सिद्ध्या न तान्निर्वाह इति भावः यो न्योन्याभाव इति योभाव इत्येव वक्तुमुचितं न मन्योन्याभावत्वानिवेशवैयर्थ्यादिति ध्येयम्
तदनवच्छेदकवान्हिमत्वेति वान्हिमत्वं च स्वाधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमेवेत्याशयेनेदम् अत्र
साध्यसाधनयोरिव तदीयसंबंधयोरपि भेदे नव्याप्तेर्भेदात्तादात्म्येन हेतुसाध्यकस्थले हेतुनिष्ठाभावाप्रतियोगिसा
ध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचितेति वदंति एवमिति साध्यसामानाधिकरण्यादौ संबंधित्वानिवेशे कृत इत्यर्थः ध
र्मिण इति वस्तुन इत्यर्थः तथा च गोःसास्नावत्त्वाद्वान्हिमान्धूमवतस्तादात्म्यसंबंधेन व्यापकताव्याप्यतापि सं
गच्छत इति भावः ननु तादात्म्येन धार्मिणो धर्मव्याप्यतायामप्यासिद्धां न इत्यत आह अतएवेति धार्मिणो धर्मव्या

याःसाध्यताघटकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्य स्वयमेव बौद्धाधिकारटिप्पण्यामुक्तत्वाद्देघनी चैत्रत्वादि वं
न्याद्दैवृत्त्यनियामकत्वात्मित्वादिसंबंधेन धनादेस्साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेरतत्रा
ह पद्वेति यत्तु प्रतियोगितावच्छेदकसंबंधेन तद्व्याधिकरणप्रवेशस्य पुनः प्रतियोगितायास्साध्यता
तावच्छेदकसंबंधावच्छिन्नत्वविवक्षायां गौरवाद्धेत्वादिकल्प इति तन्न संबंधांतरावच्छिन्नतत्तन्नतत्प्रतियोगिता द
वच्छेदकभेदकूटघटितत्वेन घटत्वादिकल्पस्येव गुरुत्वादित्याशयः संबंधभेदेन साध्यतावच्छेदकसंबंधेन नयो
त्तमनत द्रव्यत्वपर्वताद्यनुयोगिकसंयोगादिना वन्ह्यादेस्साध्यतायां तत्तद्भेदेऽव्याप्तिस्तादृशप्रतियोगितावच्छेदकसंबं
धेन प्रतियोगिनो यदधिकरणं तदन्यत्वस्य साध्यतावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधितदन्यत्वस्य वा हेतुमत्यप्र
सिद्धेरितिवाच्यम् तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वविशेषणविशेषेण साध्यता ता
धि वच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वविशेषणतादिविशेषेण वा तादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकर धि
णतासामान्याभावस्योक्तत्वात् अन्यथा कालिकसंबंधेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वात्प्रतियो

तथा चायमभिप्रायः गोत्वत्वग्रहदशायामेव भूततान्यापकतावच्छेदकत्वज्ञानाज्ञोत्वविधेयकत्वमनुमितेर्व्यक्तं अयमभिप्रायः गवेतरासमवेतत्वरूपस्य
गोत्वानिरूपितव्याप्तिग्रहाद्गोत्वाविधेयकत्वस्य च समेवेति किं धर्मिणो धर्मव्यापकत्वेनेति ४

जा॰ग॰मि॰
२२

1435

त्तं गोत्वत्वेति गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपायां गोत्वव्याप्तेः ज्ञानदशायामुत्पन्नायां अयं गौरित्यनुमिते
र्गोत्वाविधेयकत्वासंभवात् गोविधेयकत्वमेवेति तदनुरोधादवश्यं धर्मिणो धर्मव्यापकत्वं वा व्याप्तिरिति भावः ननु
गोत्वस्य साध्यत्वेपि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोऽनुमितिहेतुत्वात्तत्र च धर्मि
तावच्छेदकाविषयैव गोत्वत्वग्रहस्यापेक्षितत्वात्तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति
आदिना पक्षधर्मतासंग्रहः तथा च गवेतरावृत्तित्वव्याप्तेस्सास्नाव्यापकतावच्छेदकत्वग्रहे धर्मितावच्छेदक
तयोपाप्स्यतीति ध्रौव्यापि तादृशीश्वरस्य पक्षे पक्षधर्मताधीस्तत्रैवायं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमिति
तदनुरोधेनैव तादात्म्येन धर्मिणो धर्मव्यापकत्वं वा व्याप्तिरित्याशयः यत्तु शुद्धगोत्वावच्छिन्नाविधेयकानुमि
तिं प्रति निरवच्छिन्नगोत्वावच्छिन्नविशेष्यताकमेव प्रतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहेपि गोत्वेसा
स्नादिव्यापकतावच्छेदकत्वग्रहसंभवात् गोसाध्यकानुमितेर्नानुपपत्तिरिति भाव लौकिकप्रत्यक्षे एव वाधिक
रणतावच्छेदकरूपेणोपस्थितेर्हेतुत्वादिति मतं तत्तुच्छम् व्याप्तिज्ञानात्प्रतिबध्यतया तादृशव्यापकताग्र
हस्यानुमित्यहेतुत्वात् अन्यथा तुल्ययुक्त्या शुद्धगोत्वाविधेयकानुमितिं प्रति निरवच्छिन्नाविशेष्यता

न
न
निष्ठ
चार
राम
२२

1436

व्याप्यत्वादेवेत्यर्थः तत्र तत्र व्यतिरेक्यादिग्रंथे ननु समवायेन जलादेः पृथिवीत्वाभावव्याप्यत्वपरतयैव तत्र कुर्यसंगतिरि
त्याशंक्य तत्प्यासनात पृथिव्यां जलादिभेदसाधनार्थं तदनुपन्यासो न स्यादव्यापकतावच्छेदकसंबंधेन व्यापकाभावेन व्याप्यता
घटकसंबंधावच्छिन्नव्याप्याभावस्यैवासिद्धेरित्यन्वयोपनि दृष्टांतपूर्वकं परिहरति यथा चेति धूमाभावपदइति नवान्हि
धीरित्यन्वयः व्याप्यमिति नियम उपपद्यत इति परेणान्वयः महानसे संयोगेनेति नानिवर्तत इत्यन्वयः न संयोगाव
च्छिन्नानुमितौ भासत इति तदर्थः निवर्तते वेति धूम इति पूर्वेणान्वयः तादात्म्येनैवेति समवायेन व्याप्यतायां

भावा

समवायेन जलस्यांत्यत्वाभाव एवासिद्धेरिति जलभेदसाधनार्थं तत्कुं [illegible] वक्तारो न स्यादिति भावः नन्वेतावतापि ता
दात्म्यावच्छिन्नजलाभावासिद्धौ न तु जलान्योन्याभाव इति तद्दोषतादवस्थ्यमत आह स एवेति धर्मिणो धर्मव्या
प्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मव्याप्यत्वे तमाह इत्य भेदचेति धर्मिणो धर्मव्यापकत्वे युक्तिम
प्याह अत एवेति धर्मिणो धर्मव्यापकत्वादेवेत्यर्थः नान्वियंगोरित्यनुमितिर्गोवेतरावृत्तिरूपायाः [illegible] गो

त्व

त्वनिरूपित [illegible] व्याप्तेर्ज्ञानात् समवायेनानिरवच्छिन्नगोत्वसाध्यके व भाविष्यति साध्यवदन्यावृत्तित्वरूपाया
व्याप्तेरनुमितिहेतुत्वस्याग्रेवाच्यत्वात् तत्तादृशानुमित्यनुरोधाद्धर्मिणो धर्मव्यापकत्वस्वीकारो नुचित इत्यत उ

योगितावच्छेदकत्वेपि द्वितीयकल्पानुसारेण व्यापकत्वं संपादयति साध्यतावच्छेदकसंबंधेनेति तथाच संबंधा
न्तरावच्छिन्नघटाभावमादायैव लक्षणसमन्वय इति भावः द्रव्यत्वं गगनासंयुक्तादिव्यंतरेण व्यभिचाराद्धेत्वंतर
माह पृथिवीत्वादिति व्यापकत्वमपीति गगनादेरिति पूर्वोक्तरूपः नन्वेवं निरुक्तव्याप्तिज्ञानाद्घटो गगनवानि
त्यनुमितिः प्रमा स्यादत आह तद्धिरपीति तथैव वृत्त्यनियामकसंयोगेनैव तथाच तादृशसंबंधेन गगनानुमितेः
प्रमात्वमिष्टमेवेति भावः तेनासंबंधित्वादिति येन संबंधेन साध्यसामानाधिकरण्यं परामर्शे भासते तेनैव
संबंधेन साध्यानुमितेः फलत्वादिति भावः सामानाधिकरण्याधियो हेतुत्वस्य तदंशे संबंधविशेषानिवेशस्य
वानंगीकारमते ह्याह अव्यापकत्वाच्चेति तेनेत्यनुषज्यते तथाच तादृशसंबंधेन साध्यस्य हेतुव्यापकत्वाग्रह
ते तेनैव संबंधेन साध्यानुमितिरूपफलमतो निरुक्तानियामकसंबंधेन व्यापकत्वासंभवादेव न तेन साध्यस्य प्रमा
नुमितिरिति भावः ननु वृत्त्यनियामकसंयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारं तादृशसंबं
धेन संबंधप्रतीत्या गगनाभावस्य प्रतियोगिव्यधिकरणाधिकरणत्वाभावात्तादृशाभावांतरप्रतियोगी

कस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वादयं गौरित्यनुमितेर्गोत्ववत्त्वाद्यनुपास्थिता
वपि गोत्वरूपधर्मिसाध्यकत्वस्य दुर्वारत्वापत्तेरित्यादिकं प्रांचस्तु गोतादात्म्यस्य साध्यताव्यापकत्वग्रहादेव गोत्वादेः
त्म्येन सिद्धिसंभवान्न तदनुरोधेन गोतादात्म्येन व्यापकत्वस्वीकारो युक्तः संबंधगतव्यापकत्वग्रहादेव संबंधि
नोनुमितेर्मिश्रादिसंभवात् तदनंगीकारे गोत्वत्वाद्यग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामित्यर्थः
इत्यर्थः स्यात् तस्मादिदंयन् गोत्वत्वाद्यग्रहदशायामित्यस्य गोत्वत्वेनाग्रहोपस्थितेरित्युत्पत्त्या गोत्वस्यबाध
निश्चयदशायामित्यर्थः तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं स्वीकार्यमि
त्यपि वदंति गोभिन्नमिति सिध्यतीति परे तन्न गवः गोर्ध्वात्तिरेकादिति तादात्म्येनेत्यनुपपन्नं ते एवं चेति सामानाधि
करण्यादौ संबंधित्वानिवेशे चेत्यर्थः संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकसंबंधत्वे वृत्त्यनियाम
कसंयोगस्यापि तत्वं तदा सिद्धमतो मात्रपदम् संबंधस्वरूपत्व इति अन्यथा तादृशसंबंधावच्छिन्नप्रतियोगि
ताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वादिव्यापकत्वं दुर्घटमेव स्यादिति भावः तादृशसंबंधस्य प्रति

1438

लिकसंबंधावच्छिन्नशत्वाद भावसत्वात्तत्त्वघ्नेवंविधोवाव्यत्वादित्तदनधिकरणदेशाप्रसिद्धातदवच्छेदेनकालिक
संबन्धावच्छिन्नवाच्यत्वाभावस्यदैशिकविशेषणतयाकालेसंभवादितिभावः नस्यादिति तथाचकालोघटवान्म
हाकालत्वादित्यादौव्याप्तिलक्षणाव्याप्तिरितिभावः प्रथमविवक्षानुसारेणदोषंसंगमयति स्वावच्छेदकेति प्रति
योगितावच्छेदकसंबंधेनेत्यर्थः काले महाकाले तत्संबंधावच्छिन्नत्वस्यसाध्यतावच्छेदकीभूतकालिकसंबंधा
वच्छिन्नत्वस्यसंभवादित्याशयेनान्वयः द्वितीयविवक्षानुसारेणतमाह तेनेसंबंधेनेति साध्यतावच्छेदकीभूत
कालिकसंबंधेनेत्यर्थः ननुमहाकालान्यत्वविशिष्टघटाभावएवप्रतियोगीव्यधिकरणस्तुलभः नचात्रविशे
षणौविशेषशब्देनमहाकालनिरूपितविशेषणतायाएवाविवक्षितत्वादेतादृशसंबंधेनानिरुक्तप्रतियोग्यधिक
रणाप्रसिद्धेरुक्ताभावस्यापिप्रतियोगिवैयधिकरण्यासंभवइतिवाच्यम् तथासतिकालवृत्तिधर्मस्यतादृश
विशेषणतयाकिमपिव्यापकंनस्यादित्यस्यैवसम्यक्त्वे ऽष्टद्रव्यातिरिक्तत्वाद्यभिधानस्यसंदर्भविरोधापत्तेः स्वरूप
संबंधेनगगनादेर्वृत्तिमत्त्वेत्याग्रीमग्रंथादिविरोधप्रसंगाच्च महाकालीयविशेषणतयागगनादेर्वृत्तिमत्त्वेपि

1440

त्वस्य च गगनादावसत्त्वादत आह व्यक्तीति इदं वृत्तिनियामकसंबंधेन गगनादेरव्यापकत्वं तथा च निरुक्तप्रति
योगित्वेस्यादिना वक्ष्यमाणप्रतियोगिवैयधिकरण्यं वृत्तिनियामकसंबंधेन गगनाभावेस्यास्त्यतीति भावः काली
कसंबंधेन गोत्वादौ घटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौ नाव्याप्तिर्भिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभा
वस्यैव घटादौ प्रतियोगिवैयधिकरण्यसंभवादत उक्तम् अवृत्तवृत्तीति पृथ्वीत्यादिचतुर्द्वयातिरिक्तेति तु ज्ञा
यः गगनादेः कालपरिहारादेव युदासादिति ध्येयम् कर्मात्मकत्वं तु कालस्यापि भिन्नकालीनतत्तद्व्यक्तित्वा
वच्छिन्नाभावप्रतियोग्यनधिकरणत्वप्राप्तिस्थानमात्रवृत्तिस्पंदत्वादिहेतौ नाव्याप्तिरत आरम इदं व्यपदम्
तथाविधकालत्वादावयुक्तादिशा नाव्याप्तिरतो मात्रपदम् तादृशधर्मस्य महाकालत्वादेस्समवायादिना
व्यापकत्वं संयोगाद्यव्याप्यवृत्तेस्तु घटमतत्रुक्तं विशेषणतेति कालिकविशेषणतेत्यर्थः व्याप्यवृत्तिप्रमे
यत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसंबंधावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तमव्या
प्यवृत्तीति तादृशाभावं च घटादिकं द्रव्यत्वादिकं च तद्वृत्तेपि कालस्य तदनधिकरणदेशावच्छेदेन का

योगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्यैवानिवेशायोगात् एवं च प्रकृते महाकालान्यत्वविशिष्टघट
त्वावच्छिन्नाभावस्य प्रतियोगितायाः साध्यतावच्छेदकघटकेन महाकालान्यत्ववैशिष्ट्यरूपसाध्यानिष्ठधर्मे
णावच्छिन्नत्वात् तादृशप्रतियोगिताकाभावमादाय न प्रतियोगिव्यधिकरणाभावस्य प्रसिद्धिसंभावनापीति श्रा
द्धः तच्चिन्त्यम् प्रमेयवान्वाच्यत्वादित्यादौ हेतुसमानाधिकरण तादृशप्रतियोगिताकाभावाप्रसिद्ध्याऽव्या
प्तिप्रसंगात् वस्तुतो यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमत इत्यत्रावच्छेदकवैशि
ष्ट्यमवश्यं साध्यतावच्छेदकताघटकसंबंधेनैव वाच्यम् अन्यथा तप्तायःपिण्डस्यापि कालिकसंबंधेन
धूमत्वविशिष्टं यद्वह्न्यादिकं संयोगेन तदधिकरणतया धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः इत्थं च यत्र
समवायेन घटत्वविशिष्टस्य कालिकसंबंधेन साध्यता तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभाव
स्य साध्यतावच्छेदकताघटकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नत्वमप्रसिद्धं स्वरूपसमवायाभ्यामेव
तत्र तथात्वाद्विशिष्टानिरूपितसमवायानभ्युपगमात् तादृशाभावमादाय न प्रसिद्धिसंभव इति ध्येयम्

सा दृशसंबंधसामान्येमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिकत्वाविरहात्तादृशघटत्वावच्छिन्नाभा
वस्यैवनिरुक्तक्रमेण प्रतियोगिव्यधिकरणत्वसंभवेनपूर्वं मतस्यैवसमंजस्यत्वादिति चेन्न इदानींमहाकालान्यत्ववि
शिष्टो घटः कालोपि महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महा
कालान्यत्वविशिष्टघटवत्त्वात् अन्यथोक्तप्रतीत्या खंडकाले एव विशिष्टघटवत्त्वावगाहाने वस्तुमात्रस्यैव
महाकाले सत्त्वप्रसंगात् इदानींतदानीमित्यादिप्रतीतिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्रा
प्यसत्त्वात् न चैवं खंडकालस्याधिकरणत्वेमानाभावः घटध्वंसविशिष्टः कालः पटवदन्य इत्यादिप्रतीतेः प्रमाणत्वा
नुरोधेनैव खंडकालस्य नव्यानामादितिसिद्धांतानुसारीयन्याः परंतु महासीयवह्नित्वेन वह्निघटोभयत्वेन वाऽव
च्छिन्नप्रतियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वेप्यक्षतमव्याप्तिभियाऽव
श्यंसाध्यतावच्छेदकाघटकोयस्साध्यवृत्तिधर्मस्तद्वन्नवाच्छिन्नैव हेतुसमानाधिकरणाभावप्रतियोगितानिवेशनी
या प्रत्येकमुभयपत्रव्याप्तिसंबंधेनासत्त्वोपधर्मस्यतादृशसंबंधेनोभयवृत्तित्वात्तम्यवेन हेतुमन्निष्ठाभावप्रति

दृशासंबंधेनेत्यस्यफलमाह सत्वादिति विषयतायावृत्त्यानिमाकत्वे सत्ववति घटादौ ज्ञानाभावस्य
सहजतः प्रतियोगिवैयधिकरण्यं संभवतीत्यतः संयोगसामान्यस्येति नातिप्रसंग इति ज्ञानवा
न्संयोगवान्सत्वादित्यादौ नातिप्रसंग इत्यर्थः सत्तावद्वृत्तित्वसामान्याभावस्य संयोगादावभावा
दुक्तातिव्याप्तिवारणमेव यात्किंचिदित्यस्यापि प्रयोजनमित्यवधेयम् प्रतियोगितावच्छेदक
विशिष्टेत्यस्यफलमाह भूतत्वेति स्वयंमनसः स्वइनाद्भूतत्वम् तत्वोभयसाधकम् तत्वस्यसद्धे
तुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टान्तद्वयं मनोगुणयोः क्रमेणान्वितम् इत्थं च वि
शिष्टस्याननिरिक्तत्वाद्विशिष्टधर्मावच्छिन्नाधेयतत्वस्यातिरिक्तत्वमित्यभ्युपेत्य अन्यथोभयत्व
स्यैकविशिष्टापरत्वरूपत्वे भूतत्वम् तत्वोभय गुणकर्मान्यत्वविशिष्टसत्तयोरतिरिक्ततया तयो
स्सहजतामवमनोगुणाघवृत्तितयाप्रतियोगितावच्छेदकविशिष्टस्याभिधानस्यासांगत्यापत्तेरि
त्यवधेयम् सामान्यपदस्यफलमाह संयोगसामान्याभावेति तथा च संयोगीद्रव्यत्वादित्यादाव

रा
रा
राम

केचित्तु साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वाद्विशिष्टसाध्यकस्थले तु यादृशप्रतियोगितावच्छेदका
वच्छिन्नानधिकरणत्वं हेतुमत इत्यादिदलं यम विशिष्टसाध्यतावच्छेदकस्थले तु यादृशप्रतियोगिता
श्रयानाधिकरणत्वं हेतुमत इत्येव दलं वाच्यं तथा च शुद्ध(?)घटस्य साध्यतायां महाकालान्यत्वविशिष्ट
घटस्याभावोऽपि प्रतियोगिसमानाधिकरणप्रतियोगितायाः प्रतियोगितावच्छेदकधर्मत्वरूपेवला
घवान्न तु प्रतियोगित्वरूपाने(?)यामैकाल्ले नगौरवादतो नैकप्रतियोग्यधिकरणतामादायसंयोग्यपतत्त्वादित्या
दावव्याप्तिरित्याहु तादृसत्ता(?)कालोऽघटवान्महाकालत्वादित्यादावव्याप्तिवारणायैव विशिष्टसाध्य
तावच्छेदकस्थलेऽपि प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्याकिं
चित्करत्वादिति सार्वभौममतमाशंक्यानिराचष्टे नचेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति
साध्यतावच्छेदकसंबंधेनेत्यर्थः इदं चाद्वतीत्यस्य प्रतियोगित्वेनान्वितम् तादृशपदस्य प्रतियोगि
तावच्छेदकसंबंधपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छेदकसंबंधा वच्छिन्नाया स्याता

धिकरणयावद्धेत्वधिकरणकोयोयस्तदन्यत्वं प्रतियोगिवैयधिकरण्यं वाच्यमतो गगनाभाव
मादायैवाप्रसिद्धेर्नकोपिदोषः नचैवं यत्संबंधेन यद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं त
त्तत्संबंधान्यसाध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्या
प्तिरस्तु तथाच घटवान्महाकालत्वादित्यादौ समवायेन घटाद्यभावोपि प्रतियोगिव्यधिक
रणस्संभवतीति वाच्यं घटत्वादिविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेः केनापि संबंधे
न हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासंभवादिति प्राहुः तादृशसंबंधसा
मास्यरत्नस्य पूर्ववदर्थो वोध्यः क्वचित्साध्यतावच्छेदकसंबंधसामान्यइत्येव पाठः विव
क्षितत्वादिति अभावांतमूलग्रंथेनेत्यादिः तथाच साध्यतावच्छेदकसंबंधसामान्येयादृश
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयो
गिकत्वसामान्योभयाभाववत्तादृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदका

साध्यतावच्छेदकसंबंधावच्छिन्नोन्यत्वनिरूपकतावदैन्यान्वयः २

1446

व्याप्तिवारणायैव सामान्यपदमिति भावः । विशिष्येति । विशिष्यनिरूपिताधेयत्वस्यैवार्थः तथा
च विशिष्यसत्तावान् ज्ञातेत्यादावतिव्याप्तिरिति भावः । ननु तादृशसंबंधावच्छिन्नप्रति-
त्वे इत्यधिकरणनिष्ठाधिकरणतानिरूपकतानवच्छेदकप्रतियोगितावच्छेदकत्वं
सामान्यकान्ते नहि वह्निमतो नोक्तदोषः । अत आह समवायेनेति । ननु समवायेन
ज्ञाने धर्म्यां व्याप्यवृत्तित्वात् तत्साध्यके प्रतियोगिवैयधिकरण्यमेव न देयं देयं वा व्याप्यवृत्ति
साध्यकस्थलीयानिरुक्तसाध्यतावच्छेदके व्याप्यवृत्तितानवच्छेदकत्वं विशेषणम
तो न तत्रत्यलक्षणस्यैवाज्ञाने व्याप्तिरत आह संयोगादीति तत्र विशिष्यनिरूपिताधे-
यत्वस्यातिरिक्तत्वोपगमेऽपि प्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबं-
धावच्छिन्नत्वोभयाभाववैशिष्ट्याधिकरणयत्किंचिद्व्यक्तिवृत्तित्वसामान्यकत्वस्याविवक्ष-
णान्नोक्तोऽपि दोषः । अस्य दुरुद्धरणः नव्यास्तु साध्यतावच्छेदकसंबंधेन प्रतियोग्यन

लक्षणघटकीभूतो ऽभावः २

वे

संयोगसामान्य एव समवायानिष्ठस्य पर्वतानुयोगिकत्वस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वस्य च
द्वयोरभावसत्त्वान्नैवाव्याप्तिरत आह सामान्योभयेति तादृशोभयाभावश्च स्वरूपसंबंधेन बो
ध्यः तेन समवायादिना तदुभयाभावस्य संबंधमात्रे सत्त्वेपि सद्धेतौ नाव्याप्तिः एतद्घटवान्कालां
तरीयतद्घटत्वादित्यादावेतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसि
द्धेरभावांतरमादायाव्याप्तिः गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसि
द्ध्या गगनाभावमादाय प्रकृताव्याप्तिवारणासंभवश्च स्यात् अतो निरुक्तप्रतियोगिप्रतियो
गिकत्वविशिष्टयत्किंचिद्धेत्वधिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्या
भाव उक्तः नच यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधसामान्ये हेत्व
धिकरणीभूतपदार्थत्वनुयोगिकसाध्यतावच्छेदकसंबंधत्वस्य तथाविधसंबंधसामान्ये
यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्याव्यतिरेकत्तादृशप्रतियोगिता ताम

1448

वच्छिन्नसामान्याधिकरण्यं व्याप्तिरित्यर्थः संबंधसामान्य इत्युक्तौ कालिकसंबंधेन धूमप्रतियोगि
कत्वापेक्षयाऽनुयोगिकत्वोभयसत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेद
केति समवायिनः संयोगेन साध्यतायां जातिमत्वात्सत्तावानित्यादावतिव्याप्तिस्साध्यतावच्छेदकीभू
तसमवायान्यतमधर्मे समवायावच्छिन्नप्रतियोगिकत्वगुणानुयोगिकत्वोभयसत्वेन
